





श्रीगणेशाय नमः ॥

स्वाराज्यसिद्धिः ॥

ङ्गापूरप्रचलितजटास्रस्तभोगीन्द्रमौलिं
आलिङ्गन्तीमचलतनयां सस्मितं वीक्षमाणः ॥
लीलापाङ्गैः प्रणतजनतां नन्दयँश्चन्द्रमौलि
र्मोहध्वान्तं हरतु परमानन्दमूर्तिः शिवो नः
॥१॥ स्मारं स्मारं जनिमृतिमयं जातनिर्वेद
वृत्तिर्ध्यायं ध्यायं पशुपतिमुमाकान्तमन
र्निषण्णम् ॥ पायं पायं सपदि परमानन्द
यूषधारां भूयो भूयो निजगुरुपदाम्भोज
ग्मं नमामि ॥२॥ यस्माद्विश्वमुदेति य
वसत्यन्ते यदप्येति यत्सत्यज्ञानसुख
पमवधिद्वैतप्रणाशोज्झितम् ॥ यज
त्स्वपनप्रसुप्तिषु विभात्येकं विशो
प्रत्यग्ब्रह्म तदस्मि यस्य कृपया तं
न्द्रं भजे ॥३॥ स्वधीतेज्यादानब्र
माधाननियमैर्विशुद्धस्वान्तान



श्रीगणेशाय नमः॥

स्वाराज्यसिद्धिः॥

गङ्गापूरप्रचलितजटास्रस्तभोगीन्द्रभीत्या
मालिङ्गन्तीमचलतनयां सस्मितं वीक्षमाणः॥
लीलापाङ्गैः प्रणतजनतां नन्दयंश्चन्द्रमौलि
र्मोहध्वान्तं हरतु परमानन्दमूर्तिः शिवो नः
॥१॥ स्मारं स्मारं जनिमृतिभयं जातनिर्वेद-
वृत्तिर्ध्यायं ध्यायं पशुपतिमुमाकान्तमन्त
र्निषण्णम्॥ पायं पायं सपदि परमानन्दपी-
यूषधारां भूयो भूयो निजगुरुपदाम्भोजयु-
ग्मं नमामि॥२॥ यस्माद्विश्वमुदेति यत्र नि-
वसत्यन्ते यदप्येति यत्सत्यज्ञानसुखस्वरू-
पमवधिद्वैतप्रणाशोज्झितम्॥ यज्जाग्र
त्स्वपनप्रसुप्तिषु विभात्येकं विशोकं परं
प्रत्यग्ब्रह्म तदस्मि यस्य कृपया तं देशिके-
न्द्रं भजे॥३॥ अधीतेज्यादानव्रतजपस-
माधाननियमैर्विशुद्धस्वान्तानां जगदि-

दमसारं विमृशताम् ॥ ३ ॥ रागद्वेषाणामभय-
चरितानां हितमिदं मुमुक्षूणां इत्थं किमपि
निगदामः सुमधुरम् ॥ ४ ॥ ज्ञात्वा देवं सर्व
पाशापहानिर्नाऽन्यः पन्थाश्चेति भूयो वचो
भिः ॥ ज्ञप्तेस्साक्षान्मुक्तिहेतुत्वसिद्धाव-
ध्या सत्वं बन्धनस्यार्थसिद्धम् ॥ ५ ॥ सत्यं
भावं न वित्तिर्व्यपनुदति यतः कर्मनाश्यो
घटादिर्मिथ्याभूतं च कर्मक्षपयति न तथा
वित्तिघात्यं यतस्तत् ॥ इत्थं सिद्धे विभा-
गे श्रुतिशिखरगिरा वित्तिघात्यः प्रतीतो
बन्धो मिथ्येति सिद्धे न तदपहतये कर्म
जातं समर्थम् ॥ ६ ॥ आविद्यो ह्येष बन्धो
विरमति न विना वेदनं कर्मजल्लैर्मौलो-
ऽभूतोऽहिरस्तं व्रजति किमु नमस्कारम-
न्त्रौषधाद्यैः ॥ एवं निश्चित्य नागस्त्व-
चमिव विधिना कर्मबन्धं विधूय ज्ञाने
पाये गुरुश्रीचरणमभिगतः सेवमानो

यतेत॥ ७ ॥ केचित्कर्मैव काम्योज्झित
मुदितपदप्राप्त्युपायं प्रतीता स्तच्चोपा-
स्तिं च मुक्तौ मिलितमथपरे साधनं सं-
गिरन्ते॥ अन्ये तु ज्ञानकर्मोभयमिति-
मतिभिः स्वाभिरुत्प्रेक्षमाणा ज्ञानादेवेति
वाक्याद्वयमिह सहसा नानुमन्यामहे
तान्॥ ८ ॥ पित्र्यो लोकोऽधिगम्यः क्रतुभि-
रधिगतो विद्यया देवलोको यज्ञाच्चेतः
कषायक्षपणमिह तयोः स्मार्तमेवास्तु
साध्यम्॥ यज्ञेनेत्यादि वाक्याद्भवतु
विविदिषा वेदनं तत्फलं वा ज्ञानादेवा
मृतत्वं न हि शशकवधूः सिंहपोतं प्रसू-
ते॥ ९ ॥ ऽर्थी दक्षो द्विजोहं बुध इति मति-
मान्कर्मसूक्ताधिकारी शान्तो दान्तः
परिव्राडुपरमपरमो ब्रह्मविद्याधिका-
री॥ इत्थं भेदे विवक्षन्समुदितमुभयं मु-
क्तिहेतुं सुशीतं नीरं वैश्वानरं चोभय-

महहतृषोच्छेदकामः पिबेत्सः॥१०॥ ज्ञा
नं चाप्यद्वितीयस्वरससुखघनानन्तचि-
न्मात्ररूपब्रह्मात्मैकत्वबोधः समवति सु-
मतेस्तत्त्वमस्यादिवाक्यात्॥ देहाद्य-
ध्यासदार्ढ्याच्छ्रुतमपि सहसा नैव सं-
भावनीयं ब्रह्मत्वं स्वस्य तस्मान्नयगुरुव-
चनैः साधु मीमांसनीयम्॥११॥ देहं केपि
वदन्ति खानि तु परे प्राणान् मनश्चापरे बु-
द्धिं च क्षणिकां स्थिरामथ परे केचिच्चितं
निःसुखाम्॥ आत्मानं जड़चित्स्वभावमपरे
चिद्वज्जड़ं चेतरे सत्यज्ञानसुखाद्वितीयम
परे तत्रास्य को निश्चयः॥१२॥ प्राहुः केचि-
दणुं शरीरसदृशं केचिद्विभुं तं परे तं-
मानसगोचरं तदपरे नित्यानुमेयं जगुः॥
अन्ये चिद्विषयं परे तु परमस्वज्योतिरा-
भ्यन्तरं सत्येवं श्रुतियुक्तिभिर्विविदि-
षोर्युक्तो विचारो मुहुः॥१३॥ एवं विश्व-

स्यहेतुं प्रकृतिमभिदधुः केऽपि केचित्प-
राणून्नीशेनाधिष्ठितांस्तान्कतिचन
कतिचिन्नश्वरं ज्ञानमेव ॥ अन्ये शून्यं
स्वभावं कतिचन समयं केऽपि केचिद्यदृ-
च्छां कर्मान्ये ब्रह्ममायाशबलितमपरे
सोऽपि तस्माद्विमृश्यः ॥ १४ ॥ यस्मादु-
त्पत्तिगुप्तीक्षितिरपि जगतां यच्च शास्त्रै-
कयोनिः सर्वज्ञं मायया यत्सहजसुखस-
दद्वैतसंवित्स्वरूपम् ॥ तद्ब्रह्म स्वप्रका-
शं श्रुतिशिखरगिरां सैव तात्पर्यभूमिः
स्वात्मा सोऽयं विदित्वा जनिमृतिजल-
धिं निस्तरन्तीह सन्तः ॥ १५ ॥ साङ्-
ख्यैः प्रख्यापितं न क्षममिह जगतां नि-
र्मितौ तत्प्रधानं हेतुर्नैतादृशोऽर्थे प्रभव-
ति गदितस्तार्किकैरीश्वरोऽपि ॥ नाणु-
काणादबौद्धक्षपणकभणितो नापि
निःसाक्षि शून्यं तस्मादस्माकमेव श्रु-

तिगदितपरब्रह्मसिद्धं निदानम् ॥१६॥ ना
चैतन्यात्प्रधानं प्रभवति चलितुं तन्निसर्गक्रियं चेन्नित्यसर्गप्रसङ्गो नियतिरपि यतः सर्गपूर्वो न पूर्वम् ॥ बन्धो निर्हेतुकः स्यात्कथमथ न भवेद्बन्धमोक्षाव्यवस्था निःस्वयं नापि मोक्षं स्पृहयति मतिमान् कापिलं तेन दुष्टम् ॥१७॥ किं चाकर्त्रैव भोक्त्रा यदि वत कृतहानाकृताभ्यागमः स्यात् कीदृग्भोगोप्यसङ्गेऽनतिशयिनि भवेत्तेन भोग्यस्य कोऽर्थः कीदृक् कस्याविवेकः कथमथ स भवेऽङ्गो गहेतुर्विवेकः कस्य स्यात्तेन किं स्यादिति च विमृशतो दुर्वचं ब्रह्मणोपि ॥१८॥ नेशोधिष्ठातुमीशो ननु करणगुणस्तार्किकाणां प्रधानं स्याच्चेत्तन्वक्षवत्त्वं सुचरितदुरितोद्भूतभोगप्रसङ्गः ॥ दुःखाढ्यं कुर्वतोस्य प्रस-

रति बिषमाचारनैर्घृण्यदोषः, कर्मेभ्यो-
श्च क्व कावस्थितिरिति विफलत्वान्यथा-
सिद्धयः स्युः ॥१९॥ सर्वज्ञः सर्वलिप्सुः
सकलकृतियुतो नित्यमीशो यदि स्या-
त्सर्वं कार्यं सदा स्यादुदयमृतिलयायौ-
गपद्येन च स्युः ॥ बाह्योपादानवत्स्या-
त्तनुकरणधियां विश्वसर्गे व्यपेक्षा,
निस्तर्कं चानुमानं कृतिरपि हि यतश्चे-
ष्टयार्थं विधत्ते ॥ २० ॥ कस्मादण्वोः
क्रिया स्यात्कथमथ मिलितौ निष्क्रि-
तौ कौ कथं वा कार्यं ताभ्यां तृतीयं कि-
मिति च न महत्पारिमाण्डल्यतः स्या-
त्॥ तेभ्यः कस्मान्महान्स्यात्किमि-
ति पुनरसावेव नित्यो न ते स्यान्नित्य-
श्चाणुः कथं वा निरवयव इति ब्रूह्यस-
त्कार्यवादिन् ॥ २१ ॥ बाह्यं भोग्यं प्र-
जल्पन्क्षणिकमणुचयं भोक्तृसंघात-

मन्तः स्कन्धानां पञ्चकं चेदशामिति
सुगतः पृच्छ्यतां वेदवाह्यः ॥ किं ते मा
नान्तरेण प्रमितमिदमुत प्रौढिरेषात्म
दीया, किं वा मोहात्प्रलापः किमथ जड
जगद्धि प्रलिप्ता कुबुद्धे ॥ २२ ॥ संची
भावः कथं वाचलनविरहिणां भङ्गु
राणामणूनां, संघो नन्यः कथं वा निष्प्र
य प्रदत्तेर्नियात्कश्च संघं विधत्ते ॥ स्क
न्धानां सन्निपातः कथमिव क्रियतां
भोक्तृता का च धारा, कस्य स्तां भोग
मोक्षौ वद जड सफलं केन वा दर्शनं ते ॥
२३ ॥ नाविद्यादिप्रवृत्तेर्द्विविधसमेता
दयस्ते यदेकैकसन्तानश्यत्वादने
न प्रभवति किमरे हेत्वसंबन्धकार्य
मः ॥ तच्चेन्निर्हेतुकं स्यात्करणविफल
ता स्वप्रतिज्ञाविरोधौ, वैविध्यं चाप्य
भावे कथमिति वितथो बुद्धबन्धोः

प्रलापः॥२४॥नापोद्यंमानसिद्धंकथ-
मिवविविधंज्ञानमर्थापलापे,बाधोर्था-
नांनदृष्टोवहिरिति चपदंनप्रसिद्धार्थ-
मृच्छेत्॥ वेद्याविज्ञानभेदाःकथमथ
विविधावासनावाकुतःस्युः किंचप्रा-
गुक्तदोषाःक्षणिकचितिहतस्तेनवि-
ज्ञानवादः॥२५॥नाभावाद्भावजन्मक्ष-
चिदपिकलितंनिर्विशेषाद्विचित्रं,न
स्यात्तेनानुविद्धंह्यसदसदिति चप्रत्य-
यःस्यादशेषे॥केनाभावप्रथातेकि-
मिति नसकलंसर्वतःस्यादभीष्टं,
सर्वेषास्यादयत्नंकिमितिजडभवा-
नात्मघातेप्रवृत्तः॥२६॥नैकोर्थःसप्त-
धास्याद्भवति यदि भवेत्साप्तविध्यं
चतद्वज्जीवाजीवादयोर्थाःकिमिति
चनतथास्याज्जगच्चाव्यवस्थम्॥
संदेहःस्याद्विरोधादवधृतिरथनेव-

न्धमोक्षाव्यवस्था, सर्वो नैकान्त्यवादो-
गतवसनततो भाति मत्तप्रलापः॥ २७
एवं हैरण्यगर्भाद्युदितमपि जगत्कार-
णं नादराहैं, यस्मात्कस्य प्रसूतिः श्रुति-
भिरधिगता कूप्तमायुर्मितं च॥ ग्रस्य
ज्ञानादियोगं गमयति च यतो ब्रह्मतो
ब्रह्मवाणी, तस्माद्ब्रह्मैव मायाशबलि-
तमुचितं श्रौतमेकं निदानम्॥ २८॥
कश्चिद्दुःखी स्वजन्मप्रभृति सुखयुत-
श्चापरः कस्य हेतोः कस्मादाद्या प्रवृ-
त्तिस्तनुरपि च कुतः किं न वेत्ति प्रमी-
तः॥ स्वाभाव्यं हेतुसाम्ये समभिमति
विदितं दीपबीजाङ्कुरादौ, वैषम्यं
कर्मजन्यं यदि गदसि जनैः पूर्वमध्या-
त्मसिद्धिः॥ २९॥ मानं प्रत्यक्षमेकं य-
दि कथयकथं भाषितं ते प्रमाणं, स-
म्भाव्यार्थं सदोषं यदि तदपि वलो

किं न वेदो विदोषः॥ न ह्यध्यक्षं विना
क्षैर्नेच तव सुगमा मानताध्यक्षमात्रे
ज्ञानं नान्यस्य बोद्धुं प्रभवति च -
भवांस्तेन मिथ्याप्रलापी॥ ३०॥
गौरः स्थूलो युवाहं पटुरिति च तनावा-
त्मबुद्धिर्जनानां स्वाभाव्यादेव सिद्धे-
त्यधिगमय यदिदं निष्फलं दर्शनं ते॥
वेदद्वेषात्प्रवृत्तं यदिन्नतनतांद्वेष-
मूलं प्रमाणं देवान्भ्रष्टस्त्वमेकः कि-
मिति शठ परान् हन्त हन्तुं प्रवृत्तः॥
रतोरक्तप्रसूतं जडमशनचितं षड्-
विकारं त्वगस्थि स्नायुकव्यान्त्र-
मज्जारुधिरमयमतिस्वल्पमा-
ध्यामयाढ्यम्॥ प्राणायामे मृदा-
दिप्रतिममपि च विट्कीटभस्मा-
वशेषं देहं तं मूढ कस्मादहमिति
मनुषे केन वा वञ्चितोसि॥ ३२॥

स्वानामात्मत्ववादे प्रतिनियतगतौ स्वामिनानात्वदोषाद्देहोन्माथप्रसङ्गः समुदितविषये त्वन्धमूकाभियेरन् ॥ उक्तिर्दृष्टश्रुतानामपि च न घटते नापि संघो निरूप्यः स्वप्नद्रष्टेव नस्याच्चयनमरणयोर्निर्विशेषाङ्गयं स्यात् ॥ २२ ॥ प्राणो नात्माजडत्वादशनसिततया वृत्तिलाभात्सुषुप्तावेतस्मिन्संचरत्यप्यहमचल इति प्रत्ययादन्मयत्वात् ॥ स्रष्टास्वोत्क्रान्तये स्यामरणमपि धृतेर्जीवशंकाभिधेयस्तस्मादन्योऽस्ति तत्क्षन्स्वनिलयममुनादीप्तिमानेक हंसः ॥ २३ ॥ उद्भूतेः साधनत्वादशनमयतया शुद्ध्यशुद्धिप्रतीतेर्ह्रुत्वाङ्गन्धमुक्त्योस्तदनुतनुमृतेस्तन्मयत्वश्रुतेश्च ॥ जाग्रत्स्वप्नप्रशा-

न्तौ करणगणलये तत्प्रशान्तेः सुषुप्ते
स्थाने सुप्तिसौख्यस्मृतिभिरुपि-
मितं मानसं चापि नात्मा ॥ ३५ ॥
विज्ञानं स्थायि यत्तत्सममिह मनसा
किंच नानात्मतास्यान्नस्यानेकात्म-
कत्वात्तदभिमतिवशादात्मबन्ध-
श्रुतश्च ॥ सारथ्यं तस्य क्लृप्तं यदपि त-
नुरथे स्वात्मनो भोगमुक्त्योस्तस्मा-
दन्योस्य साक्षी तदुपहिततनुश्चिन्म-
योस्त्यन्तरात्मा ॥ ३६ ॥ एवात्मा चि-
त्स्वरूपो यदि सकलतनौ शैत्यबोधो
न ते स्यान्नावैधर्म्येस्य बोधः सकल
तनुगतग्राहकोन्यो गुणश्च ॥ वैधर्म्ये-
णो गुणश्चित् कथमखिलतनुम्
व्याप्नुयादाणवं वा सिद्धं केनात्मन-
स्ते श्रुतिभिरितिनयज्ञास्तदान-
न्त्यनिष्ठाः ॥ ३७ ॥ नैकः स्याच्चि-

ऽजड़ात्मा कथमथ विषयः स स्वयं
स्वस्य को ताऽवंशो योगस्तथात्मादि-
किमिति च जड़ता केन वा चेतनस्य ॥
कर्तृत्वं तस्य कीदृक् करणसमुदयं
सैष धत्ते कथं वा तत्त्वं जीवस्य देवा
प्रियपशुभिरिदं कर्मठैर्दुर्निरूपाम्
३८ ॥ जीवानां वैभवं चेत्तनुकृतिकर-
रणादृष्टसाधारणत्वान्नस्यांङ्गां-
गाव्यवस्था व्यतिकरमयते येन
सर्वैर्मनोपि ॥ नानात्म्यं चाप्रमाणं
गदसि यदि तनूपाधिभिस्त्वं व्य-
वस्थां सिद्धेऽसिद्धेपि भेदे यत इह
विफलाः कल्पनीया विशेषाः ॥
किञ्चात्मन्यनवयवेन सम्प्रयोगः
सम्भाव्यो निरवयवस्य मानसस्य ॥
न द्रव्यं निरवयवं न शाश्वतं वा तद्धर्मो
न च धिषणा यतो जड़ा स्यात् ॥ ४० ॥

अज्ञानं स्वमथ सुखं सुषुप्तमबुद्धं बुद्धस्त्वं
स्मरसि कथं स्वतो जडात्मा ॥ विज्ञानान्य-
यमयमित्यनेकसङ्ख्यान्यद्राक्षं चि-
रमिति केन वेत्त्यस्य साक्षी ॥ ४१ ॥ इच्छा-
देरुदयविनाशसन्ततीनामक्षाणाम-
सुमनसां धियश्च तस्मात् ॥ द्रष्टान्यो
स्त्यविपरिलुप्तदृक् सतत्वो निःसङ्गो
विहरति यः पुरत्रयेपि ॥ ४२ ॥ संशा-
न्ते रविशशिवह्निवाक्प्रकाशे निर्वा-
णे करणगणे निरस्तसङ्गः ॥ स्वज्योतिः
प्रकटितवासनामयार्थश्चिद्धातुः श्रु-
तिभिरुदीरितोन्तरात्मा ॥ ४३ ॥ बाह्या-
र्थान्करणगणेन तं च बुद्ध्या बुद्धिं यः
प्रथयति सन्ततं स्वभासा ॥ आत्मा सा-
वनधिगतः पराग्भिरोभिर्विज्ञेयस्त-
नुभवनान्तरप्रदीपः ॥ ४४ ॥ प्रेयान्यः
सदनधनात्मजप्रियादेर्यत्प्रेम्णा प्रिय-

मिति मन्यते पराचः॥ पारार्थ्यावधि-
रवधीरितेतरार्थ्यो विज्ञेयः सखलु सुखा-
ब्धिरन्तरात्मा॥४५॥ शुद्धोसावहमि-
दमित्युपाधिधर्मानध्यासादभिम-
नुते परस्परेण॥ वृद्ध्यादीनिवसलिल-
प्रभेदधर्मान्भ्रद्येम्बुप्रतिफलितेमृ-
षैव मोहात्॥४६॥ अज्ञोस्मीत्यनुभव-
नादनाद्यबोधश्चिन्निष्ठश्चितिवि-
षयस्तमोयथेन्दुम्॥ प्रच्छाद्यस्फु-
रति चितं चितैव भूयो विक्षिप्यभ्रम-
यति हन्त दुर्निरूपः॥४७॥ चिद्भाने
चितिरिवयाभिदेव भेदे निर्वाहे निजपर-
योः स्वतः समर्था॥ सम्भाव्येतरघटना-
पटीयसी सा समोहं जनयति विभ्रमेण
माया॥४८॥ अध्यासोनधिगतवस्तु
निह्यतस्मिँस्तद्बुद्धिः स्फुटमनुभूय-
ते प्रतीचि॥ अज्ञोहं गलितबलो नरो

दरिद्रो जीवेयुर्मम तनयाः कथं वर्तेति
॥४९॥ शुद्धो दृष्टः स्थिरोहं बुध इति
च तनावात्मधर्मान्युवाहं, स्थूलो गौ-
रोभिरूपः पटुरिति च निजे देहधर्मा-
न्निमीते ॥ अन्योन्याध्यस्ततसत्यानृ-
तवलितवपुर्लोहपिण्डं प्रविष्टो, व-
ह्निः कूटाभिघातानिव विविधभ-
वानर्थजातं प्रपन्नः ॥५०॥ दृष्टः प्र-
त्यक्पराचोर्विषयिविषययोर्भास्त-
मोवद्विरोधे, प्यध्यासोहं ममेति
स्फुटमिति सुधियां नास्त्यसम्भा-
वनात्र ॥ स्वप्नादौ गत्यभावाद्गगन-
मलिनिमाध्यासदृष्टेर्बुधानां, प-
श्वादीनां च साम्याद्व्यवहृतिरखि-
लाध्यासमूलेति सिद्धम् ॥५१॥
धर्माद्देवत्वमेति व्रजति पुनरधः पा-
तकैः स्थावरादीन्देहान्प्राप्य प्रण-

श्यन्क्कचिदपि लभते मानुषत्वं च
ताभ्याम्॥ कर्मज्ञानोभयेन व्रजति वि-
धिपदं मुच्यते कोपि तस्मिन् रागी
प्रत्येति भूयो जनिमिति विषमं वं-
भ्रमीतीह लोकः॥ ५२॥ दुःखं स्वर्गा-
त्प्रपाते वहुविधनरके गर्भवासेति-
दुःखं, निःस्वातन्त्र्याशनायग्रहग-
दरुदितैः शैशवे दुःखमेव॥ तारुण्ये-
ऽमर्षलोभव्यसनपरिभवोद्वेगदा-
रिद्र्यदुःखं, वार्द्धक्ये शोकमोहेन्द्रि-
यविलयगदैर्दुःखमन्तेति दुःखम्
५३॥ इत्थं यः कर्मवद्धो भ्रमति प-
रवशः प्राणभृज्जन्मसङ्घैर्दुःख-
स्यान्तं न वेत्ति स्मरति न च जनि-
व्रातमज्ञानयोगात्॥ तं सर्वानर्थमू-
लप्रशमनविधिना स्वात्मराज्ये-
भिषेक्तुं, तात्पर्येण प्रवृत्ताः श्रुतिशि-

खरगिरः सूत्रभाष्यादयश्च ॥ ५४ ॥
इति श्रीमत्स्वाराज्यसिद्धौ प्रथमं प्रकरणम्

॥ अथ ॥

॥ स्वाराज्यसिद्धेर्द्वितीयं प्रकरणम् ॥ २ ॥

हेतुत्वं लक्षणं यद्गदितमिदमुपादान
कर्तृत्वरूपं, ताटस्थ्यादास्पदं स्वं ग-
मयति परमं ब्रह्मशाखेव चन्द्रम् ॥
एवं लक्ष्यं च सच्चित्सुखवपुरखिल
द्वैतहीनं सुसूक्ष्मं, सत्यज्ञानादिम-
न्त्रोदितमखिलमनोवागतीतं गु-
हास्थम् ॥ १ ॥ कूटस्थं ब्रह्म विश्वं ज-
नयति न विना मायया सा च मि-
थ्या, तस्मिञ्छब्दप्रसिद्धेः परस
मधिगमान्निवृत्तिश्रुतेश्च ॥
सैवाविद्या मृषार्थाऽपि समधि
गताः कार्यदक्षाः प्रपञ्चस्तस्मान्मा-
यूरपिच्छच्छविरिव गहनो ब्रह्म

संविद्विवर्तः ॥ २ ॥ यस्माद्विश्वं स-
दुत्थं सदुपभृतमथो लीयते तत्र तस्मा-
त्सन्मात्रं नान्यदस्मान्मृद इव घटि-
कोदञ्चनादिर्विकारः ॥ सद्भेदे स्या-
दसत्त्वं सदथ यदि तदा नास्ति भेदः
कथंचिद्भेदाभेदौ विरुद्धौ नहि भ-
वति भिदाऽभिन्नवस्तुप्रतिष्ठा
॥ ३ ॥ भेदोऽभिन्ने प्रतीतो भवति
खलु मृषा चन्द्रनानात्मतावद्भिन्ने-
ऽभेदश्च तद्वत्प्रभवति हि ततो न
स्वतो वस्तुभेदः ॥ धर्मैर्भेदः प्रसि-
ध्येद्यदि भवति भिदा धर्मिणो
हन्त तेषां भेदेऽभेदेऽपि लोके न
खलु परिचिता धर्मधर्मिव्यव-
स्था ॥ ४ ॥ यच्चाभिन्नं स्वतस्तन्न
भवति परतो भेदभाङ्नान्यभेदा-
दन्योऽभिद्येत धर्मः कथमथ वि-

विद्या धर्म्यभेदादभिन्नाः॥ भेदो भिन्ना-
श्रयश्चेदधिकरणभिदा तेन चेदात्मनि-
ष्ठा, नो चेदन्योन्यनिष्ठा स्थितिर-
थवा तद्भिदादुर्निरूपा॥ ५॥ भेदोयं
भिन्नधर्मिप्रतिभटविषयज्ञानजज्ञान
वेद्यो, धर्म्याद्यैर्भेदसिद्धिः पुनरपि च त-
थेत्यापतेच्चानवस्था॥ भेदे धर्म्याद्यभेदे
वत भवति मृषा भेदबुद्धिर्विभेदे, प्रादुः-
ष्युः पूर्वदोषा न च गतिरपरा तेन
भेदो मृषैव॥ ६॥ द्रव्ये भेदस्य योगो
न भवति निरुपाख्यस्य भावस्वरूपो,
नाभावोन्यः समत्वादनुभयमिलनान्ना-
पि तत्तत्स्वरूपम्॥ भावाभावातिरिक्तं
न च किमपि तयोरस्ति सम्बन्धरूपं,
निःसम्बन्धेपि शुक्तौ रजतमिव मृषा
तेन भेदः प्रतीतः॥ ७॥ संयोगादेरयो-
गान्नहि भवति भिदा गोचरश्चेन्द्रि-

याणां,व्याप्तिर्नो सङ्गतायां न भवति स-
दृशी वाक्यतात्पर्यदूरा॥मानाभावो
न मानं न च पुनरपरं मानमस्यां तथा-
पि,प्रत्यक्षा स्वाप्नमायानगरमिव भ-
वेत्साधु सैषा मृषैव॥ ८ ॥ वाह्योर्थो
बुद्धिमात्रान्न भवति स भवन् गोचरः
स्यात्परेषामेकैकं न द्वयं चेदुभयमि-
ति मृषा तद्विशिष्टप्रथा च॥ द्वित्वादेः
संकरः स्यान्न खलु भवति ते प्रागभा-
वाद्यवस्था,नापेक्षाबुद्धिकॢप्तिः स-
कलमपि शनैर्योज्यमेतत्प्रथक्त्वे
॥ ९ ॥ कार्यं नान्यन्निदानात्पृथग-
नधिगमान्नह्युपादानहेत्वोर्वैलक्ष-
ण्यं तयात्वे न भवति समवायाद्य-
वस्थानुपेतात्॥ नो चेत्स्वर्णादिका-
र्ये द्विगुणगुरुतया मूल्यवृद्धिप्रसङ्गो,
वस्थाभेदाद्विभेदे स्थितिगतिभि-

दया भेदिनः स्युर्नराश्च॥ १०॥ पि-
ण्डावस्था घटत्वे मनसि विमृशतो
हेतुकार्यत्वधीः स्यान्मृन्मात्रं यद्वदेकं
स्फुटमभिमृशतो नैव हेतुर्न का-
र्यम्॥ तद्वन्मायिप्रपञ्चौ मनसि क-
लयतो ब्रह्म विश्वस्य हेतुः सन्मात्रं
त्वेकरूपं पटु परिमृशतो नैव मायो
न विश्वम्॥ ११॥ सन्कुम्भः सत्कुसूलं
सदखिलमिति यद्भाति यच्च श्रुतं
प्राक्, तत्सत्यं व्याप्य विश्वं घटपि-
ठरमुखं मृत्तिकेवावभाति॥ तस्मिन्
रज्जाविवाहिर्निखिलमपि जग-
त्कल्पितं तत्स्वभावात्, तन्मात्रं तत्प्र-
थक्त्वे ह्यसदिदमखिलं स्यात्त-
देवह्यभेदे॥ १२॥ एकैव ब्रह्मसत्ता
व्यवहृतिविषये शुक्तिरूप्यादिके
च, स्यान्नत्याद्ये सत्यमेतज्जगदिति

धियमाब्रह्मबोधाद्विधत्ते॥ यावत्स्फू-
र्त्ति द्वितीये प्रथितमिव पटस्फाटिके
रक्तरूपं, माञ्जिष्ठं साधुरक्तः पट इति
न मृषा स्फाटिके तन्मृषेति॥ १३॥
सच्चित्सौख्यैकरस्येप्यनृतजड़महा
दुःखमोहान्यभावात्सत्यज्ञानादि-
वाक्यव्यवहृतिविषये कल्पिते रूप
भेदे॥ शुक्तीदन्तेव सत्ता स्फुरति स-
मरसा कल्पितेनानुविद्धा, शुक्ति-
त्वादीव मायावरणपरिभवाच्चि-
त्सुखत्वेन भातः॥ १४॥ पृष्टे कोस्मि-
न्समाजे नरपतिरिति यो मत्तमात-
ङ्ग पृष्ठे, मुक्ताजालान्तराले शशिध-
वल लसच्छत्रमूले स्फुरन्सः॥ इत्यु-
क्तः पुंविशेषं सपदि परिचिनोत्येष
राजेति सर्वं, मुक्त्वैकं येन पश्यन्नमु-
मपरविधं सैष राजेति वेत्ति॥ १५॥

वर्णिता विविदिषादियन्त्रणात्पुंवि-
शेषमिव लक्षणोक्तयः ॥ विश्वसर्गवि-
षयागमाः परं लक्षयन्ति निरवद्यचि-
द्घनम् ॥१६॥ तत्त्वमर्थवदत्रयद्य-
पि नान्वयानुपपत्तिधीर्नाप्यभिन्न-
पदार्थकत्वमतः पदेषु न लक्षणा ॥
भेदसङ्गतिकानि तानि समेत्य स-
त्यचिदद्वयं तत्पराणि हि लक्षयेयु-
रुपक्रमाद्यनुसारतः ॥१७॥ स्रक्षजा-
दिवद्धिः प्रमाणसमेधितद्वयविभ्रमे
जाग्रति श्रुतिरद्वय[redacted]प्रतिबोधने
सहसाऽक्षमा ॥ व्यावहारिकवस्तुजा-
तमिदं मृषेति विवक्षया प्रक्रियां रच-
यांबभूव विसृष्टिसंहृतिलक्षणाम् ॥
१८॥ ब्रह्म सच्चिदनन्तमेकमशेषवा-
ङ्मनसातिगं पञ्चकोशगुहान्तरं च
निगद्यशश्वदलौकिकम् ॥ तद्धिसृज्य-

विवेश सत्यमसत्यमित्युभयं स्वतः
सत्यमित्यभिधायिनी श्रुतिरद्वयं
स्फुटमन्यथा न ॥१८॥ ब्रह्मवित्पर-
मेति तत्खलु सच्चिदद्वयलक्षणं वेद-
नं च गुहान्तरस्य निजस्वरूपतदाप्त-
ये॥ इत्युदीर्य सदद्वयत्वसमर्थनाय
समाददे विश्वसृष्टिमिमां श्रुतिर्न-
हि तत्समर्थनमन्यथा ॥२०॥ एक
एव पुरा बभूव न चापरं स किलाखि-
लं वीक्ष्य विश्वमिदं ससर्ज तनुं प्रवि-
श्य निरीक्षते॥ स्वप्नमावसथत्रयं
स विचारतः प्रतिबुद्धवान् स्वात्म-
नैव समस्तकाममवाप्नुवन्नमृतो-
भवत् ॥२१॥ स्थूलसूक्ष्मविभागि-
मूर्तममूर्तमित्यखिलं जगत् ब्रह्मणो
द्विविधं हि रूपमिति प्रकल्प्य वि-
भागतः॥ पादिशत्त्यथ नेति नेति

निश्चिध्यरूपमशेषतः काण्ववाजस-
नेयकश्रुतिरप्यशेषयदद्वयम्॥२२॥
यत्प्रबोधवशादशेषमिदं जगद्विदि-
तं भवेत्तद्धिवक्तुमुपक्रमोत्र सदेव सो-
म्यगिरा ततः॥ सृष्टिरीक्षणपूर्विका
जगतस्तदैक्यविवक्षया मृत्तिकादि-
निदर्शनानि तथाहि सङ्गतिमाप्नु-
युः॥२३॥ सत्प्रसूतमिदं सति स्थितम-
स्तमेति सति स्वतः सत्तया परिहीण-
मित्यखिलं सदेव पृथङ्मृषा॥ कल्पि-
तं हि पृथक् न सन्मृगतृष्णिकोदक-
वन्मरोस्ततस्सदद्वयमेव वस्त्विति सृ-
ष्टिवाक्यसमीहितम्॥२४॥ विद्यया
परयाधिगम्यमुदीर्य धर्मविवर्जितं
सूक्ष्ममक्षरतस्ततः प्रभवत्यशेषज-
गन्मृषा॥ तद्धि सत्यमिति स्फुटं परि-
शेष्यवेदनमात्रतस्तत्स्वयं भव-

तीति नित्यमवाप्तमाहुस्तुरीयगीः ॥
भूतभाविभवज्जगत्परमं च सत्
प्रणवात्मकं पादशः प्रविभज्य निह्नु-
तवाच्यवाचकभेदकम् ॥ पूर्वपूर्वम-
थोत्तरत्र विलाप्य तुर्यमलक्षणं स्वा-
त्मरूपमथर्वणः श्रुतिरभ्यधाच्चित्त-
वमद्वयम् ॥२६॥ इत्थमेव ततस्त-
तः श्रुतसृष्टिवाक्यकदम्बकं प्र-
क्रियाद्यभिशीलनेन सदद्वयेन
समानयेत् ॥ युक्तिभिः श्रुतिभिश्च
सैष तटस्थलक्षणसंग्रहः तत्फले
खलु लक्ष्यसत्त्वपरिच्छिदात्रय-
वारणे ॥२७॥ सच्चिदद्वयसौख्यरू-
पममुष्य वास्तवलक्षणं नानृतेऽस्फु-
रणेऽसुखे पुरुषार्थतेति तदात्मता ॥
वारणीयविद्याप्रकल्पितभेदल-
ब्धपदैः पदैर्नैकरस्यहृतिस्तथैव

हि साधुपूर्वमवादिषम् ॥२८॥ सत्य-
त्वं तस्य सौक्ष्म्यान्नभस इव जगन्नी-
त्लिमाधारभावादव्यावृत्तेरवृत्तेर-
खिलदृशितया सर्वबाधावधित्वा-
त् ॥ निस्सङ्गत्वाविरोधात्सकलग-
ततयात्मत्वतःसाक्षिभावादन्यद्र-
ष्टुर्निषेधात्स्फुटवचनशतैः स्वा-
नुभूत्या च सिद्धम् ॥२९॥ आत्मत्वा-
दीक्षितृत्वादखिलवशितया शा-
स्त्रयोनित्ववादात्कामाभिध्योप-
देशाच्छशितपनमुखद्योतिभारूप-
तोक्तेः ॥ साक्षादेवापरोक्षादसुकृत-
सुकृताध्यक्षसाक्षित्ववादात्सर्वज्ञ-
ज्ञादिशब्दात्स्फुटवचनशतैश्चापि
सच्चित्स्वभावम् ॥३०॥ सौख्योत्क-
र्षावधित्वान्निखिलसुखकणाम्भो-
निधित्वश्रुतिभ्यो मुक्तप्राप्यत्ववा-

दान्निरवधिपरमानन्दभूमात्मकत्वा-
त्॥ सर्वप्रत्यक्त्ववादान्निधिनिल-
यवधूसाम्यवादात्सुषुप्तावानन्दे
ब्रह्मतोक्तेरपि च रसतया तत्सदा-
नन्दरूपम्॥ ३१॥ सच्चित्सौख्यैकर-
स्यं निगदितमिह यद्ब्रह्मणो लक्षणं
तत्प्रत्यक्त्वेपि जैवे सममखिलदृशा-
स्तस्य बाधाद्ययोगात्॥ मुख्यप्रे-
मास्पदत्वादुपधिविभिदया वस्तु
भेदाद्यसिद्धेर्ब्रह्मांशत्वप्रवादान्ननु-
करणदृशः स्वप्रकाशत्वतश्च॥
स्वप्नार्थैर्बाध्यमानैरयमपि सह यद्बा-
ध्यमानो न दृष्टो, बाधद्रष्टा स्वयं
सन्कथमिव कलयेदात्मबाधं दृगा-
त्मा॥ दृग्भेदे यन्न मानं यदपि न च
समा दृग्दृशो गोचरो वा, यच्चासौ
निर्विकारस्तदयमनवधिः प्रत्यगा-

त्मा सदात्मा ॥ ३३ ॥ यद्भ्रान्त्यादिष्व-
वस्थास्वहमहमिति भात्येकरूपो
विभिन्नास्, वध्यक्षं जाग्रदर्थानिव
निजमहसा यच्च सुप्तोपि वेत्ति ॥ य-
च्चाहंङ्कारमोषेप्यपरिमुषितचित्-सु-
प्तिसौख्यादिसाक्षी, द्रष्टुर्दृष्टेरलोपे
श्रुतिरपितदसौ प्रत्यगात्मा दृगात्मा
३४ ॥ यच्चात्मान्यद्ब्रुवाणां प्रियमिति
तव तद्धोस्त्यतीति ब्रवीति, प्राज्ञेनै-
क्यं सुषुप्तौ निगदति च यदानन्द-
संविन्मयेन ॥ इच्छायत्स्वानुकूले
त्रिजगति विदिता स्वप्रतीपे जिहा-
सा, यच्च स्यां सर्वदेति स्पृहयन्ति
तदसौ प्रत्यगात्मा सुखात्मा ॥ ३५ ॥
इत्थं मीमांसमाने श्रुतिगुरुवचनैर्यु-
क्तिभिश्चानुभूत्या, शश्वज्जीवेशत-
त्त्वे निपुणमधिगते वस्तुनो लक्षणे-

क्ये॥ निष्प्रत्यूहं निजार्थं समधिगमयि-
तुं तत्त्वमस्यादिवाक्यान्, याद्यन्तावेक्ष-
णाद्यैरधिगततद्धृदयान्यज्ञसेवक्षमन्ते ॥
प्राक् सर्गाद्यत्सदासीदसृजदथ च यत्तेज-
आदि प्रविष्टं, जीवस्तस्मिन्यदासीद्य-
दखिलमनृतं नामरूपं वितेने॥ तत्स-
त्तच्छब्दवेद्यं त्वमिति निगदतः
श्वेतकेत्वाख्यजीवो, वाक्यार्थं नि-
त्यसिद्धं गमयदसिपदं वर्तमानं ब्र-
वीति॥ ३७॥ बाधाध्यासविशेषणै-
क्यविषयं नाम्नोश्च तुच्छा मतं, सामाना-
धिकरण्यमाद्यमिह न व्यर्थोद्यमो स्या-
त् श्रुतिः॥ ध्यानाद्यश्रवणादनित्य-
फलतादोषाच्च नाध्यासधीः, तादात्म्यं
न विरुद्धयोरिति बलाद्वस्त्वैकयप-
क्षस्थितिः॥ ३८॥ अभिधेयमत्र पद-
योरसङ्गतं न विरुद्धधर्मियुगमैक्य-

मेतियत्॥उपयोगमूलघटनाद्ययो-
गतो न परस्परार्थघटितेपिलक्षणा
॥३९॥न च गाङ्गतीरमिव वाच्य-
सङ्गिवा प्रथितं तृतीयमिह योग्यम-
न्वये॥पदयोर्न चैकतरभागल-
क्षणाध्यवसानलिङ्गमुपपद्यतेपि
वा॥४०॥न तु मानसिद्धमपरं परो-
पमं निजरूपमस्य न च भाविनो-
स्तिता॥श्रुतहानिरश्रुतगतिश्च
नोचितेत्युचिताद्वयोरपि हि भाग
लक्षणा॥४१॥अपहाय धर्मनिचयं
विरोधिनं तनुबुद्धिसाक्षिसदन-
न्तचिद्घनम्॥उपलक्ष्यसोयमि-
ति वाक्यवत्ततो घटयेदखण्डबि-
षये पदद्वयम्॥४२॥परोक्षानवा-
प्तत्वबुद्धिं परस्मिन्नपूर्णत्वदुःखि-
त्वमोहं प्रतीचि॥निहन्तुं निजा-

लौकिकं चात्मतत्त्वं पदे वक्तुमन्यो-
न्यतः साभिलाषे ॥४३॥ असंसर्गिस-
त्यार्थता स्यात्पदानामनन्यार्थता-
वाप्यखण्डार्थतात्र ॥ प्रसिद्धा ह्यसौ-
चन्द्रमात्रप्रबोधात्प्रकृष्टः प्रकाशः
शशीत्यादि वाक्ये ॥४४॥ प्रकर्षप्र-
काशत्वचन्द्रत्वयोगव्यवच्छेद-
भेदादयो नैव पृष्टाः ॥ न वा शाब्द-
धीरस्त्यजिज्ञासितेर्थे ततो वाक्य-
तश्चन्द्रमात्रप्रबोधः ॥४५॥ यः प्रा-
गिवसृज्य भुवनं तनुमाविवेश यः
पञ्चभूतसुरमानुषतिर्यगात्मा ॥
येनावलोकयति वक्त्यभिमन्यते
च प्रज्ञानमात्रविभवोहमसौ प-
रात्मा ॥४६॥ यद्व्याकृतं जगदभू-
त्तमसा नैखाग्राद्यच्च प्रविष्टतनु-
कृत्स्नमकृत्स्नमासीत् ॥ प्रेयस्तदे-

व परमं परमार्थतोहं ब्रह्मास्मि त-
द्धि दितवद्धि तदेवसर्वम् ॥४७॥ यश्चा-
यमत्र पुरुषे प्रयते गुहान्तर्यश्चा-
प्रमेयसुखभूः सवितुश्च विम्बे ॥ एक-
स्य इत्यभिदधुः स्फुटमैक्यमेके
तद्भेदनाच्च विलयं जगतश्च तत्र ॥ ॰
ऽप्रासीत्सदेव हि भवाननृतं विधाय
तेजोमुखं तदभिमत्य बभूव जीवः ॥
देहान्तशुङ्गमवधूय विलोकयस्वं
सद्ब्रह्म तत्त्वमसि बोधसुखाद्धितीयम् ॥४८॥ संपद्य यत्र मधुनीव रसाः
सुखुप्तौ सौख्यैकरस्यमधिगम्य
जना न विद्युः ॥ यत्प्रच्युताः पुनरमी
बहुदुःखभाजः सद्ब्रह्म तत्त्वमसि
नासि कदापि दुःखी ॥ ५० ॥ प्राब्धि-
र्यथा जलधरैरपनीय नीतो नद्या-
दिभावमुदधित्वमतिं जहौ स्वाम् ॥

एवं भवानुपधिभिः खलु विस्मृतः
स्वं सद्ब्रह्म तत्त्वमसि संस्मर पूर्ण-
भावं ॥५१॥ जीवप्रहीणतरुशोषवि-
शेषलिङ्गादात्मा परोऽस्ति तनुतः
स च नित्य एकः ॥ विद्धि तदात्म्य-
मखिलं वितथद्वितीयं सद्ब्रह्म त-
त्त्वमसि मुञ्च विभेदमोहम् ॥५२
धानान्तरुन्नततरोरुवटः पुरेव य-
स्मिन्निदं जगदवस्थितमाविरासी-
त् ॥ अद्धावता समधिगम्यमणो-
रणीयः सद्ब्रह्म तत्त्वमसि सत्यमस-
त्यमन्यत् ॥५३॥ अप्सु प्रलीनमिव
सैन्धव खिल्यमक्ष्णा पश्यन्ति
यन्न करणैरपि हृद्भिमातम् ॥ वि-
न्दन्ति यद्रसनयेव रसं गुरूक्त्या
सद्ब्रह्म तत्त्वमसि दृश्यमिदं तु न-
त्वम् ॥५४॥ चौरैरिवासि पुरुषो

विपिने विसृष्टो रागादिभिस्तनु-
षु नष्टविशुद्धदृष्टिः॥ पान्थैरिवै-
षगुरुणासि विमुक्तबन्धः सद्ब्र-
ह्म तत्त्वमसि याहि सुखं स्वधाम
॥५५॥ संपद्य यत्र करणादिल-
यक्रमेण मूढो मृतः पुनरुपैति ज-
निप्रबन्धम्॥ प्राज्ञस्तु वञ्चयति
मृत्युमुदस्तमोहः सद्ब्रह्म तत्त्वम-
सि निस्तरमृत्युबन्धम्॥५६॥
स्तेनप्रतप्तपरशोरिव दाहबन्धा-
वाप्नोति मूढमतिरप्यनृताभिस-
न्धः॥ सत्याभिसन्धिरथ न व्य-
थते यदात्मा सद्ब्रह्म तत्त्वमसि
निर्णुद बन्धशङ्काम्॥५७॥ पि-
त्रा सुतः सुवचनैरिति बोधितः
स्वं सत्याद्वितीयसुखबोधघनं
विजज्ञौ॥ स्तद्विमृश्य विदित्वा

द्वयदृक्परोपि स्वाराज्यसौख्य-
मधिगम्य भवेत्कृतार्थः॥५८॥ ऐ-
क्यं प्रकल्प्य प्रणवेऽखिलस्य पा-
दान्विभज्य प्रविलाप्य शिष्टः॥
एकः स ह्यात्मा जगदेऽयमात्मा ब्र-
ह्मेति विस्पष्टमथर्ववाण्या॥५९॥
नित्यं शुद्धं विबुद्धं विकृतिविरहि-
तं नित्यमुक्तस्वभावं सत्यं सूक्ष्मं
निरस्तद्वयमनवयवं पूर्णमानन्द-
रूपम्॥ प्रत्यग्ब्रह्माहमस्मि स्वर-
सदृशि रवौ ध्वान्तवद्विश्वमेत-
न्नासीदस्ति भविष्यत्यपि मयि
सुखसज्ज्योतिरात्मन्यसङ्गे॥६०
इत्थं वाक्याद्विमृष्टादरणिविम-
थनाद्वह्निकीलेव सद्यः संभूताख-
ण्डवृत्तिस्तृणमिव निखिलद्वैतजा-
लं समोहम्॥ दग्ध्वा निर्वाणसं-

ज्ञे निरतिशयसुखे नित्यसिद्धात्म-
तत्त्वे, सद्यो याति प्रणाशं कतकर-
ज इवोदस्य पङ्कं नलस्य ॥६१॥
एषाज्ञानादित्रितापज्वरविषमभव-
व्याधिसम्यक् चिकित्सा, ह्येषा
स्वाराज्यसंपन्निरवधिपरमानंद
संदोहदोग्ध्री ॥ भस्मीभूतं तयास्यां
प्रभवति न पुनः कर्मबीजं प्ररोढुं,
सन्देहग्रन्थिभेदावपि च निगदि-
तावेतदासादनेन ॥६२॥
इत्यपवादप्रकर्णं द्वितीयम् ॥

अथ ॥

स्वाराज्यसिद्धेर्द्वितीयं प्रकरणम् ॥
अपरोक्षवस्तुविषयेति शब्दजाप्यप-
रोक्षतां न विजहात्यखंडधीः ॥ निपु-
णं निशम्य दशमस्त्वमित्यदो व-
चनं न हि स्वमुपलब्धुमिच्छति ॥

द्वयदृक्परोपि स्वाराज्यसौख्य-
मधिगम्य भवेत्कृतार्थः ॥५८॥ ऐ-
क्यं प्रकल्प्य प्रणवेऽखिलस्य पा-
दान्विभज्य प्रविलाप्य शिष्टः ॥
एकः स आत्मा जगदेऽयमात्मा ब्र-
ह्मेति विस्पष्टमथर्ववाण्या ॥५९
नित्यं शुद्धं विबुद्धं विकृतिविरहि-
तं नित्यमुक्तस्वभावं सत्यं सूक्ष्मं
निरस्तद्वयमनवयवं पूर्णमानन्द-
रूपम् ॥ प्रत्यग्ब्रह्माहमस्मि स्वर-
सदृशि रवौ ध्वान्तवद्विभ्रमेत-
न्नासीदस्ति भविष्यत्यपि मयि
सुखसज्ज्योतिरात्मन्यसङ्गे ॥६०
इत्थं वाक्याद्विमृष्टादरणिविम-
थनाद्वह्निकीलेव सद्यः संभूताख-
ण्डवृत्तिस्तृणमिव निखिलद्वैतजा-
लं समोहम् ॥ दग्ध्वा निर्वाणसं-

द्धे निरतिशयसुखे नित्यसिद्धात्म-
तत्त्वे, सद्यो याति प्रणाशं कतकर-
ज इवोदस्य पङ्कं नलस्य ॥६१॥
तृषाज्ञादित्रितापज्वरविषमभव-
व्याधिसम्यक् चिकित्सा, ह्येषा
स्वाराज्यसंपन्निरवधिपरमानंद
संदोहदोग्ध्री॥ भस्मीभूतं तयास्यां
प्रभवति न पुनः कर्मबीजं प्ररोढुं,
सन्देहग्रन्थिभेदावपि च निगदि-
तावेतदासादनेन॥६२॥

इत्यपवादप्रकर्णं द्वितीयम्॥

अथ॥

स्वाराज्यसिद्धे र्द्वितीयं प्रकरणम्॥

अपरोक्षवस्तुविषयेति शब्दजाप्यप-
रोक्षतां न विजहात्यखंडधीः॥ निपु-
णं निशम्य दशमस्त्वमित्यदो व-
चनं न हि स्वमुपलब्धुमिच्छति॥

न च शब्दजन्यमतिमात्रतः स्व-
तोप्यपरोक्षवस्तु भजते परोक्षताम् ॥
न खलु प्रदीपतरणिप्रकाशयोः
प्रतिभासतोस्ति विषये पृथग्वि-
धा ॥२॥ अपरोक्षवस्तुविषया-
परोक्षधीर्न च मानभावमुपगन्तु
मर्हति ॥ स्वत एव शब्दवदभात
मात्मनः कुशलोपि न स्वमपि
गृहितुं क्षमः ॥३॥ सुखदुःखराग-
यतनेष्वसंमतेस्तिमिरप्रसुप्तिवि-
षयेष्वदर्शनात् ॥ अपिहेतुरस्य-
विषयस्य योग्यतोत्यपरोक्षता
न करणैर्नियम्यते ॥४॥ अपि चा
वृतार्थविषयापरोक्षधीर्वचसा च
भग्नमनुभूयते तमः ॥ उपदेशमा-
त्रमुपवर्ण्य तत्पुनः श्रुतिराह
दर्शयति पारमित्यपि ॥ ५ ॥

विदधाति यच्च परमात्मदृष्टये
श्रवणं विमृष्टनिगमान्तगोचरम्॥
श्रुतिमात्रतीर्णतमसो यदब्रुवन्
जनकोसि तारयसि पारमित्यपि
॥६॥ चैतन्यस्यापरोक्ष्यं स्वरस-
निजदृशो मुख्यमन्यानपेक्षं, गौ-
णं तद्गोचरेष्वावरणविरहिते
तत्र तादात्म्यवत्सु॥ वाह्ये चैत-
न्ययोगं घटयितुमुचिता वृत्ति-
रक्षप्रसूता, वाक्योत्या मोहमात्रं
विघटयति चितः स्फूर्तिरन्या-
नपेक्षा॥७॥ विषयाप्रबोधदल-
नाय संविदो विषयोपरागज-
ननायवाधियम॥ विषयाकृति-
त्वमुपनेतुमिष्यते विषयाश्रयो-
गसरणिस्तनोर्वहिः॥८॥ यत्रे-
क्ष्यं चक्षुराद्यैः प्रतिविषयममी

येन संधुक्षितार्थो, यद्वा गादेः
पदं न व्यवहरन्ति मुहुर्येन वागा-
दिवर्गः ॥ येन प्राणः प्रणीतस्त-
नुकरणमनो बुद्धयो येन चे-
ष्टास्तच्छुद्धं स्वेन सिद्धं निरुभय-
ममयं बोधसत्सौख्यमात्मा ॥ ९ ॥
इत्थं संबोधितस्याप्यनवहितम-
तेर्यस्य बोधो न वृत्तः, सस्याद्भू-
यो विचारव्यसनवशमनाः स-
त्सहायः स्वतन्त्रः ॥ प्रज्ञाविक्षे-
पशान्त्यै चपलमपि मनोलाल-
नैर्वा हठाद्वा, रुद्ध्वा ध्यायेदन-
न्तं परमसुखचिदात्मानमेकं
विविक्ते ॥ १० ॥ मुक्त्वा सङ्गं सहि-
ष्णुः शुचिहितमितभुक् योग-
शास्त्रार्थदर्शी, पुण्ये निर्दोषदेशे
यमनियमदृढः स्वासनस्थः

प्रसन्नः ॥ प्राणायामक्रमेणात्हतच-
पलमनः स्थूलसूक्ष्मे निरुध्य,
ध्यायन्नैकात्म्यसौख्यस्थिर-
गलितमना मोहबन्धं छिन-
त्ति ॥११॥ निरवधिसुखभूमा-
नन्तसंवित्परात्मन्यनुभवमधि-
रूढे वाक्यतो योगतो वा ॥
भवतु दृढसमाधिर्लोकसंग्रा-
हको वा, भजतु विषयजातं ने-
ति भूयोपि बन्धम् ॥ १२ ॥
अपि भूपरमाणुभूरिसङ्ख्येष्व-
पयातेषु चतुर्मुखेष्वलब्धात् ॥
अपदुःखनिरन्तसौख्यसिन्धो-
र्न चेलाभोस्ति परो निजात्म-
लाभात् ॥१३॥ मोहमात्रादल-
ब्धस्य लाभस्त्वसौ स्वात्मनः
कण्ठचामीकरन्यायतः ॥ बोध-

मात्रं तदाक्रम्य यस्मात् श्रुतिः
प्राह भूयः पदेनानुविन्देदिति
॥१४॥ बाधितं स्यादसद्द्वस्त-
वैधर्म्यतो मोहबाधोपि न द्वं-
सरूपो परः॥ बाधबुद्धिश्च नाभा-
वमात्रप्रथास्यादभावोप्यधि-
ष्ठानरूपोथवा ॥१५॥ कर्मजातं
समारब्धदेहेतरत्सत्वरं भस्मता-
मेति बोधाग्निना॥ श्लिष्यतेनै-
ष्यताप्येष बोधोज्ज्वलः क-
र्मणा जीवनेनेव पद्मच्छदः॥१६
चोरबाधेपि तज्जन्यभीत्या-
दिवच्चेलदाहेपि भस्मेव चेला-
कृतिः॥ ज्ञानिनां विश्वमादेह-
पातं स्वतो बाधितत्वेपि चार-
ब्धभोगाक्षमम् ॥१७॥ जीवतो
प्यस्यनह्यात्मबुद्धिस्तनौ बाम-

ल्रेप्यहेर्निर्विषयिन्यामिव ॥ मो-
हमात्रात्परे कल्पयन्त्यस्य चेद्दे
हितामस्तु तद्धानिरस्येह का
॥१८॥ ईशते ज्ञाततत्त्वस्य नाभू-
तये यत्नवन्तोपि सर्वेपि देवासु-
राः ॥ को हि नामात्मनोऽनिष्ट-
कारी भवेदात्मभूतो यतिस्त्वेष-
तेषामपि ॥१९॥ रागलोभप्रमा-
दादि दोषक्षयान्नायमासज्जते
दुश्चरित्रे क्वचित् ॥ साधुवत्सा
धुचारित्र्यरक्षापरः साधुमार्गे-
ण संस्कारतो वर्तते ॥२०॥ न प्रहृ-
ष्यत्यसौ प्राप्यभूयः प्रियं मेरु-
वन्निश्चलोभूरिकृच्छ्रेष्वपि ॥
भावयन्नात्मनात्मानमानन्दि-
तो देववत्संचरत्येव विश्वम्भ-
राम् ॥२१॥ केपि वर्णाश्रमाचार-

निष्ठापराग्मुग्धबालप्रमत्तोपमांश्चा-
परे॥ रागिणो भोगिनो योगिनश्चे-
तरे ज्ञानिनां लक्ष्यते नैकरूपा
स्थितिः॥२२॥ स्वानन्दे सहजे स-
दा विहरतां स्वच्छन्दलीलाजुषां,
निस्सङ्गा च निर्गला च जगतां
कल्याणसंदोहिनी॥ मत्स्यानां
सलिलेऽम्बरे च वयसां वायोरि-
वाशामुखे, दुर्लक्ष्ये पथि योगिनां
बहुविधा गूढा विचित्रा गतिः
॥२३॥ योगिध्येयपदाम्बुजस्त्रि-
जगतां नाथो हरिः स्वं स्वयं, शा-
न्तं नित्यमनुव्रजामि रजसा पूये-
यमित्यब्रवीत्॥ तस्माद्विश्वगुरोः
सुरासुरनरैरानम्य पादाम्बुजा,-
दात्मानन्दनिमग्ननिश्चलमतेर-
न्योऽत्र धन्योऽस्ति कः॥२४॥

सोयं पूर्णमनोरथोपि सहजात्कौ-
तूहलात्पर्यटन्नुर्वीं सर्वहिते रतः
प्रतिपदं स्वानन्दमास्वादयन् ॥
साश्चर्यं सकुतूहलं सकरुणं सा-
नन्दमुत्कण्ठया, धीरः पारमवाप्य
मोहजलधेरेवं मुहुर्गायति ॥२५॥
चिरान्मग्नेनान्तःप्रकृतिविषमे
जन्मजलधौ, मया पुण्यैर्लब्धो
गुरुरमृतचिन्तामणिरहो ॥ यदी-
याभिर्गोभिर्विशदमधुराभिर्वि-
तिमिरे, स्वसंपूर्णे यस्मान्निरवधि-
सुखे धामनिरमे ॥२६॥ यथापूर्वं
मायापरिकलितदृष्टिर्निजसुखं,
स्वयं भातं पश्यन्नपि न परिप-
श्यामि सहजम् ॥ तथेदानीं ज्ञाना-
ञ्जनविमलचक्षुर्जगदिदं, चिदा-
काशे पश्यन्नपि न परिपश्यामि-

निष्ठापरश्मुग्धबालप्रमत्तोपमाश्चा-
परे ॥ रागिणो भोगिनो योगिनश्चे-
तरे ज्ञानिनां लक्ष्यते नैकरूपा
स्थितिः ॥२२॥ स्वानन्दे सहजे स-
दा विहरतां स्वच्छन्दलीलाजुषां,
निस्सङ्गा च निर्गला च जगतां
कल्याणसंदोहिनी ॥ मत्स्यानां
सलिलेऽम्बरे च वयसां वायोरि-
वाशामुखे, दुर्लक्ष्ये पथियोगिनां
वहुविधा गूढा विचित्रा गतिः
॥२३॥ योगिध्येयपदाम्बुजस्त्रि-
जगतां नाथो हरिः स्वं स्वयं, शा-
न्तं नित्यमनुव्रजामि रजसा पूये-
यमित्यब्रवीत् ॥ तस्माद्विश्वगुरोः
सुरासुरनरैरानम्य पादाम्बुजा,-
दात्मानन्दनिमग्ननिश्चलमतेर-
न्योत्र धन्योस्ति कः ॥२४॥

सोयं पूर्णमनोरथोपि सहजात्कौ-
तूहलात्पर्यटन्नुर्वीं सर्वहिते रतः
प्रतिपदं स्वानन्दमास्वादयन् ॥
साश्चर्यं सकुतूहलं सकरुणं सा-
नन्दमुत्कण्ठया, धीरः पारमवाप्य
मोहजलधेरेवं मुहुर्गायति ॥२५॥
चिरान्मग्नेनान्तःप्रकृतिविषमे
जन्मजलधौ, मया पुण्यैर्लब्धो
गुरुरमृतचिन्तामणिरहो ॥ यदी-
याभिर्गोभिर्विशदमधुराभिर्वि-
तिमिरे, स्वसंपूर्णे यस्मान्निरवधि-
सुखे धामनिरमे ॥२६॥ यथापूर्वं
मायापरिकलितदृष्टिर्निजसुखं,
स्वयं भातं पश्यन्नपि न परिप-
श्यामि सहजम् ॥ तथेदानीं ज्ञाना-
ञ्जनविमलचक्षुर्जगदिदं, चिदा-
काशे पश्यन्नपि न परिपश्यामि-

निष्ठापरम्मुग्धबालप्रमत्तोपमांश्चा-
परे॥ रागिणो भोगिनो योगिनश्चे-
तरे ज्ञानिनां लक्ष्यते नैकरूपा
स्थितिः॥२२॥ स्वानन्दे सहजे स-
दा विहरतां स्वच्छन्दलीलाजुषां,
निस्सङ्गा च निर्गला च जगतां
कल्याणसंदोहिनी॥ मत्स्यानां
सलिलेऽम्बरे च वयसां वायोरि-
वाशामुखे, दुर्लक्ष्ये पथियोगिनां
वहुविधा गूढा विचित्रा गतिः
॥२३॥ योगिध्येयपदाम्बुजस्त्रि-
जगतां नाथो हरिः स्वं स्वयं, शा-
न्तं नित्यमनुव्रजामि रजसा पूये-
यमित्यब्रवीत्॥ तस्माद्विश्वगुरोः
सुरासुरनरैरानम्य पादाम्बुजा,-
दात्मानन्दनिमग्ननिश्चलमतेर-
न्योत्र धन्योस्ति कः॥२४॥

सोयं पूर्णमनोरथोपि सहजात्को-
तूहलात्पर्यटन्नुर्वीं सर्वहिते रतः
प्रतिपदं स्वानन्दमास्वादयन्॥
साश्चर्यं सकुतूहलं सकरुणं सा-
नन्दमुत्कण्ठया, धीरः पारमवाप्य
मोहजलधेरेवं मुहुर्गायति॥२५॥
चिरान्मग्नेनान्तःप्रकृतिविषमे
जन्मजलधौ, मया पुण्यैर्लब्धो
गुरुरमृतचिन्तामणिरहो॥ यदी-
याभिर्गोभिर्विशदमधुराभिर्वि-
तिमिरे, स्वसंपूर्णे यस्मान्निरवधि-
सुखे धामनिरमे॥२६॥ यथापूर्वं
मायापरिकलितदृष्टिर्निजसुखं,
स्वयं भातं पश्यन्नपि न परिप-
श्यामि सहजम्॥ तथेदानीं ज्ञाना-
ञ्जनविमलचक्षुर्जगदिदं, चिदा-
काशे पश्यन्नपि न परिपश्यामि-

निष्ठापरामुग्धबालप्रसन्नोपमाख्या-
परे ॥ रागिणो भोगिनो योगिनश्चे-
तरे ज्ञानिनां लक्ष्यते नैकरूपा
स्थितिः ॥२२॥ स्वानन्दे सहजे स-
दा विहरतां स्वच्छन्दलीलाजुषां,
निस्सङ्गा च निर्गला च जगतां
कल्याणसंदोहिनी ॥ मत्स्यानां
सलिलेऽम्बरे च वयसां वायोरि-
वाशामुखे, दुर्लक्ष्ये पथियोगिनां
वहुविधा गूढा विचित्रा गतिः
॥२३॥ योगिध्येयपदाम्बुजस्त्रि-
जगतां नाथो हरिः स्वं स्वयं, शा-
न्तं नित्यमनुव्रजामि रजसा पूये-
यमित्यब्रवीत् ॥ तस्माद्विश्वगुरोः
सुरासुरनरैरानम्य पादाम्बुजा,-
दात्मानन्दनिमग्ननिश्चलमतेर-
न्योत्र धन्योस्ति कः ॥२४॥

सोयं पूर्णमनोरथोपि सहजात्कौ-
तूहलात्पर्यटन्नुर्वीं सर्वहिते रतः
प्रतिपदं स्वानन्दमास्वादयन् ॥
साश्चर्यं सकुतूहलं सकरुणं सा-
नन्दमुत्कण्ठया, धीरः पारमवाप्य
मोहजलधेरेवं मुहुर्गायति ॥२५॥
चिरान्मग्नेनान्तःप्रकृतिविषमे
जन्मजलधौ, मया पुण्यैर्लब्धो
गुरुरमृतचिन्तामणिरहो ॥ यदी-
याभिर्गोभिर्विशदमधुराभिर्वि-
तिमिरे, स्वसंपूर्णे यस्मान्निरवधि-
सुखे धामनिरमे ॥२६॥ यथापूर्वं
मायापरिकलितदृष्टिर्निजसुखं,
स्वयं भातं पश्यन्नपि न परिप-
श्यामि सहजम् ॥ तथेदानीं ज्ञाना-
ञ्जनविमलचक्षुर्जगदिदं, चिदा-
काशे पश्यन्नपि न परिपश्यामि-

वितथम् ॥२७॥ न वेद्यो नावेद्यः
स्वरसमतिहृद्यः सुखघनो, न गद्यो
नापोद्यो न पुनरुपरोध्यः कथम-
पि ॥ न हेयो नादेयो न पुनरपिधेयः
क्षणमहो, स्फुरन्नात्मास्माकं जग-
दिदमकस्मात्तिरयति ॥२८॥ कि-
मस्तं किं ध्वस्तं किमु विलुलितं
किन्नु गलितं, विशीर्णं चागीर्णं
ननु सपदि जीर्णं किमथवा ॥ प्र
मन्दे स्वच्छन्दे निरुपमनिजा-
नन्दजलधौ, मयि स्वान्ते शान्ते
जगदिदमशेषं न कलये ॥२९॥
कथमिदमभवत्कथन्नु तिष्ठत्य-
थ कथमेति लयं प्रतीचि विश्व-
म् ॥ विमलदृशि निजे निरस्त-
सङ्गे यदुपरिमृश्य मृषेति निर्वृतो-
स्मि ॥३०॥ निराधाराकारं नि-

रवयवसंस्थानमचलं, निरीहं नि-
र्द्वंद्वं निरुपमनिजानन्दविभव-
स् ॥ विनोपायं स्वीयं करणस-
मुदायं च परमं कथं तन्निर्मायं
त्रिभुवननिकायं रचयति ॥३१
न भृत्या नामात्या न खलु वि-
षया नैव च बिना न चाशून्याः
कोशा नच पुरनिवेशा न सुहृ-
दः ॥ तथाप्यात्मैकाकी निजब-
लवराकीमरिचमूं विजित्यैत-
द्विश्वं भुवनमवतीत्यद्भुतमि-
दम् ॥३२॥ असङ्गोदासीनः स्वरस-
परमानन्दसुहितो, जिघत्सानिर्मु-
क्तश्चितितनुरपाण्यङ्घ्रिजठरः ॥
असमायोप्यात्मासौ स्वयमनवका-
शोऽपि सहसा, समायं त्रैलोक्यं
कवलयति कस्मात्कथमहो ॥

मुहुर्मूढैर्न्यस्तं भृशमपलपाम्य-
र्थनिचयं, न कश्चिद्विश्वास्यो न
मम यमदण्डादपि भयम् ॥ गुणद्वे-
षी स्वार्थप्रिय इति जगद्वञ्चनपरं,
चरित्रं मे चित्रं क्वचिदपि न क-
श्चित्कलयति ॥ ३४ ॥ न तातो नो
माता सुहृदपि न मे धामनि धनं,
न चान्नं पानं वा न सततगति-
र्नाम्बरमपि ॥ चरन्तं कृत्स्नं मा-
महह नहि लोकोऽपि विमृशत्यहो
मे दौर्गत्यं तदपि सुखसाम्राज्य-
मतुलम् ॥ ३५ ॥ यद्विश्वं यदवि-
श्वं यद्बहिरन्तश्च नो बहिर्नान्तः ॥
यद्भवपारमपारं तदनहमहम[illegible]-
स्मि विस्मितः स्वेन ॥ ३६ ॥ न स-
त्यो मे लोको न खलु पुनरोकः
सरसिजं, रजःसङ्गो दूरे न मयि

विधिशब्दः प्रभवति ॥ न वाग्भिः
संसर्गो न च विषमसर्गव्यसनिता,
तथापि ब्रह्माहं निगमनिकुरम्बं
वदति तत् ॥ ३७ ॥ अहं न मायी न च
भोगिशायी न चक्रधारी न दशा-
वतारी ॥ न मे प्रपञ्चः परिपालनी-
यस्तथापि विष्णुः प्रभविष्णुरस्मि
॥ ३८ ॥ न मूर्तयोष्टौ विषमा न
दृष्टिर्न भूतिलेपो न गतिर्वृषेण ॥
न भोगिसङ्गो न च कामभङ्गस्त-
थापि साक्षात्परमशिवोहम्
॥ ३९ ॥ जाग्रत्सुप्तिस्वपनविपिने-
गाहमानोप्यसङ्गः, सत्वोत्कर्षात्क-
रणहरिणैर्नेक्षणीयः पराग्भिः ॥
लीलावृत्तिप्रशमितमहामोहम-
त्तेभजालः, कालातीते विलस-
ति पदे वात्मकण्ठीरवो नः ॥ ४० ॥


इत्यादिभिर्भुवनजाड्यहरैः सु-
गोभिः, सत्योज्ज्वलैः श्रुतिसु-
खैरमृतप्रबोधैः ॥ आनन्दयन्प्र-
तिपदं प्रणतान्सभाग्यानाशाः
पवित्रयति भानुरिव प्रबुद्धः ॥
धन्यः स एव कृतकृत्यतमः
समस्त,मान्यः स एव कुलम-
स्य च धन्यधन्यम् ॥ संन्यस्य
कर्मनिगडं श्रुतिसारसौख्ये
विन्यस्य चित्तमभयात्मनि
निर्वृतो यः ॥ ४२ ॥ एवं विहृत्य
सुचिरं परिपूर्णकामः, कारुण्य-
पूरपतितोद्धरणप्रवीणः ॥ प्रार-
ब्धशेष विगमे गतसर्वशोकः
स्वाराज्यसौख्यजलधिर्निरु
पाधिरास्ते ॥ ४३ ॥ नोदेति ना-

स्तमुपयाति न वृद्धिमेति, नापि-
क्षयं च भजते निजतेजसेद्धः॥
पूर्णस्सदैव सहजेन सुखामृतेन,
निर्लाञ्छनः स्फुरति कोपि नि-
जात्मचन्द्रः॥४४॥ विश्वानन्द
तुषारसिन्धुरखिलज्ञानस्फुलि-
ङ्गानलः, प्रच्छन्नासिलता च
कोशकुहरे द्वैतभ्रमच्छेदिनी,॥
मोहध्वान्तविभाकरः परिलस-
न्वेदान्तसीमन्तिनी, मौलिस्था-
नमणिः सदा विजयते संविन्म-
यः पूरुषः॥४५॥ शान्त्यादिदि-
व्यमणिभूषणमण्डितानां, वेदा-
न्तवारिधिसुधारसलालसा-
नाम्॥ कैवल्यकल्पतरुमूलमु-
पाश्रितानां, स्वाराज्यसिद्धिरि-
यमस्तु मुदे बुधानाम्॥४६॥

वाक्यपुष्पाञ्जलिः सेयं, भक्त्या
न्यस्ता पदाब्जयोः॥ धियः प्रे-
रकयोरस्तु, शिवयोः प्रीतिसि-
द्धये॥ ४८॥ ॥ ॥ ॥

॥ इति श्रीमत्स्वाराज्यसिद्धौ॥
॥ तृतीयं प्रकरणम्॥
॥ समाप्ता चेयं स्वाराज्यसिद्धौ॥
॥ इति॥





ॐ

श्री॥ नैष्कर्म्यसिद्धिर्नामवेदान्तप्रकरणं प्रथमोऽ
ध्यायः ॥ आब्रह्मस्तम्बपर्यन्तैः सर्वप्राणिभिः सर्व
प्रकारस्यापिदुःखस्य स्वरसत एवजिहासितत्वा
त्तन्निवृत्त्यर्था प्रवृत्तिरस्तिस्वरसत एव॥ दुःखस्य
चदेहोपादानैकहेतुत्वा, द्देहस्य च पूर्वोपचित धर्मा
धर्ममूलत्वादनुच्छित्तिः। तयोश्च विहित प्रतिषि-
द्धकर्ममूलत्वादनिवृत्तिः॥ कर्मणश्च रागद्वेषास्प
दत्वाद्रागद्वेषयोश्च शोभनाऽशोभनाध्यासनि-
बन्धनत्वा, दध्यासस्यचाविचारितसिद्धद्वैतव
स्तुनिमित्तत्वात्। द्वैतस्यच शुक्तिकारजतादिव-
त्सर्वस्यापि स्वतःसिद्धाद्वितीयात्मानवबोधमा-
त्रोपादानत्वादव्यावृत्ति, रतःसर्वानर्थहेतुरात्मा-
नवबोध एव॥ सुखस्य चानागमापायिनो ऽपर
तन्त्रस्याऽऽत्मस्वभावत्वात्तस्यानवबोधः पिधा-
न, मतस्तस्यात्यन्तोच्छित्तावशेषपुरुषार्थपरि
समाप्तिः। अज्ञाननिवृत्तेश्च सम्यग्ज्ञानस्वरूपलाभ
मात्रहेतुत्वात्तदुपादानम्॥ अशेषानर्थहेत्वात्मा-

नवबोधविषयस्य चाऽनागमिकप्रत्यक्षादिलौकिकप्रमाणाविषयत्वाद्वेदान्तागमवाक्यादेवसम्यग्ज्ञानमतोऽशेषवेदान्तसारसंग्रहप्रकरणमिदमारभ्यते ॥ तत्राभिलषितार्थप्रचयायप्रकरणार्थसंसूत्रणायचायमाद्यश्लोकः ॥ ——

खानिलाग्न्यब्धरित्र्यन्तं स्रक्फणीवोद्गतं यतः ॥ ध्वान्तच्छिदे नमस्तस्मै हरये बुद्धिसाक्षिणे ॥ १ ॥

स्वसंप्रदायस्य चोदितप्रमाणपूर्वकत्वज्ञापनाय विशिष्टगुणसंबन्धसंकीर्तनपूर्विका गुरोर्नमस्कारक्रिया — ॥ —

उपलब्ध्वाऽतिशयं यस्माद्व्यावृत्तास्तमबादयः ॥ गरीयसे नमस्तस्मा अविद्याग्रन्थिभेदिने ॥ २ ॥

नमस्कारनिमित्तस्वाशयाविष्करणार्थः —

वेदान्तोदरसंगूढं संसारोत्सारिवस्तु गम्

ज्ञानं व्याकृतमप्यन्यैर्वक्ष्ये गुर्वनुशिक्षया॥३॥

किंविषयं प्रकरणमिति चेत्तदुपन्यासः—

यत्सिद्धाविदमः सिद्धिर्यदसिद्धौ न किंचन॥
प्रत्यग्धर्मैकनिष्ठस्य याथात्म्यं वक्ष्यते-
स्फुटम्॥४॥

विवक्षितप्रकरणार्थप्ररोचनायानुक्तमुक्ताऽप्रामाण्यकारणशङ्काव्युदासेन स्वगुरोः प्रामाण्योपवर्णनम्—

गुरूक्तो वेदराद्धान्तस्तत्र नो वचम्यशक्तितः॥ सहस्रकिरणव्याप्ते खद्योतः-
किं प्रकाशयेत्॥५॥

गुरुणैव वेदार्थस्य परिसमापितत्वात्प्रकरणोक्तौ ख्यात्याद्यप्रामाण्यकारणाऽऽशङ्केति चेत्तद्व्युदासार्थमुपन्यासः—

न ख्यातिलाभपूजार्थं ग्रन्थोऽस्माभिरुदीर्यते॥ स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषाश्मसु॥६॥

अनर्थाऽनर्थहेतुपुरुषार्थतद्धेतुप्रकरणार्थ*संग्रह
ख्यापनायोपन्यासः——

एकात्म्याऽप्रतिपत्तिर्यास्वात्मानुभव
संश्रया॥ साऽविद्यासंसृतेर्बीजंतन्नाशो
मुक्तिरात्मनः॥७॥

पुरुषार्थहेतोरवशिष्टत्वात्तदभिव्याहारः——

वेदावसानवाक्योत्थसम्यग्ज्ञानांऽऽशु
शुक्षणिः*॥ दन्दहीत्यात्मनोमोहंनक-
र्माप्रतिकूलतः॥८॥

प्रतिज्ञातार्थसंशुद्ध्यर्थंपूर्वपक्षोक्तिः। तत्रज्ञानम-
भ्युपगम्यैवतावदुपन्यासः——

मुक्तेः क्रियाभिःसिद्धत्वाद् ज्ञानंतत्र-
करोतिकिम्॥ कथंचेच्छृणुतत्सर्वंप्र-
णिधायमनोयया॥९॥अकुर्वतःक्रि-
याःकाम्यानिषिद्धास्त्यजतस्तथा॥
नित्यंनैमित्तिकंकर्मविधिवच्चानुति
ष्ठतः॥१०॥

किमतो भवति —

काम्या कर्मफलं तस्माद्देवादीमं न ढौ-
कते ॥ निषिद्धस्य निरस्तत्वान्नारकीं
नैत्यधोजनिम् ॥११॥

देहारम्भकयोश्च धर्माधर्मयोर्ज्ञानिनां सह कर्मिणः समानौ चोद्यपरिहारौ —

वर्तमानमिदं याभ्यां शरीरं सुखदुःखद-
म् ॥ प्रारब्धं पुण्यपापाभ्यां भोगादेवत-
योः क्षयः ॥१२॥

काम्यप्रतिषिद्धकर्मफलत्वात्संसारस्य तन्निरासेनैवाशेषानर्थनिरासस्य सिद्धत्वात् किं नित्यानुष्ठानेनेति चेत्तन्न । तदकरणादप्यनर्थप्रसक्तेः —

नित्यानुष्ठानतश्चैनं प्रत्यवायो न संस्पृ-
शेत् ॥ अनादृत्यात्मविज्ञानमतः कर्मा-
णि संश्रयेत् ॥१३॥

अभ्युपेत्यैव मुच्यते न तु यथावस्थितात्मवस्तुविषयं ज्ञानमस्ति, तत्प्रतिपादकप्रमाणाभावात् —

यावन्त्यश्चेह विद्यन्ते श्रुतयः स्मृतिभिः सह ॥ विदधत्युरुयत्नेन कर्मातो भूरिसाधनम् ॥१४॥

स्यात्प्रमाणासंभवो भवदपराधादिति चेत्तन्न। यतः——

यत्नतो वीक्षमाणोऽपि विधिं ज्ञानस्य नक्कचित् ॥ श्रुतौ स्मृतौ वा पश्यामि विश्वासो नान्यतोऽस्ति नः ॥१५॥

स्यात्प्रवृत्तिरन्तरेणापि विधिं लोकव*दिति चेत्तन्न। यतः——

अन्तरेण विधिं मोहाद्यः कुर्यात्सांपरायिकम् ॥ न तत्स्यादुपकाराय भस्मनीव हुतं हविः ✝ ॥१६॥

अभ्युपगतप्रामाण्यवेदार्थविज्जैमिन्यनुशासनाच्च ——

आम्नायस्य क्रियार्थत्वादानर्थक्यमितोऽन्यथा ॥ इति साटोपमाहोच्चैर्वेद-

विज्ञेभिर्निःस्वयम् ॥१७॥

मन्त्रवर्णाच्च ——

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥
इति मन्त्रोऽपि निःशेषं कर्मण्यायुरवासृजत् ॥१८॥

ज्ञानिनश्च वस्तुनिवाक्यप्रामाण्याभ्युपगमाद्वाक्यस्य च क्रियापदप्रधानत्वात्तदभिप्रेतज्ञानाभावः ——

विरहय्य क्रियां नैव संहन्यन्ते पदान्यपि ॥
न समस्त्यपदं वाक्यं यत्स्याद्ज्ञानविधायकम् ॥१९॥

ज्ञानाभ्युपगमेऽपि न दोषो यतः ——

कर्मणोऽङ्गाङ्गिभावेन स्वप्रधानतयाऽथवा ॥ संबन्धस्येह संसिद्धेर्ज्ञाने सत्यप्यदोषतः ॥२०॥

यस्माद् ज्ञानाभ्युपगमाऽनभ्युपगमेऽपि * नज्ञानान्मुक्तिः ——

अतः सर्वाश्रमाणां हि वाङ्मनःकायकर्म-
भिः॥ स्वनुष्ठितैर्यथाशक्ति मुक्तिः स्यान्ना-
न्यसाधनात्॥२१॥

असदर्थप्रलापोऽयमिति दूषणसंभावनायाह*—

इति हृष्टधियां वाचः स्वप्रज्ञाधमातचे-
तसाम्॥ घुष्यन्ते यज्ञशालासु धूमान-
द्धधियां किल॥२२॥

दूषणोपक्रमावधिज्ञापनायाह——

अत्राभिदध्महे दोषान्क्रमशो न्यायबृं-
हितैः॥ वचोभिः पूर्वपक्षोक्तिघातिभि-
र्नातिसंभ्रमात्॥२३॥

चतुर्विधस्यापि कर्मकार्यस्य मुक्तावसंभवान्मु-
क्तेर्न कर्मकार्यत्वम्——

अज्ञानहानमात्रत्वान्मुक्तेः कर्म न साध-
नम्॥ कर्मापमार्ष्टि नाज्ञानं तमसीवो-
त्थितं तमः॥२४॥

कर्मकार्यत्वाभ्युपगमेऽपि दोष एव——

एकेन वा भवेन्मुक्तिर्यदि वा सर्वकर्मभिः ॥ प्रत्येकं चेद्वृथाऽन्यानि सर्वेभ्योऽप्येककर्मता ॥२५॥

सर्वप्रकारस्यापि कर्मण उत्पत्तित एव विशिष्टसाध्याभिसंबन्धान्न पारिशेष्यसिद्धिः—

दुरितक्षपणार्थत्वान्न नित्यं स्याद्विमुक्तये ॥ स्वर्गादिफलसंबन्धात्काम्यं कर्म तथैव न ॥२६॥

प्रमाणाऽसंभवाच्च—

साध्यसाधनभावोऽयं वचनात्पारलौकिकः ॥ नाम्नोऽपि मोक्षदं कर्म श्रुतेर्वाक्यात्कथंचन ॥२७॥

अभ्युपगताऽभ्युपगमाच्च स्वश्रूनिरोधोक्तिवद्भवतो निष्प्रयोजनः प्रलापः—

निषिद्धकाम्ययोस्त्यागस्त्वयाऽपीष्टो यथा मया ॥ नित्यस्याफलवत्त्वाच्च न मोक्षः कर्मसाधनः ॥२८॥

एवं ताव"न्मुक्तेः क्रियाभिः सिद्धत्वा"दिति निर-
स्तोऽयं पक्षोऽथाधुना सर्वकर्मप्रवृत्तिहेतुनिरूप-
णेन यथावस्थितात्मवस्तुविषयकेवलज्ञानमा-
त्रादेव सकलसंसारानर्थनिवृत्तिरितीमं पक्षं द्र-
ढयितुकामस्साह —— इह चेदं परीक्ष्यते, 'किं
यथा प्रतिषिद्धेषु यादृच्छिकेषु च कर्मसु स्वाभावि-
कस्वाशयोत्थनिमित्तवशादेवेदं हितमिदमहित-
मिति परिकल्प्य मृगतृष्णिकोदकपिपासुरिव
लौकिकप्रमाणसिद्धान्येव च साधनान्युपा-
दायेष्टप्राप्तयेऽहितनिवृत्तये च स्वयमेव प्रवर्तते
निवर्तते च, तथैवाऽदृष्टार्थेषु काम्येषु नित्येषु
च कर्मसु, किं वाऽन्यदेव तत्र प्रवृत्तिनिवृत्तिनिमि-
त्त'मिति। किं चातो यद्येवं शृणु। यदि तावद्यथा-
वस्थितवस्तु * सम्यग्ज्ञानं प्रमाणभूतमागमि-
कं लौकिकं वा † प्रवृत्तिनिमित्तमिति निश्चयो,
निवृत्तिशास्त्रं च नाभ्युपगम्यते तदाहताः कर्म-
त्यागिनो, भ्रान्तिविज्ञानमात्रावष्टम्भा, दत्तौ

किकप्रमाणोपात्तकर्मानुष्ठानत्यागित्वाच्च ।
अथ मृगतृष्णिकोदकपिपासुप्रवृत्तिनिमित्तवद-
यथावस्तु * भ्रान्तिविज्ञानमेव सर्वप्रवृत्तिनिमि-
त्तं, तदावर्द्धामहे वयं, हताः स्थ यूयमिति——

हितं संप्रेप्सतां मोहादहितं च जिहासता-
म् ॥ उपायान्प्राप्तिहानाथीन शास्त्रं भा-
सयते * ऽर्कवत् ॥२८॥

एवं तावत्प्रत्यक्षानुमानागमप्रमाणावष्टम्भादे-
वात्मनो निरतिशयसुखहिताव्यतिरेकसिद्धेः, र-
हितस्य च षष्ठगोचरवत्स्वत एवानभिसंबन्धा-
द्, एवं स्वाभाव्यात्मानवबोधमात्रादेव हितं
मे स्यादहितं मे मा भूदिति मिथ्याज्ञानं तूषरशु-
क्तिकानवबोधोत्थमिथ्याज्ञानवत्प्रवृत्तिनिमि-
त्तमित्यवधारितम् । शास्त्रं च न पदार्थशङ्क्या-
ऽऽधानकृदित्येतस्यैवोत्तरत्र प्रपञ्चः प्रारभ्यते——

न परीप्सां जिहासां वा पुंसः शास्त्रं-
करोति हि ॥ निजे एव तु ते यस्मात्

पश्चादावपिदर्शनात्॥३०॥

उक्तंतावदनवबुद्धवस्तुयाथात्म्यएवविधिप्रतिषेधशास्त्रेष्वधिक्रियतइति। अथाधुनाविषयस्वभावानुरोधेनप्रवृत्त्यसंभवंवक्तुकाममाह

लिप्सतेऽज्ञानतोलब्धंकण्ठेचामीकरंयथा॥ वर्जितंचस्वतोभ्रान्त्याचछायायामात्मनोयथा॥३१॥ भयान्मोहाद्वनद्धात्मारक्षःपरिजिहीर्षति॥ यच्चाऽपरिहृतंवस्तुतथाऽलब्धंचलिप्सते॥३२॥

तत्रैतेषुचतुर्षु* विषयेषुप्राप्तयेपरिहारायचविभज्यन्यायःप्रदर्श्यते

प्राप्तव्यपरिहार्येषुज्ञात्वोपायाञ्श्रुतेःपृथक्॥कृत्वाऽथप्राप्नुयात्प्राप्यंतथाऽनिष्टंजहात्यपि॥३३॥

अथावशिष्टयोः* स्वभावतः

वर्जिताऽवाप्तयोर्बोधा+द्धानप्राप्तोन

कर्मणा॥ मोहमात्रान्तरायत्वात्क्रि
यया ते* न सिध्यतः॥३४॥

कस्मात्पुनरात्मवस्तुयाथात्म्यावबोधमात्रादेवाभिलषितनिरतिशयसुखप्राप्तिनिःशेषदुःखनिवृत्ती भवतो न तु कर्मणेत्युच्यते——

कर्माऽज्ञानसमुत्थत्वान्नात्त्वंमोहाऽपनुत्तये॥ सम्यग्ज्ञानं विरोधयस्यता-
मिस्रस्यांशुमानिव॥३५॥

नन्वात्मज्ञानमप्यविद्योपादानम्, न हि शास्त्रशिष्याचार्याद्यनुपादायाऽऽत्मज्ञानमात्मानंलभत इति। नैष दोषो, यतःआत्मज्ञानं हि स्वतःसिद्धपरमार्थात्मवस्तुस्वरूपमात्राश्रयादेवाऽविद्यातदुत्पन्नकारकग्रामप्रध्वंसिस्वात्मोत्पत्तावेव शास्त्राद्यपेक्षते नोत्पन्नमविद्यानिवृत्तौ। कर्म पुनःस्वात्मोत्पत्तावुत्पन्नं च। न हि क्रियाकारकनिस्पृहाकल्पकोटिव्यवहितफलदानाय स्वात्मानंबिभर्ति। साध्यमानमात्ररूपत्वात्तस्याः। न

चक्रियाऽऽत्मज्ञानवत्स्वात्मप्रतिलम्भकालएव-
स्वर्गादिफलेनकर्त्तारंसंबध्नाति*। आत्मज्ञानंपु-
नःपुरुषार्थसिद्धौनोत्पद्यमानस्वरूपव्यतिरेकेणा-
ऽन्यद्रूपान्तरंसाधनान्तरंवाऽपेक्षते। कुतस्तद्य
तः——

बलवद्धिप्रमाणोत्थंसम्यग्ज्ञानंनबाध्य
ते॥ आकाङ्क्षतेनचाप्यन्यद्साधनंप्रतिसा
धनम्॥३६॥

स्वपक्षस्यहेत्ववष्टम्भेनसमर्थितत्वान्निराशङ्क
मुपसंह्रियते——

तस्माद्दुःखोदधेर्हेतोरज्ञानस्यापनुत्त
ये॥ सम्यग्ज्ञानंसुपर्याप्तंक्रियाचेन्नो
क्तहेतुतः॥३७॥

ननुबलवदपिसम्यग्ज्ञानंसदप्रमाणोत्थेनासम्य
ग्ज्ञानेनबाध्यमानमुपलभामहे। यतउत्पन्नप-
रमार्थबोधस्यापिकर्तृत्वभोक्तृत्वरागद्वेषाद्य
नवबोधोत्थप्रत्यया*आविर्भवन्ति। नह्यबा-

धिते सम्यग्ज्ञाने तद्विरुद्धानां प्रत्ययानां संभवोऽस्ति, नैतदेवं, कुतः——

बाधितत्वादविद्याया विद्यां सा नैव*
बाधते ॥ तद्वासनानिमित्तत्वं यान्ति
विद्यास्मृतेर्ध्रुवम् ॥३८॥

"कर्मोज्ञानसमुत्थत्वा" दित्युक्तो हेतुस्तस्य च समर्थनं पूर्वमेवाभिहितं "हितं संप्रेप्सता" मित्यादिना, तदभ्युच्चयार्थमविद्यान्वयेन च संसारान्वयित्वं† प्रदर्शयिष्यामीत्यतस्प्राह——

ब्राह्मण्याद्यात्मके देहे त्वात्वा नाऽऽत्मेति भावनाम् ॥ श्रुतेः किंकरतामेति वाङ्मनःकायकर्मभिः ॥३९॥

यस्मात्कर्मोज्ञानसमुत्थमेव तस्मात्तद्यावृत्तो निवर्तत इत्युच्यते——

दग्धाखिलाधिकारश्चेद् ब्रह्मज्ञानाग्निना मुनिः ॥ वर्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्वेदकिंकरः ॥४०॥

अथेतरो घनतराविद्यापटलसंवीतान्तःकरणोऽङ्गीकृतकर्तृत्वाद्यशेषकर्माधिकारकारणो विधिप्रतिषेधचोदनासंदंशोपदष्टः कर्मसु प्रवर्तमानः —

शुभैराप्नोति देवत्वं निषिद्धैर्नारकीं गतिम् ॥ उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवशः ॥ ४१ ॥

आब्रह्मस्तम्बपर्यन्ते घोरे दुःखोदधौ घटीयन्त्रवदारोहावरोहन्यायेनाधममध्यमोत्तमसुखदुःखमोहविद्युच्चपलसंपातदायिनीर्विचित्रयोनीश्चण्डोत्पिञ्जलकम्प्रश्वसनवेगाभिहताम्भोनिधिमध्यवर्तिशुष्कालाबुवच्छुभाशुभव्यामिश्रकर्मवायुसमीरितः —

एवं चङ्क्रम्यमाणोऽयमविद्याकामकर्मभिः ॥ पाशितो जायते कामी म्रियते चासुखावृतः ॥ ४२ ॥

यथोक्तेऽर्थे ऽऽदरविधानाय प्रमाणोपन्यासः —

श्रुतिश्चेमं जगादर्थं कामस्य विनिवृत्तये ॥ तन्मूला संसृतिर्यस्मात्तन्नाशोऽज्ञानहान

तः॥४३॥

कान्त्वसौ श्रुतिरितिचेत्—

यदा सर्वे प्रमुच्यन्त इति न्वेति च वाजिनः *॥
कामबन्धनमेवेदं व्यासोऽप्याह पदे पदे॥४४॥

एष संसारपन्था व्याख्यातः। अथेदानीं तद्व्यावृत्तये कर्माण्यारादुपकारकत्वेन * यथा मोक्षहेतुतां प्रतिपद्यन्ते तथाऽभिधीयते—

तस्यैवं दुःखतप्तस्य कथंचित्पुण्यशीलनात्॥ नित्येहाक्षालितधियो वैराग्यं जायते हृदि॥४५॥

कीदृग्वैराग्यमुत्पद्यत इत्युच्यते—

नरकाङ्गीर्यथाऽस्याभूत्तथा काम्यफलादपि॥ यथार्थदर्शनात्तस्मान्नित्यं कर्म चिकीर्षति॥४६॥

एवं नित्यनैमित्तिककर्मानुष्ठानेन—

शुध्यमानं तु तच्चित्तमीश्वरार्पितकर्मभिः॥
वैराग्यं ब्रह्मलोकादौ व्यनक्त्यथ सुनिर्मलम्॥४७॥

यस्माद्रजस्तमोमलोपसंसृष्टमेव चित्तं कामबडिशेनाकृष्य विषयदुरन्तसूनास्थानेषु* निक्षिप्यते, तस्मान्नित्यनैमित्तिककर्मानुष्ठानपरिमार्जनेनाऽपविद्धरजस्तमोमलं, प्रसन्नं, मनाकुलं, संमार्जितस्फटिकशिलाकल्पं, वाह्यविषयहेतुकेन च रागद्वेषात्मकेनातिग्रहबडिशेनाऽनाकृष्यमाणं, विधूताशेषकल्मषं, प्रत्यङ्मात्रप्रवणं, चित्तदर्पणमवतिष्ठते, ऽतइदमभिधीयते——

व्युत्थिताऽशेषकामेभ्यो यदा धीरवतिष्ठते॥ तदैव प्रत्यगात्मानं स्वयमेवाविविक्षति॥४८॥

अतः परमवसिताधिकाराणि कर्माणि प्रत्यक्प्रवणतासूनीकृतसंप्रत्तिकानि* चरितार्थानि सन्ति——

प्रत्यक्प्रवणतां बुद्धेः कर्माण्युत्पाद्य शुद्धितः॥ कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव॥४९॥

यतो नित्यकर्मानुष्ठानस्यैष महिमा——

तस्मान्मुमुक्षुभिः कार्यमात्मज्ञानाभिला
षिभिः ॥ नित्यनैमित्तिकं कर्म सदैवाऽऽत्म
विशुद्धये ॥५०॥

यथोक्तेऽर्थे सर्वज्ञवचनं प्रमाणम् ——————

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥
योगारूढस्य तस्यैव शमस्वेति च स्मृतिः ॥५१॥

नित्यकर्मानुष्ठानाद्धर्मोत्पत्ति, धर्मोत्पत्तेः, पापहानि, स्ततश्चित्तशुद्धि, स्ततः संसारयाथात्म्यावबोधस्ततोवैराग्यं, ततो मुमुक्षुत्वं, ततस्तदुपायपर्येषणं, ततः सर्वकर्मतत्साधनसंन्यास, * स्ततो योगाभ्यास, स्ततश्चित्तस्य प्रत्यक्प्रवणता, ततस्तत्त्वमस्यादि वाक्यार्थपरिज्ञानं, ततोऽविद्योच्छेद, स्ततश्च स्वात्मन्येवावस्थानम्, "ब्रह्मैव सन्ब्रह्माप्येति विमुक्तश्च विमुच्यते" इति ——————

पारंपर्येण कर्मैवं स्यादविद्यानिवृत्तये ॥
ज्ञानवन्नाविरोधित्वात्कर्माविद्यां निरस्य
ति ॥५२॥

नचकर्मणःकार्यमण्वपिमुक्तौसंभाव्यते*,नापिमु-
क्तौयत्संभवतितत्कर्मापेक्षते। तदुच्यते——

उत्पाद्यमाप्यंसंस्कार्यंविकार्यंचक्रियाफ-
लम्॥नैवंमुक्तिर्यतस्तस्मात्कर्मतस्यानसा-
धनम्॥५३॥

एवंतावत्केवलंकर्मसाक्षादविद्याऽपनुत्तयेनपर्याप्त-
मितिप्रपञ्चितम्,मुक्तौचमुमुक्षुज्ञानतद्विषयस्वाभा-
व्यानुरोधेनसर्वप्रकारस्यापिकर्मणोऽसंभवउक्तो-
"हितंसंप्रेप्सता" मित्यादिना, यादृशाच्चारादुपकार
कत्वेन*ज्ञानोत्पत्तौकर्मणांसमुच्चयःसंभवतितथा
प्रतिपादितम्†,अविद्योच्छित्तौतुलब्धात्मस्वभा-
वस्यात्मज्ञानस्यैवासाधारणसाधकतमत्वंनान्य-
स्यप्रधानभूतस्यगुणभूतस्यवेत्येतदधुनोच्यते॥
तत्रज्ञानंगुणभूतंतावदहेतुः‡रित्येतदाह——

संनिपत्यनचज्ञानंकर्माज्ञानंनिरस्यति॥
साध्यसाधनभावत्वादेककालानवस्थि
तेः॥५४॥

समप्रधानयोरप्यसंभवस्तत्र——

बाध्यबाधकभावाच्च पञ्चास्योरणयोरि
व ॥ एकदेशानवस्थानान्न समुच्चयता तयोः ॥५५॥

कुतो बाध्यबाधकभावो यस्मात्——

अयथावस्तुविद्यास्याद्विद्यातस्याविरो
धिनी ॥ समुच्चयस्तयोरेवं रविशार्वरयो
रिव ॥५६॥

तस्मादकारकब्रह्मात्मनि परिसमाप्तावबोधस्याशेषकर्मचोदनानामचोद्यस्वाभाव्यात्कुण्ठता कथं, तदभिधीयते——

बृहस्पतिसवे यद्वत् क्षत्रियो न प्रवर्तते ॥
ब्राह्मणत्वाद्यहंमानी विप्रो वा क्षात्रकर्मणि * ॥

यथाऽयं दृष्टान्त एवं दार्ष्टान्तिकोऽपीत्याह——

विदेही वीतसंदेहो नेति नेत्यवशेषितः ॥
देहाद्यनात्मदृक्तद्वत् तत्क्रियां वीक्षतेऽपि न ॥५८॥

तस्यार्थस्याविष्करणार्थमुदाहरणम्——

मृत्स्नेभके यथेभत्वं शिशुरध्यस्य वल्गति ॥

अध्यस्याऽऽत्मनि देहादीन्मूढस्तद्भावभाविचे
ष्टते॥५९॥

नचवयंज्ञानकर्मणोः सर्वत्रैवसमुच्चयंप्रत्याचक्ष्महे यत्रप्रयोज्यप्रयोजकभावोज्ञानकर्मणोस्तत्रनास्म त्पित्राऽपिशक्यतेनिवारयितुम्। तत्रविभागप्रदर्शनायोदाहरणंप्रदर्श्यते——

स्थाणुचोरधियाऽऽलायभीतोयद्वत्पला
यते॥ बुद्ध्यादिभिस्तथाऽऽत्मानंभ्रान्तोऽ
ध्यारोप्यचेष्टते॥६०॥

एवंयत्रयत्रज्ञानकर्मणोःप्रयोज्यप्रयोजकभाव-स्तत्रतत्रसर्वत्राऽयंन्यायः। यत्रतुनसमकालंनापिक्रमेणोपपद्यतेसमुच्चयःसविषयउच्यते——

स्थाणोःसतत्त्वविज्ञानंयथानाङ्गंपलायने॥
आत्मनस्तत्त्वविज्ञानंतद्वन्नाङ्गंक्रियाविधौ॥६१॥

यस्माद्गुणस्यैतत्स्वाभाव्यम्——

यद्धियस्यानुरोधेनस्वभावमनुवर्तते॥
तत्तस्यगुणभूतंस्यान्नप्रधानाद्गुणोयतः॥

यस्मात्——

कर्मप्रकरणाकाङ्क्षि ज्ञानं कर्मगुणो भवेत्।
यद्धि प्रकरणे यस्य तत्तदङ्गं प्रचक्षते ॥६३॥
स्वरूपलाभमात्रेण यत्त्वविद्यां निहन्ति नः।
न तदङ्गं प्रधानं वा ज्ञानं स्यात्कर्मणः क्वचित् ॥६४॥

समुच्चयपक्षवादिनाऽप्यवश्यमेव तदभ्युपगन्तव्यम्।

यस्मात्——

अज्ञानमनिराकुर्वद्ज्ञानमेव न सिध्यति।
विपन्नकारकग्रामं ज्ञानं कर्म न ढौकते ॥६५॥

इदं चापरं कारणं ज्ञानकर्मणोः समुच्चयनिबर्हि——

हेतुस्वरूपकार्याणि प्रकाशतमसोरिव।
विरोधीनि ततो नास्ति सांगत्यं ज्ञानकर्मणोः ॥६६॥

एवमुपसंहृते केचित्स्वसंप्रदायबलावष्टम्भादाहुः। यदेतद्वेदान्तवाक्यादहंब्रह्मेति विज्ञानं समुत्पद्यते तन्नैव स्वोत्पत्तिमात्रेणाज्ञानं निरस्यति किं तर्ह्यहन्यहनि द्राघीयसा कालेनोपासीनस्य सतो भावनोपचयान्निःशेषमज्ञानमपगच्छति। "देवो भूत्वा देवान-

प्येती" ति श्रुतेः। अपरे तु ब्रुवते, वेदान्तवाक्यजनितमहं ब्रह्मेति विज्ञानं संसर्गात्मकत्वा* दात्मवस्तुयाथात्म्यावगाह्येव न भवति किं तर्ह्येतदेव गङ्गास्रोतोवत्सततमभ्यस्यतोऽन्यदेवावाक्यार्थात्मकं विज्ञानान्तरमुत्पद्यते तदेवाशेषाज्ञानतिमिरोत्सारीति, "विज्ञाय प्रज्ञां कुर्वीते" ति श्रुतेः। इत्यस्य पक्षद्वयस्य निवृत्तये इदमभिधीयते——

सकृत्प्रवृत्त्या मृद्नाति क्रियाकारकरूपभृत्। अज्ञानमागमज्ञानं*सांगत्यं*नास्त्यतोऽनयोः॥६७॥

एवं तावदनानात्वे ब्रह्मणि ज्ञानकर्मणोः समुच्चयो निराकृतः। अथाधुना पक्षान्तराभ्युपगमेनापि प्रत्यवस्थाने पूर्ववदनाश्वासो यथा तथाऽभिधीयते——

अनुत्सारितनानात्वं ब्रह्म यस्यापि वादिनः। तन्मतेनापि दुःसाध्यो ज्ञानकर्मसमुच्चयः॥६८॥

तस्य विभागोक्तिर्दूषणविभागप्रज्ञप्तये*——

ब्रह्मात्मावाभवेत्तस्ययदिवाऽनात्मरूप
कम्॥ आत्मानाप्तिर्भवेन्मोहादितरस्या
प्यनात्मनः॥६९॥

तत्रयदितावद्ब्रह्मास्तवेनैवबृत्तेनब्रह्मप्राप्तमात्मस्वाभाव्यात्केवलमासुरमोहपिधानमात्रमेवाऽनाप्तिनिमित्तं, तस्मिन्पक्षे ———

मोहापिधानभङ्गायनैवकर्माणिकारणम्॥
ज्ञानेनैवफलावाप्तेस्तत्रकर्मनिरर्थकम्॥७०॥

अनात्मरूपकेतुब्रह्मणि * नकर्मसाधनभावंप्रतिपद्यते † नापिज्ञानंकर्मसमुच्चितमसमुच्चितंवा, यस्मादन्यस्यस्वतएवसाधकस्यब्रह्मणोऽप्यन्यत्वंस्वतएवसिद्धम्। तत्रैवम् ———

अन्यस्यान्यात्मताप्राप्तौनक्कचिद्धेतुसंभवः।
तस्मिन्नसत्यपिनाऽनष्टः परात्मानंप्रपद्यते॥

अपरस्मिंस्तुपक्षेविधिः ———

परमात्मानुकूलेनज्ञानाभ्यासेन * दुःखिनः।
द्वैतिनोऽपिविमुच्येरं † अपरात्मविरोधिना॥७२॥

इतरस्मिंस्तु पक्षे विधेरेवानवकाशत्वं, कथम्——

समस्तव्यस्तभूतस्य* ब्रह्मण्येवावतिष्ठतः।
कृतकर्मणि को हेतुः सर्वानन्यत्वदर्शिनः॥७३॥

सर्वकर्मनिमित्तसंभवासंभवाभ्यां सर्वकर्मसंकरश्च प्राप्नोति, यस्मात्——

सर्वजात्यादिमत्त्वेऽस्य नितरां हेत्वसंभवः।
विशेषं* ह्यनुपादाय कर्मनैव प्रवर्तते॥७४॥

स्याद्विधिरध्यात्माभिमानादिति चेन्नैवं, यस्मात्——

न चाध्यात्माभिमानोऽपि विदुषोऽस्त्यासुरत्वतः॥ विदुषोऽप्यासुरश्चेत्स्यान्निष्फलं ब्रह्मदर्शनम्॥७५॥

अज्ञानकार्यत्वाच्च न समकालत्वं नापि क्रमेण ज्ञानकर्मणोर्वस्त्ववस्तुतन्त्रत्वात्संगतिरस्तीत्येवं निराकृतोऽपि काशकुशावलम्बमाह——

अथाध्यात्मं पुनर्यायादाश्रितो मूढतां भवेत्*॥
स करोत्येव कर्माणि को ह्यज्ञं विनिवारयेत्॥७६॥

सिद्धत्वाच्च न साध्यं, यतः——

सामान्येतररूपाभ्यांकर्मात्मैवास्ययोगिनः ।
निःश्वासोच्छ्वासवत्तस्मान्ननियोगमपेक्षते ॥७७

अस्तुतर्हिभिन्नाभिन्नात्मकंब्रह्म, तथाचसतिज्ञानकर्मणीसंभवतोभेदाभेदविषयत्वात्तयोः । तत्रतावदयंपक्षएवनसंभवति । किंकारणं, नहिभिन्नोऽयमित्यभेदबुद्धिमनिराकृत्यभेदबुद्धिःपदार्थमालिङ्गते* । एवंब्रह्मनभ्युपगमेभिन्नाभिन्नपदार्थयोरलौकिकत्वंप्रसज्येत । अथनिष्प्रमाणकमप्याश्रीयते, तदप्युभयपक्षाभ्युपगमादभेदपक्षेदुःखिब्रह्मस्यादतआह——

भिन्नाभिन्नंविशेषैश्चेद्दुःखिस्याद्ब्रह्मतेध्रुवम् ।
अशेषदुःखिताचेत्स्यादहोप्रज्ञाऽऽत्मवादिनाम् ॥७८॥

तस्मात्सम्यगेवाभिहितंनज्ञानकर्मणोःसमुच्चयइत्युपसंह्रियते——

तमोऽङ्गत्वंयथाभानोरग्नेःशीताङ्गतायथा ।
वारिणश्चोष्णतायद्वद्ज्ञानस्यैवंक्रियाङ्गता ॥७९

यथोक्तोपपत्तिबलेनैवपूर्वपक्षस्योत्सारितत्वाद्वक्तव्यं-

नाशक्येषितमित्यतः प्रतिपत्तिक्रमवत्पूर्वपक्षपरिहाराय यत्किंचिद्वक्तव्यमित्यतइदमभिधीयते——

मुक्तेः क्रियाभिः सिद्धत्वादित्या* द्यनुचितंबहु॥
यदभाणितदन्याय्यंयथातदधुनोच्यते॥८०॥

योऽयंकाम्यानांप्रतिषिद्धानांचत्यागः प्रतिज्ञायते-साप्रतिज्ञातावन्नशक्यतेऽनुष्ठातुं, किंकारणम्। कर्मणोहि निर्वृत्तात्मनोद्वाभ्यां प्रकाराभ्यां निवृत्तिः संभवति। प्रारब्धफलस्योपभोगेनाऽनारब्धफलस्याशुभस्यप्रायश्चित्तैरिति। तृतीयोऽपित्यागप्रकारोऽकर्त्रात्मावबोधात्, सत्वात्मज्ञानाऽनभ्युपगमाद्भवतानाम्युपगम्यते तत्रयान्यनुपभुक्तफलान्यनारब्धफलानितानीश्वरेणापिकेनचिदपिनशक्यन्ते-परित्यक्तुम्। यथाऽऽरब्धफलानित्यज्यन्ते, तान्यपिनशक्यन्तेत्यक्तुम्। किंकारणम्। अनिवृत्तेः। अनिर्वृत्तं हि चिकीर्षितंकर्म शक्यते त्यक्तुं प्रवृत्तिनिवृत्तीप्रतिकर्तुः स्वातन्त्र्यात्। निर्वृत्तेतुकर्मणितदसंभवाद्दुरनुष्ठेयः प्रतिज्ञातार्थः। अशक्यप्रतिज्ञानाच्चान *

शक्यते प्रतिज्ञातुं यावज्जीवं काम्यानि प्रतिषिद्धानि च कर्माणि न करिष्यामीति, सुनिपुणानामप्यपराधदर्शनात् प्रमाणाभावाच्च। न च प्रमाणमस्ति मोक्षकामो नित्यनैमित्तिके कर्मणी कुर्यात् काम्यप्रतिषिद्धे च वर्जयेदारब्धफले चोपभोगेन क्षपयेदिति। अनन्त्याच्च। न चोपचितानां कर्मणामियत्ताऽस्ति, संसारस्यानादित्वात्। न च काम्यैः प्रतिषिद्धैर्वा तेषां निवृत्तिरस्ति, शुद्ध्यशुद्धिसाम्ये सत्यविरोधादित्यत्राह —

न कृत्स्नकाम्यसंत्यागोऽनन्तत्वात्कर्तुमिष्यते। निषिद्धकर्मणश्चैतद्व्यतीतानन्तजन्मसु ॥८१॥

स्यान्मतं व्यतीतानन्तजन्मोपात्तानां कर्मणां —

क्षयो नित्येन तेषां चेत् प्रायश्चित्तैर्यथैनसः।
निष्फलत्वान्न नित्येन काम्यादेर्विनिवारणम् ॥८२॥

प्रमाणाभावाच्च कथम् —

पापापनुत्तये वाक्यात् प्रायश्चित्तं यथा तथा ॥

गम्यते काम्यहानार्थं नित्यं कर्म न वाक्यतः॥८३॥

अथापि स्यात्काम्यैरेव काम्यानां पूर्वजन्मोपचितानां क्षयो भविष्यतीति, तन्न। यतः——

पाप्मनां पाप्मभिर्नास्ति यथैवेह निराक्रिया॥
काम्यैरपि तथैवास्तु काम्यानामविरोधतः॥८४॥

एवं तावत् "न मुक्तेः क्रियाभिः सिद्धत्वा*"दिति निराकृतम्। अथात्मज्ञानस्य सद्भावे प्रमाणाऽसंभव उक्तस्तत्परिहारायाह——

श्रुतयः स्मृतिभिः साकमानन्त्यात्कामिनामिह॥ विदधत्युरुयत्नेन कर्मातो बहु कामदम्॥८५॥

न च बाहुल्यं प्रामाण्ये कारणभावं प्रतिपद्यते। अत आह——

प्रामाण्याय न बाहुल्यं न ह्येकत्र प्रमाणताम्॥
वस्तुन्यटन्ति मानानि त्वेकत्रैकस्य मानता*॥

यत्तूक्तं यत्नतो वीक्षमाणोऽपी*ति, तत्रापि भवत एवापराधः, कस्माद्, यतः——

परीक्ष्यतल्लोकानित्याद्यध्यात्मज्ञानविधा-
यिनीः। नैष्कर्म्यप्रवणाः साध्वीः श्रुतीः किं
नश्टपोषिताः॥८७॥

नन्वा"त्मेत्येवोपासीत, आत्मावाअरे दृष्टव्य" इत्य पूर्वविधिश्रुतेः पुरुषस्यात्मदर्शनक्रियायां नियोगोऽवसीयत इति। नैवम्। अपुरुषतन्त्रत्वाद्वस्तुयाथात्म्यज्ञानस्य सकलानर्थबीजात्माऽनवबोधोत्सारिणो मुक्तिहेतोरिति विध्यभ्युपगमेऽपि नाऽपूर्वविधिरयं, यत आह ——————

नियमः परिसंख्या वा विध्यर्थोऽपि भवेद्यतः।
अनात्माऽदर्शनेनैव परात्मानमुपास्महे॥८८॥

यच्चोक्तं "विश्वासो नान्यतोऽस्तिन *" इति, तदपि निद्रातुरचेतसा त्वया स्वप्नायमानेन प्रलपितं, किं कारणं, नहि वयं प्रमाणबलेनैकात्म्यं प्रतिपद्यामहे। एकात्म्यं स्वत एवा,नुभवमात्रात्मकत्वात्। अत एव सर्वप्रमाणावतारासंभवं वक्ष्यति। प्रमाणव्यवस्थायाश्चानुभवमात्राश्रयत्वात्। अत आह ——————

वाक्यैकगम्यं यद्वस्तु नान्यस्मात्तत्र विश्वसेत्।।
नाप्रमेये स्वतःसिद्धेऽविश्वासः कथमात्मनि।।८४

यदप्युक्तं "मन्तरेण विधि*" मिति, तदप्यबुद्धिपूर्वक-
मिव नः प्रतिभाति। यस्मात्कालान्तरफलदायिषु-
+कर्मसु एतद्घटते। आत्मलाभकाल एव फलदायि-
नित्वात्मज्ञाने नैतत्समञ्जसमित्याह——

ज्ञानात्फलेह्यवाप्तेऽस्मिन्प्रत्यक्षे भवघाति-
नि।। उपकारायतन्नेति तन्न्याय्यं भाति नो
वचः।।८५।।

यदपि जैमिनीयं वचनमुद्घाटयसि, तदपि तद्विवक्षा*-
ऽपरिज्ञानादेवोद्भाव्यते। किंकारणं, यतो न जैमिनेर-
यमभिप्रायः आम्नायः सर्व एव क्रियार्थ इति। यदि ह्य-
यमभिप्रायोऽभविष्य "दथातो ब्रह्मजिज्ञासा+" "ज-
न्माद्यस्य यतः‡" इत्येवमादि ब्रह्मवस्तुस्वरूपमा-
त्रयाथात्म्यप्रकाशनपरं गम्भीरन्यायसंदृब्धं-
सर्ववेदान्तार्थमीमांसनं श्रीमच्छारीरकं नासूत्र-
यिष्यत्, असूत्रयच्च*। तस्माज्जैमिनेरेवायमभि-

प्राणो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यमेव-
मैकात्म्यवाक्यानामप्यनधिगतवस्तुपरिच्छेदसा-
म्यादित्यत इदमभिधीयते ——

अधिचोदनमाम्नाय[१] स्तस्यैवस्यात्क्रिया-
र्थता॥ तत्त्वमित्यादिवाक्यानां बूतकर्मार्थ-
ताकथम्॥८१॥

अपि चैकात्म्यपक्ष इवादृष्टार्थकर्मसु भवत्पक्षेऽपिप्र-
वृत्तिर्दुर्लक्ष्या। यतः ——

स्वर्गं यियासुर्जुहुयादग्निहोत्रं यथाविधि॥
देहाद्व्युत्थापितस्यैवं कर्तृत्वं जैमिनेः कथ-
म्*॥८२॥

न च प्रत्याख्याताशेषशरीरादिकर्मसाधनस्वभाव-
स्यात्ममात्रस्य कर्मस्वधिकारो, यस्मात्

सर्वप्रमाणासंभाव्यो[१] ह्यहंवृत्त्येकसाधनः॥
युष्मदर्थमनादृत्य जैमिनिः प्रेर्यते कथम्॥८३

प्रवृत्तिकारणाभावाच्च। यस्मात् ——

सुखदुःखादिभिर्योग आत्मनो नाऽहमेष्यते॥

पराक्त्वात्प्रत्यगात्मत्वाज्जैमिनेः प्रेर्यतेक-
यम् ॥८४॥

किंच——

नतावद्योगएवास्ति शरीरेणात्मनः सदा ॥
विषयैर्दूरतो नास्ति स्वर्गादौ स्यात्कथं सु-
खम् ॥८५॥

यस्मादन्यथा नोपपद्यते——

नराभिमानिनं तस्मात्कारकाद्यात्मदर्शि-
नम् ॥ मन्त्रप्राहोररीकृत्य कुर्वन्निति न निर्द्व-
यम् ॥८६॥

यच्चोक्तं "विरहय्ये"ति,* तदपि न सम्यगेव। तथापि-
तु नया काचित्क्रिया यत्रक्कचाध्याहरणीया किंतु
या यत्राभिप्रेतसंबन्धं घटयितुं शक्नोति, आकाङ्क्षां च
वाक्यस्य पूरयति सैवाध्याहरणीया। एवं विशिष्टा
च क्रियाऽस्माभिरभ्युपगतैव सा तूपादित्सितवा-
क्यार्थाऽविरोधिन्येव नाऽभूतार्थप्रादुर्भावफले'ति
षड्भावविकाररहितात्मवस्तुनो निर्धूताशेषद्वैता-

नर्थस्यापराधीनप्रकाशस्यविजिज्ञापयिषितत्वा दस्यस्मीत्यादिक्रियापदंस्वमहिमसिद्धार्थप्रति पादनसमर्थमभ्युपगन्तव्यंनहिविपरीतार्थप्रति पादनमिति ———

धात्वेदितिनदानार्थेपदंयद्धत्प्रयुज्यते ॥
स्धीत्यादितथानेचस्थे* त्स्वतःसिद्धार्थवा
चिनि ॥१८७॥

नचयथोक्तवस्तुवृत्तप्रतिपादनव्यतिरेकेणतत्त्व- मसिवाक्यं* वाक्यार्थान्तरंवक्तीतिशाक्यमध्य वसितुमित्याह ———

तत्त्वमस्यादिवाक्यानांस्वतःसिद्धार्थबो
धनात्* अर्थान्तरं* नसंदृष्टुंशाक्यते
त्रिदशैरपि ॥१८८॥

यस्मादेवम् ———

अतःसर्वाश्रमाणांतुवाङ्मनःकायकर्मभिः ॥
स्वनुष्ठितैर्नमुक्तिःस्याद्ज्ञानादेवहिसायतः ॥

तस्माच्च कारणादेतदप्युपपन्नम् ———

स्वमनोरथसंक्लृप्तप्रज्ञाध्मातधियामतः॥
श्रोत्रियेष्वेववाचस्ताःशोभन्तेनात्मवे-
दिषु॥१००॥

इतिश्रीमच्छङ्करपूज्यपादशिष्यसुरेश्वराचार्यकृतौनैष्कर्म्यसिद्धौप्रथमोऽध्यायःसमाप्तः॥+॥+

॥अथद्वितीयोऽध्यायः॥+॥

॥श्रीपरमात्मनेनमः॥+॥+॥

प्रत्यक्षादीनामनेवंविषयत्वात्, तेषांस्वारम्भकविषयोपनिपातित्वाद्, आत्मनश्चाशेषप्रमेयवैलक्षण्यात्, * सर्वानर्थैकहेत्वज्ञानापनोदिज्ञानदिवाकरोदयहेतुत्वंवस्तुमात्रयाथात्म्यप्रकाशनपटीयसस्तत्त्वमस्यादेर्वचसएवेतिबह्वीभिरुपपत्तिभिःप्रदर्शितम्। अतस्तदर्थाप्रतिपत्तौयत्कारणंतदपनयायद्वितीयाध्यायआरभ्यते ——

श्राविततोवेत्तिवाक्यार्थंनचेत्त्वमसीत्यतः॥
त्वंपदार्थानभिज्ञत्वादतस्तत्प्रक्रियोच्यते॥१॥

योऽयमहंब्रह्मेतिवाक्यार्थस्तत्प्रतिपत्तिर्वाक्यादे

वेत्ति प्रत्यक्षादीनामनेवंविषयत्वादित्यवादिषं तस्य विशुद्ध्यर्थमनैकान्तिकत्वं* पूर्वपक्षत्वेनोपस्थाप्यते ——

कृत्स्नानात्मनिवृत्तौ† चकश्चिदाप्नोतिनिर्वृतिम्॥ श्रुतवाक्यस्मृतेश्चान्यः स्मार्यते च वचोऽपरः॥२॥

एतत्प्रसङ्गेन श्रोत्रन्तरोपन्यासमुभयत्रापि संभावनायाह ——

वाक्यश्रवणमात्राच्च पिशाचकवदाप्नुयात्॥ त्रिषु याद्दच्छिकी सिद्धिः स्मार्यमाणे तु निश्चिता*॥३॥

नायमनैकान्तिको हेतुर्यतः ——

सर्वोऽयं महिमा ज्ञेयो वाक्यस्यैव यथोदितः॥ वाक्यार्थं न ह्यृते वाक्यात्कश्चिज्जानाति तत्त्वतः॥४॥

वाक्यं च प्रतिपादनाय प्रवृत्तं सत्प्रतिपादयत्येव, सर्वप्रमाणानामप्येवंवृत्तत्वात् ——

नाहंग्राह्योनतद्ग्रीनेनप्रत्यङ्नापिदुःखिनि॥
विरोधःसदसीत्यस्माद्वाक्याभिज्ञस्यजायते॥५॥
नाविरक्तस्यसंसारान्निविवृत्सा*ततोभवेत्॥
नचानिवृत्ततृष्णस्यपुरुषस्यमुमुक्षुता॥६॥
नचामुमुक्षोरस्तीहगुरुपादोपसर्पणम्॥
नविनागुरुसंबन्धंवाक्यस्यश्रवणंभवेत्*॥७॥
तथापदपदार्थौचनस्तोवाक्यमृतेक्वचित्॥
अन्वयव्यतिरेकौचतावृतेस्तांकिमाश्रयौ॥८॥
अन्वयव्यतिरेकाभ्यांविनावाक्यार्थबोधनम्॥
नस्यात्तेनविनाध्वंसोनाज्ञानस्योपपद्यते॥९॥
विनाऽज्ञानप्रहाणेनपुरुषार्थः§सुदुर्लभः॥
तस्माद्यथोक्तसिद्ध्यर्थं*परोग्रन्थोऽवतार्यते॥१०॥
वर्चस्कंत्वन्नकार्यत्वाद्यथाऽनात्मेतिगम्यते॥
तद्भागःसेन्द्रियोदेहस्तद्वत्किमितिनेक्ष्यते॥११॥
आद्यन्तयोरनात्मत्वेप्रसिद्धेमध्येकःप्रतिबन्धः—
आगानात्मैवजरधंसदात्मतामेत्यविद्यया॥
स्रगाल्लेपनवद्देहंतस्मात्पश्येद्विरक्तधीः॥१२॥

अथैवमपिमद्वचनंनाद्रियसेस्वयमेवैतस्माच्छरीरादशु
चिराशेर्निराशो* भविष्यसि—

मन्यसेतावदस्मीतियावदस्मान्ननीयसे॥
श्वभिःक्रोडीकृतेदेहेनैवंत्वमभिमंस्यसे॥१३॥
शिरस्त्राक्रम्यपादेनभर्त्सयत्यपरान्शुनः॥
दृष्ट्वासाधारणंदेहंकस्मात्सक्तोऽसितत्रभोः॥१४॥

श्रुतिपरिप्रापितोऽयमर्थोऽनात्माबुद्ध्यादिर्देहान्तइती
दमाह—

बुसश्रीहिपलालांशैर्बीजमेकंत्रिधायथा॥
बुद्धिमांसपुरीषांशैरन्नंतद्वदवस्थितम्॥१५॥

यथोक्तार्थप्रतिपत्तौसत्यां*नरागद्वेषाभ्यांविक्रियते
विपश्चिदित्यस्यार्थस्यप्रतिपत्तयेदृष्टान्तः—

वर्चस्केसंपरित्यक्तेदोषतश्चावधारिते॥
यदिदोषंवदेत्तस्मैकिंतत्रोच्चारितुर्भवेत्॥१६॥
तद्वत्सूक्ष्मेतथास्थूलेदेहे*त्यक्तेविवेकतः॥
यदिदोषंवदेत्ताभ्यांकिंतत्रविदुषोभवेत्॥१७॥

एतावदेवह्यहंब्रह्मास्मीतिवाक्यार्थप्रतिपत्तौकारणं-

यदुत बुद्ध्यादौ देहान्ते ह्यहं ममेति निःसंधिबन्धनो ग्राहस्तद्व्यतिरेके हि न कुतश्चिद्बिभ्यते एकत्व एव प्रत्यगात्मन्यवतिष्ठत इत्याह——

रिपौ बन्धौ स्वदेहे च समैकात्म्यं प्रपश्यतः॥
विवेकिनः कुतः कोपः स्वदेहावयवेष्विव॥१८॥

इतश्चानात्मा देहादिः——

घटादिवच्च दृश्यत्वात्तैरेव करणैर्दृशेः॥
स्वप्ने चानन्वयाज्ज्ञेयो देहोऽनात्मेति सूरिभिः॥

देहादिकार्यकरणसंघातव्यतिरेकाव्यतिरेकदर्शिनः प्रत्यक्षत एव विरुद्धं कार्यमुपलभ्यते——

चतुर्भिरुह्यते यत्तत्सर्वशक्त्या शरीरकम्॥
तत्त्रायते तदेवाहं धियाऽऽघ्रातमचेतसाम्॥२०॥

प्रसिद्धत्वात्प्रकरणार्थोपसंहारायाह——

स्थूलं युक्त्या निरस्यैवं नभसो नीलतामिव॥
देहं सूक्ष्मं निराकुर्यादतो युक्तिभिरात्मनः॥२१॥

कथं देहं सूक्ष्मं निराकुर्यादित्युच्यते——

अहंममत्वयत्नेच्छा अनात्मधर्माः कृशत्ववत्॥

कर्मत्वेनो* पलभ्यत्वादपायित्वाच्चवस्त्रवत्॥

वैधर्म्येदृष्टान्तः——

नोष्णिमानंदहत्यग्निःस्वरूपत्वाद्यथाज्व-
लन्॥ तथैवात्माऽऽत्मनोविद्या† दहंनैवावि
शेषतः॥२३॥

एकस्यात्मनःकर्मकर्तृभावःसर्वथानोपपद्यतेइति-
श्रुत्वामीमांसकःप्रत्यवतिष्ठते,अहंप्रत्ययग्राह्यग्रा-
हक*आत्मेति। तन्निवृत्त्यर्थमाह——

यत्कर्मकोहियोभावोनासौतत्कर्तृकोयतः॥
घटप्रत्ययवत्तस्मान्नाहंस्याद्दृष्टकर्मकः†॥२४

अत्राह। प्रत्यक्षेणात्मनःकर्मकर्तृत्वाभ्युपगमेतत्पा-
दोपजीविना‡ऽनुमानेनप्रत्यक्षोत्सारणमयुक्तमिति-
चोद्यम्। तन्निराकरणायप्रत्यक्षोपन्यासः॥——

यत्रयोदृश्यतेदृष्टातस्यैवासौगुणो*नतु॥
दृष्टस्योदृश्यतां† यस्मान्नैवेयाद्दष्टृबोध
वत्॥२५॥

प्रत्यक्षेणैवभवदभिमतस्यप्रत्यक्षस्याभासीकृतत्वा-

त्सुस्थमेवानुमानम्। अतस्तदेवप्रक्रियते। तत्रच-
विकल्पदूषणाभिधानम् ॐ ——

नात्मनानतदंशेनगुणःस्वस्योऽवगम्यते॥
अभिन्नत्वात्समत्वाच्चनिरंशत्वादकर्मतः॥२६

नयुगपन्नापिक्रमेणोभयथाचैकस्यधर्मिणोग्राह्य
ग्राहकत्वमुपपद्यतइतिप्रतिपादनायाह——

द्रष्टृत्वेनोपयुक्तत्वात्तदैवस्यान्नदृश्यता॥
कालान्तरेचेद्दृश्यत्वंनह्यद्रष्टृकमिष्यते॥२७

सन्तुकाममनात्मधर्माममत्वादयोऽप्युक्तन्याय-
बलात्, अनात्मतयैवचतेषुव्यवहारात्। अहंरूपस्य
तुप्रत्यगात्मसंबन्धितयैवप्रसिद्धेः, "अहंब्रह्मास्मी"
ति श्रुतेश्चानात्मधर्मत्वमयुक्तमितिचेत्तन्न——

अहंधर्मस्त्वभिन्नश्चेदहंब्रह्मेतिवाक्यतः।
गौरोऽहमित्यनेकान्तोवाक्यंतद्व्यपनेतृ-
तत्॥२८॥

कथंवाक्यंतद्व्यपनेतृतदित्युच्यते——

योऽयंस्थाणुःपुमानेषपुंधियास्थाणु

धीरिव॥ ब्रह्मास्मीतिधियाऽशेषामहंबु-
द्धिं निवर्तयेत् *॥२९॥

अहंपरिच्छेदव्यावृत्तौ † नकिंचिदव्यावृत्तंद्वैतजातमवशिष्यते, द्वितीयसंबन्धस्यतन्मूलत्वादत-आह ——————

निवृत्तायामहंबुद्धौ ममधीःप्रविलीयते॥
अहंबीजाहिसासिद्ध्ये * तमोभावेकुतःफणी॥३

विवक्षितदृष्टान्तांशज्ञापनायदृष्टान्तव्याख्या ——

तमोभिभूतचित्तोहिरज्ज्वांपश्यतिरोषणम्॥
भ्रान्त्याभ्रान्त्याविनातस्मान्नोरगंस्त्रजिवीक्षते †॥

अनन्वयाच्च * नात्मधर्मोऽहंकारः ——————

आत्मनश्चेदहंधर्मोयायान्मुक्तिसुषुप्तयोः॥
यतोनान्वेतितेनायमन्यदीयोभवेदहम्॥३२॥

आत्मधर्मत्वाऽभ्युपगमेऽपरिहार्यदोषप्रसक्तिश्च ——

यद्यात्मधर्मोऽहंकारोनित्यत्वं † तस्यबोधवत्॥
नित्यत्वेमोक्षशास्त्राणांवैयर्थ्यंप्राप्नुयाद्ध्रुवम्॥३३॥

स्यात्परिहारःस्वाभाविकधर्मत्वाभ्युपगमेऽप्याम्रादिफ-

ल्लवदिति चेत्तन्न——

आम्नादेः परिणामित्वाद्गुणहानिर्गुणान्तरे॥
अविकारि तु तद्ब्रह्म नहि द्रष्टुरिति श्रुतेः॥३४॥

अहंकारस्यागमापायित्वात्तद्धर्मिणश्चानित्यत्वं प्राप्नोति——

आगमापायिनिष्ठत्वादनित्यत्वमियाद्दृशिः॥
उपयन्नपयन्[१] धर्मो विकरोति हि धर्मिणम्॥३५॥

अस्त्वनित्यत्वं कमुपालभेमहि प्रमाणोपपन्नत्वादिति चेत्तन्न——

सदाऽविलुप्तसाक्षित्वं स्वतःसिद्धं न पार्यते॥
अपह्नोतुं घटस्येव कुशाग्रीयधियाऽऽत्मनः॥३६॥

एतस्माच्च हेतोरहङ्कारस्यानात्मधर्मत्वमवसीयताम्——

प्रमाणैश्चावगम्यत्वाद्घटादिवदहंदृशेः॥
यतो राद्धिः प्रमाणानां स कथं तैः प्रसिध्यति॥३७॥

धर्मधर्मिणोश्चेतरेतरविरुद्धात्मकत्वादसङ्गतिः——

धर्मिणश्च विरुद्धत्वान्न दृश्यगुणसङ्गतिः॥

मारुतान्दोलितज्वालं शैत्यं नाग्निं सिसृप्सति॥

तस्माद्विरुद्धमुपगम्यताम्—

द्रष्टृत्वं दृश्यता चैव नैकस्मिन्नेकदा क्वचित्॥
दृश्यदृश्यो न च द्रष्टा द्रष्टृदर्शी दृशिर्न च॥३८॥

सर्वसंव्यवहारलोपश्च प्राप्नोति, यस्मात्—

द्रष्टापि यदि दृश्यायास्यात्मेयात्कर्मतां धियः॥
यौगपद्यमदृश्यत्वं वैयर्थ्यं चाप्नुयाच्छ्रुतिः॥४०॥

कुतो यस्मात्—

नात्मनुप्तदृष्टेर्दृश्यत्वं दृश्यत्वे द्रष्टृता कुतः॥
स्याच्चेद्दृगेकं निर्दृश्यं जगद्वा स्यादसाक्षिकम्॥४१॥

उक्तयुक्तिं दृढीकर्तुं आगमोदाहरणोपन्यासः—

आत्मेमन्यदृशेः सर्वं नेति नेतीति वाऽसकृत्॥
वदन्ती निर्गुणं ब्रह्म कथं श्रुतिरुपेक्ष्यते॥४२॥
महाभूतान्यहंकार इत्येतत्क्षेत्रमुच्यते॥
न दृशेर्द्वैतयोगोऽस्ति विश्वेश्वरमतादपि॥४३॥

अधुना प्रकृतार्थोपसंहारः—

एवमेतद्विरुग्ज्ञेयं मिथ्यासिद्धमनात्मकम्॥

मोहमूलं सुदुर्बोधं द्वैतं युक्तिभिरात्मनः ॥४४॥

कुतो मिथ्यासिद्धत्वं द्वैतस्येति चेत्——

न पृथङ्नात्मना सिद्धिरात्मनोऽन्यस्य वस्तुनः ॥
आत्मवत्कल्पितस्तस्मादहङ्कारादिरात्मनि ॥४५॥

तस्मादज्ञानविजृम्भितमेतत्——

दृश्याः शब्दादयः क्लृप्ता दृष्टृ च ब्रह्म निर्गुणम् ॥
अहं तदुभयं बिभ्रद्भ्रान्तिमात्मनि यच्छति ॥*॥

तत एवमभिन्नस्यात्मनो भेदबुद्धिः——

दृगेका सर्वभूतेषु भाति दृश्यैरनेकवत् ॥
जलभाजनभेदेन मयूखस्य विभेदवत् ॥१॥४७॥

यथोक्तार्थस्य प्रतिपत्तये दृष्टान्तः——

मित्रोदासीनशत्रुत्वं यथैकस्यान्यकल्पनात् ॥
अभिन्नस्य चितेस्तद्वद्भेदोऽन्तःकरणाश्रयः ॥४८॥

अपहारो* यथा भानोः सर्वतो जलपात्रकैः ॥
तत्क्रियाकृतिदेशाप्तिस्तथा बुद्धिभिरात्मनः ॥४९॥

न च विरुद्धधर्माणामेकत्वानुपपत्तिः। किं कारणम्——

कल्पितानामवस्तुत्वात्स्यादेकत्वापि संभवः ॥

कमनीया शुचिः स्वाद्वीत्येकस्यामिव योषिति ॥
नचायं क्रियाकारकफलात्मकाभास ईषदपि पर-
मार्थवस्तु स्पृशति, तस्य मोहमात्रोपादानत्वात्—
अभूताभिनिवेशेन स्वात्मानं वञ्चयत्ययम् * ॥
असत्यपि द्वितीयेऽर्थे सोमशर्मपिता यथा ॥५१॥
वस्तुयाथात्म्यानवबोधपटलावनद्धाक्षः सन्—
सुभ्रूः सुनासा सुमुखी सुनेत्रा चारुहासिनी ॥
कल्पनामात्रसंमोहाद्रामेत्यालिङ्गतेऽशुचिम् ॥
सर्वस्यानर्थजातस्य जिहासितस्य मूलमहंकार एव,
तस्यात्मनात्मोपरागाद् न तु परमार्थत आत्मनोऽवि-
द्यया तत्कार्येण * वा संबन्धोऽभूदस्ति भविष्यति
वा, तस्यापरिलुप्तदृष्टिस्वाभाव्यात्—
दृश्यानुरक्तं तद्द्रष्टृ दृश्यं द्रष्ट्रनुरञ्जितम् ॥
अहंवृत्त्योभयं रक्तं तन्नाशेऽद्वैतमात्मनः ॥५२॥
इह केचिच्चोदयन्ति योऽयमन्वयव्यतिरेकाभ्याम
नात्मतयोत्सारितोऽहङ्कारो वाक्यार्थप्रतिपत्तये-
सोऽयं विपरीतार्थः संवृत्तो यस्मादहं ब्रह्मास्मीति-

ब्रह्माहंपदार्थयोः सामानाधिकरण्यश्रवणाद्दृशना
त्मार्थेन सामानाधिकरण्यं प्राप्नोति। वक्तव्या च प्रत्य
गात्मनि तस्य वृत्तिरिति सोच्यते प्रसिद्धलक्षणा * गु-
णवृत्तिः ——

नाज्ञासिषमिति प्राह सुषुप्तादुत्थितोऽपि हि ॥
अयोदाहादिवत्तेन लक्षणं परमात्मनः ॥५४॥

प्रत्यक्त्वादतिसूक्ष्मत्वादात्मदृष्ट्यनुशीलनात् ॥
अतो वृत्तीर्विहायान्या ह्यहंवृत्त्योपलक्ष्यते ॥५५॥

आत्मना चाविनाभावमन्यथा विलयं व्रजेत् ॥
न तु पक्षान्तरं यायादतश्चाहं धियोच्यते ॥५६॥

कीदृक् पुनर्वस्तु लक्ष्यम् ——

नामादिभ्यः परो भूमा निष्कलोऽकारकोऽक्रियः ॥
स एवात्मवतामात्मा स्वतःसिद्धः स एव नः ॥५७॥

अज्ञानोत्थबुद्ध्यादिकर्तृत्वोपाधिमात्मानं परिगृह्यै-
वान्वयव्यतिरेकाभ्यामहं सुखी दुःखी चेत्यहंकारा-
देरनात्मधर्मत्वमुक्तम्। केवलात्माभ्युपगमेऽशक्य-
त्वात् फलाभावाच्च। अथेदानीमविद्यापरिकल्पि

तंसाक्षित्वमाश्रित्यकर्तृत्वाद्यशेषपरिणामप्रतिषेधा
याह——

एषसर्वधियांनृत्त*मविलुप्तैकदर्शनः॥
वीक्षतेऽवीक्षमाणोऽपि†निमिषत्तद्ध्रुवोऽध्रु-
वम्॥५८॥

ननुसर्वसिद्धान्तानामपिस्वदृष्ट्यपेक्षयोपपन्नत्वा-
दितरेतरदृष्ट्यपेक्षयाचदुःस्थितसिद्धिकत्वान्नैकत्रा-
पिविश्वासंपश्यामो,नचसर्वतार्किकैरदूषितमसम-
र्थितंच। अतोनसर्वतार्किकोपद्रवापसर्पणायवर्त्म-
संभावयामः। उच्यते। विस्रब्धैःसंभाव्यतामनुभवमा-
त्रशरणत्वात्सर्वतार्किकप्रस्थानानां,तदभिधीयते——

इमंप्राश्निकमुद्दिश्यतर्कज्वरभृशातुराः॥
त्वाचित्घरस्कवचोजालै*र्मोहयन्तीतरेतरम्॥५९

अत्रापिचोदयति। अनुभवात्मनोऽपिविक्रियाभ्युप-
गमेऽनभ्युपगमेऽपिदोषएवयस्मादाह——

वर्षातपाभ्यांकिंव्योम्नश्चर्मण्येवतयोःफलम्॥
चर्मोपमश्चेत्सोऽनित्यःखतुल्यश्चेदसत्समः॥६०

बुद्धिजन्मनि पुंसश्च विकृतिर्यद्यनित्यता॥
अथाविकृतिरेवायं प्रमातेति न युज्यते॥६१॥

अस्य परिहारः——

ऊर्ध्वं गच्छति धूमे खं भिद्यते स्विन्न भिद्यते॥
न भिद्यते चेत्स्यास्तु त्वं भिद्यते चेच्छिदाऽस्य का॥

इत्येतत्प्रतिपत्त्यर्थ*माह——

अविक्रियस्य भोक्तृत्वं स्यादहंबुद्धिविभ्रमात्॥
नौयानविभ्रमाद्यद्वन्नगेषु गतिकल्पनम्॥६३॥

यथोक्तार्थाविष्करणाय दृष्टान्तान्तरोपादानम्——

यथा जात्यमणेः शुभ्रा ज्वलन्ती निश्चला शिखा*॥
संनिध्यसंनिधानेषु घटादीनामविक्रिया॥६४॥

अयमत्रांशो विवक्षित इति ज्ञापनायाह——

यदवस्थाव्यनक्तीति तदवस्थैव सा पुनः॥
भण्यते न व्यनक्तीति घटादीनामसंनिधौ॥६५॥

तत्र च——

सर्वधीव्यञ्जकस्तद्वत्परमात्मा प्रदीपकः*॥
संनिध्यसंनिधानेषु धीवृत्तीनामविक्रियः॥६६॥

नप्रकाशक्रियाकाचिदस्यस्वात्मनिविद्यते॥
उपचारात्क्रियासाऽस्ययःप्रकाश्यस्यसंनिधिः॥
मेवंशङ्किष्ठाःसांख्यराद्धान्तोऽयमिति। यतः——
यथाविशुद्धआकाशेसहसैवाभ्रमण्डलम्॥
भूत्वाविलीयतेतद्वदात्मनीहाखिलंजगात्॥६८॥
तस्मादेषकूटस्थोनद्वैतंमनागपिस्पृशति। यतः——
शब्दाद्याकारनिर्भासाःक्षणप्रध्वंसिनीदृशा॥
नित्योऽक्रमदृगात्मैकोव्याप्नोतीवधियोऽनिशम्॥
एवंचसतिबुद्धेःपरिणामित्वंयुक्तम्——
अतीतानागतेहत्यान्युगपत्सर्वगोचरान्॥
वेत्त्यात्मवन्नधीर्यस्मात्तेनेयंपरिणामिनी॥७०॥
ततश्चैतत्सिद्धम्——
अपश्यन्पश्यतींबुद्धिमशृण्वन्शृण्वतींतथा
निर्मलोऽविक्रियोऽनिच्छन्निच्छन्तींचाप्यलु-
प्तदृक्*॥७१॥द्विषन्तीमद्विषन्नात्माकुप्यन्तीं
चाप्यकोपनः॥निर्दुःखोदुःखिनींचैवनिःसुखःसु-
खिनीमपि॥७२॥प्रमुह्यमानोमुह्यन्तींकल्पयन्ती

विकारैकात्म्यंप्रतिपादितमुपपत्तिभिः। अथाधुनाश्रौ
तींप्रक्रियामवलम्ब्योच्यते ———

अस्तुवापरिणामोऽस्यदृशेःकूटस्थरूपतः॥
कल्पितोऽपिमृषैवासौदण्डस्येवाप्सुवक्रता॥८४॥
षट्सुभावविकारेषु* निषिद्धेष्वेवमात्मनि॥
दोषःकश्चिदिहासङ्क्तुंनशक्यस्तार्किकश्वभिः॥

प्रकृतमेवोपादायबुद्धेःपरिणामित्वमात्मनश्चकूटस्थ-
त्वंयुक्तिभिरुच्यते ———

प्रत्यर्थंतुविभिद्यन्तेबुद्धयोविषयोन्मुखाः॥
नभिदाऽवगतेस्तद्वत्सर्वास्ताश्चिन्निभायतः॥८६

स्वसंवेद्यार्थएव* ———

सावशेषपरिच्छेदिन्यतएवनकृत्स्नवित्॥
नोचेत्परिणमेद्बुद्धिःसर्वज्ञासाऽऽत्मवद्भवेत्॥

अतोऽवगतेरेकत्वात् ———

चण्डालबुद्धेर्यद्द्रष्टृतदेवब्रह्मबुद्धिदृक्॥
एकंतदुभयोर्ज्योतिर्भास्यभेदादनेकवत्॥८८॥

कस्मात् ———

अवस्थादेशकालादिभेदोनास्त्यनयोर्यतः॥
तस्माज्जगद्धियांवृत्तंज्योतिरेकंसदेक्ष्यते॥८८॥
सर्वदेहेष्वात्मैकत्वेप्रतिबुद्धपरमार्थतत्त्वस्यापिप्र-
प्रतिबुद्धदेहसंबन्धादशेषदुःखसंबन्धइतिचेत्तन्न——
बोधात्प्रागपिदुःखित्वंनान्यदेहोत्थमस्तिनः॥
बोधादूर्ध्वंकुतस्तत्स्याद्यत्रस्वगतमप्यसत्*॥
नचेयंस्वमनीषिकेतिग्राह्यं,कुतः,श्रुत्यवष्टम्भात्——
शब्दाद्याकारनिर्भासाहानोपादानधर्मिणी॥
भास्येत्याहश्रुतिर्दृष्टिमात्मनोऽपरिणामिनः॥९१
कात्वसौश्रुतिः——
दृष्टेर्द्रष्टारमात्मानंनपश्येर्दृश्यमानया॥
विज्ञातारमरेकेनविजानीयाद्धियांपतिम्॥९२॥
यस्मात्सर्वप्रमाणोपपन्नोऽयमर्थस्तस्मादतोऽन्यथा
वादिनोजात्यन्धाइवानुकम्पनीयाइत्याह——
तदेतदद्वयंब्रह्मनिर्विकारंकुबुद्धिभिः॥
जात्यन्धराजहस्त्येवकोटिशःपरिकल्प्यते॥९३॥
प्रमाणोपपन्नस्यार्थस्यासंभावनात्तदनुकम्पनीयत्व-

सिद्धि, स्तदेतदाह ———

यद्यद्विशेषणं दृष्टं नात्मनस्तदनन्वयात्॥
खस्य कुम्भादिवत्तस्मादात्माऽस्यान्निर्विशेषणः॥

अतश्चात्मनो भेदासंस्पर्शो भेदस्य मिथ्यास्वाभाव्याद-
तश्चाह ———

अवगत्यात्मनो यस्मादागमापायिकुम्भवत्॥
साहङ्कारमिदं विश्वं तस्मात्तस्यात्कचादिवत्॥८५॥

सर्वस्यैवानुमानव्यापारस्य फलमियदेव यद्विवेकग्रहणं,
तदुच्यते ———

बुद्धेरनात्मधर्मत्वमनुमानात्प्रसिध्यति॥
आत्मनोऽप्यद्वितीयत्वमात्मत्वादेव सिध्यति॥८६

यद्यप्ययं ग्रहीतृग्रहणग्राह्यगृहीतितत्फलात्मक आब्रह्म स्तम्बपर्यन्तः संसारोऽन्वयव्यतिरेकाभ्यामनात्मतया निर्माल्यवदपविद्धस्तथापि तु नैवासौ स्वतः सिद्धात्मव्यतिरिक्तोऽनात्मप्रकृतिपदार्थव्यपाश्रयः साङ्ख्यानामिव, किं तर्हि स्वतः सिद्धाऽनुदिताऽनस्तमितकूटस्थाऽऽत्मप्रज्ञानमात्रशरीरप्रतिबिम्बितोऽविचारितसि-

ह्यात्मानवबोधाश्रयएव,तदुपादानत्वात्तस्येतीममर्थं
निर्वक्तुकामःप्राह ———

ऋतेज्ञानंनसन्त्यर्थाअस्तिज्ञानमृतेऽपितान्॥
एवंधियोहिरूपज्योतिर्विविच्यादनुमानतः॥८७॥

यस्मात्प्रमाणप्रमेयव्यवहारआत्माऽनवबोधाश्रय-
एवतस्मात्सिद्धमात्मनोऽप्रमेयत्वं,नैवहिकार्यस्वका-
रणमतिलङ्घ्याऽन्यत्राऽकारकेप्यास्पदमुपनिब-
ध्नात्यतआह ———

व्यवधीयन्तएवामीबुद्धिदेहघटादयः॥
आत्मत्वादात्मनःकेनव्यवधानंमनागपि॥८८॥

स्वयमनवगमात्मकत्वा,दनवगमात्मकत्वंचमोह-
मात्रोपादानत्वात् ———

प्रमाणमन्तरेणैषांबुद्ध्यादीनामसिद्धता॥
अनुभूतिफलार्थित्वादात्मज्ञःकिमपेक्षते॥८९॥

वक्ष्यमाणेतरेतराध्याससिद्ध्यर्थमुक्तव्यतिरेकानु-
वादः ———

घटबुद्धेर्घटाच्चार्थाद्द्रष्टुर्यद्वद्विभिन्नता॥

अहंबुद्धेरहंगम्याद्दुःखिनश्चतथादृशेः॥१००॥

एवमेतयोरात्मानात्मनोः स्वतःपरतः सिद्धयोर्ज्ञौधिकरज्जुसर्पाध्यारोपवदविद्योपाश्रयएवेतरेतराध्यारोपइत्येतदाह——

अभ्रयानंयथामोहाच्चशाभृत्यध्यवस्यति॥

सुखित्वादीन्धियोधर्मास्तद्वदात्मनिमन्यते॥१॥

दग्धृत्वंचयथावन्हेरयसीमन्यतेकुधीः ॥

चैतन्यंतद्वदात्मीयंमोहात्कर्त्तरिमन्यते॥२॥

सर्वएवायमात्मानात्मविभागः प्रत्यक्षादिप्रमाणवर्त्मन्यनुपातितोऽविद्योत्सङ्गवर्त्त्येवनपरमात्मव्यपाश्रयः॥ अस्याश्चाविद्यायाः सर्वानर्थहेतोः कुतोनिवृत्तिरितिचेत्तदाह——

दुःखराशेर्विचित्रस्यसेयंभ्रान्तिश्चिरन्तनी॥

मूलंसंसारवृक्षस्यतद्बाधस्तत्त्वदर्शनात्॥३॥

तद्बाधस्तत्त्वदर्शनादितिकुतः सम्भाव्यतइतिचेदतआह, आगोपालाविपालपण्डितमियमेवप्रसिद्धिः——

अप्रमोत्थं प्रमोत्थेन ज्ञानं ज्ञानेन बाध्यते ॥
अहिरज्ज्वादिवद्बाधो देहाद्यात्ममतेस्तथा ॥४॥

लौकिकप्रमेयवैलक्षण्यादात्मनो नेहानधिगताधिगमः प्रमाणफलम् ——

अविद्यानाशमात्रं तु फलमित्युपचर्यते ॥
नाज्ञातज्ञापनं न्याय्यमवगत्येकरूपतः ॥५॥

यस्मादात्मानवबोधमात्रोपादानाः प्रमात्रादयस्तस्मात् ——

न विदन्त्यात्मनः सत्तां द्रष्टृदर्शनगोचराः ※॥
न चान्योन्यमतोऽमीषां ज्ञेयत्वं भिन्नसाधनम् ॥६॥

द्रष्ट्रादेरसाधारणरूपज्ञापनायाह ——

बाह्यप्राकारवान् ग्राह्यो ग्रहणं निश्चयादिमत् ॥
अन्वय्यहमिति ज्ञेयः साक्षीत्वात्मा ध्रुवः सदा ॥७॥

सर्वकारकक्रियाफलविभागात्मकसंसारशून्यप्रात्मेतिकारकक्रियाफलविभागसाक्षित्वादात्मनस्तदाह ——

ग्राहकग्रहणग्राह्यविभागे योऽविभागवान् ※॥

हानोपादानयोःसाक्षीहानोपादानवर्जितः॥८॥

ग्राहकादिनिष्ठैवग्राहकादिभावाभावविभागसिद्धिः कस्मान्नेतिचेत्तदाह ——

स्वसाधनंस्वयंनष्टोननाशंवेत्त्यभावतः॥

अतएवनचान्येषामतोऽसौभिन्नसाक्षिकः॥९॥

ग्राहकादेरन्यसाक्षिपूर्वकत्वसिद्धेः स्वसाक्षिणोऽप्यन्यसाक्षिपूर्वकत्वादनवस्थेतिचेत्तन्न, साक्षिणो व्यतिरिक्तहेत्वनपेक्षत्वात् * । अतआह ——

धीवन्नापेक्षतेसिद्धिमात्माऽन्यस्मादविक्रियः॥

निरपेक्षमपेक्ष्यैवसिध्यत्यन्येनतुस्वयम्॥१०॥

यतोग्राहकादिष्वात्मभावोऽविद्यानिबन्धनएवतस्मात् ——

अन्वयव्यतिरेकाभ्यांविभज्यानात्मनःस्वयम्॥

उत्पत्तिस्थितिनाशेषुयोऽवगत्यैववर्तते॥

जगतोऽविकारयाऽवेहितमस्मीतिननश्वरम्॥११॥

स्वतःसिद्धात्मचैतन्यप्रतिबिम्बिताऽविचारितसिद्धिकात्मानवबोधोत्थेतरेतरस्वभावापेक्षसिद्धत्वा-

त्स्वतश्चासिद्धेरनात्मनो द्वैतेन्द्रजालस्य—

नस्वयंस्वस्यनानात्वंनावगत्यात्मनायतः॥

नोभाभ्यामप्यतःसिद्धमद्वैतंद्वैतबाधया॥१२॥

यथोक्तार्थप्रतिपत्तिदृढिम्नेश्रुत्युदाहरणोपन्यासः—

नित्यावगतिरूपत्वात्कारकादिर्नचात्मनः॥

अस्थूलंनेतिनेतीतिनजायतइतिश्रुतिः॥१३॥

सर्वस्यास्यग्राहकादेर्द्वैतप्रपञ्चस्याऽऽत्मानवबोधमा-
त्रोपादानस्यस्वयंसेद्धुमशक्यत्वात्,आत्मसिद्धे*
श्चानुपादेयत्वात्—

आत्मनश्चेन्निवार्यन्तेबुद्धिदेहघटादयः॥

षष्ठगोचरकत्स्मा*स्तेविज्ञेयाःपरमार्थतः॥१४॥

कुतोन्यायबलादेवंनिश्चितंप्रतीयते,यस्मात्—

नित्यांसंविदमाश्रित्यस्वतःसिद्धामविक्रियाम्॥

सिद्ध्यन्तेधियोबोधास्तांश्चाश्रित्यघटादयः॥

यस्मान्नकयाचिदपियुक्त्याऽऽत्मनःकारकत्वंक्रिया-
त्वंफलत्वंचोपपद्यतेतस्मादात्मवस्तुयाथात्म्यानव-
बोधमात्रोपादानत्वान्नभसीवरजोधूमतुषारनीहार-

नीलत्वाद्यध्यासो यथोक्तात्मनि सर्वोऽयं क्रियाका-
रकफलात्मकसंसारोऽहंममत्वयत्नेच्छादिमिथ्या-
ध्यासस्यैवेति सिद्धम्। इममर्थमाह——

अहंमिथ्याभिशापेन दुःख्यात्मा तद्बुभुत्सया*॥
इतः श्रुतिं तयानेतीत्युक्तः कैवल्यमास्थितः ९६॥

तस्यास्य मुमुक्षोः श्रौताद्वचसः स्वप्ननिमित्तोत्सारि-
तनिद्रस्येवेयं निश्चितार्थाप्रमा जायते——

नाऽहं न च ममाऽऽत्मत्वात्सर्वदानात्मवर्जितः॥
भानाविवतमोऽध्यासोऽपह्नवश्च तथा मयि॥९७

सोऽयमेवं प्रतिपन्नस्वभाव*मात्मानं प्रतिपन्नोऽनु-
क्रोशति——

यत्र त्वस्येति साटोपं कृत्स्नद्वैतनिषेधिनीम्॥
मत्सारयन्तीं संसारमप्यश्रौषं न किं श्रुतिम्॥
इत्यो मित्यवबुद्धात्मा निष्कलोऽकारकोऽ
क्रियः॥...॥विरक्त इव बुद्ध्यादेरेकाकित्व-
मुपेयिवान्॥९८॥ इति श्रीमत्सुरेश्वराचार्यवि
रचितायां नैष्कर्म्यसिद्धौ संबन्धाख्यायां द्वितीयोऽध्या-

यः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ अथ तृतीयोऽध्यायः ॥

॥ श्रीमद्गुरुचरणकमलेभ्यो नमो नमः ॥

सर्वोऽयं प्रमितिप्रमाणप्रमेयप्रमातृलक्षण आब्रह्मस्तम्बपर्यन्तो मिथ्याध्यास एवेति बहुश उपपत्तिभिरभिहितम् * । आत्मा च जन्मादिषड्भावविकारवर्जितः कूटस्थबोध एवेति स्फुटीकृतम् । तयोश्च मिथ्याध्यासकूटस्थात्मनोर्नान्तरेणाज्ञानं संबन्धोऽन्यत्र चोदनापरिप्रापितात् यथे "यमेवऋगाविनः सामे" *ति । तच्चाज्ञानं स्वात्ममात्रनिमित्तं न संभवतीति कस्यचित्कस्मिंश्चिद्विषये भवतीत्यभ्युपगन्तव्यम् । इह च पदार्थद्वयं निर्द्धारितमात्माऽनात्मा च । तत्राऽनात्मनस्तावन्नाऽज्ञानेनाऽभिसंबन्धः । तस्य हि स्वरूपमेवाज्ञानं, न हि स्वतोऽज्ञानस्याज्ञानं घटते संभवदप्यज्ञानस्वभावेऽज्ञानं कमतिशयं जनयेत् । न च तत्र ज्ञानप्राप्तिरस्ति येन तत्प्रतिषेधात्मकमज्ञानं स्यात् । अनात्मनश्चाज्ञानप्रसूतत्वात् । नहि पूर्वसिद्धं सत्ततो लब्धात्मला-

मस्य सेत्स्यतश्चाश्रयस्या*श्रयि संभवति। तदनपेक्ष
स्य च तस्य निःस्वभावत्वात्। एतेभ्य एव हेतुभ्यो ना-
नात्मविषयमज्ञानं संभवतीति ग्राह्यम्। एवं तावन्ना
ऽनात्मनोऽज्ञानित्वं नापि तद्विषयमज्ञानं पारिशे-
ष्यादात्मन एवास्त्वज्ञानं तस्याज्ञोऽस्मीत्यनुभवद-
र्शनात्। "सोऽहं भगवो मन्त्रविदेवास्मि नात्मव-
दि" ति श्रुतेः। न चात्मनोऽज्ञानस्वरूपता तस्य चैत
न्यमात्रस्वाभाव्याद् तिशयश्च संभवति ज्ञानपरि
लोपो ज्ञानप्राप्तेश्च संभवस्तस्य ज्ञानकारित्वात्।
न चाज्ञानकार्यत्वं, कूटस्थात्मस्वाभाव्यात्। अज्ञा-
नानपेक्षस्य चात्मनः स्वत एव स्वरूपसिद्धेर्युक्तमा
त्मन एवाज्ञत्वम्। किंविषयं पुनस्तदात्मनोऽज्ञा-
न, मात्मविषयमिति ब्रूमः।...। नन्वात्मनोऽपि ज्ञा-
नस्वरूपत्वादनन्यत्वाच्च* ज्ञानप्रकृतित्वादिभ्यो
हेतुभ्यो नैवाज्ञानं घटते। घटत एव। कथम्। अज्ञा
नमात्रनिमित्तत्वात्तद्विभागस्य, सर्पात्मतेव रज्ज्वाः।
तस्मात्तदपनुत्तौ द्वैतानर्थाभावः। तदपनोदश्च-

वाक्यादेव तत्पदपदार्थाभिज्ञस्य, अतो वाक्यव्याख्यानायाध्याय* आरभ्यते ॥ तत्र यथोक्तेन प्रकारेण तत्त्वमस्यादिवाक्योपनिविष्टपदपदार्थयोः*

कृतान्वयव्यतिरेकः ———

यदानात त्त्वमस्यादेर्ब्रह्मास्मीत्यवगच्छति ॥

प्रध्वस्ताहंममो नैति तदा गोर्मनसोः स्मृतिम् ॥१॥

यदैव तदर्थं त्वमर्थोऽवैति तदैव वाक्यार्थतां प्रतिपद्यते गोर्मनसोः स्मृतिं न प्रतिपद्यत इति । कुतस्तदध्यवसीयते । यस्मात् ———

तत्पदं प्रकृतार्थं स्यात्त्वंपदं प्रत्यगात्मनि* ॥

नीलोत्पलवदेताभ्यां दुःखनात्मत्ववारणे ॥२॥

एवं कृतान्वयव्यतिरेको वाक्यादेवाऽवाक्यार्थं* प्रतिपद्यत इत्युक्तम् । अतस्तद्व्याख्यानाय सूत्रोपन्यासः ———

सामानाधिकरण्यं च विशेषणविशेष्यता ॥

लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥३॥

अस्मिन् सूत्रे उपन्यस्ते कश्चिच्चोदयति, योऽयं वा-

क्यार्थप्रतिपत्तौ पूर्वाध्यायेनान्वयव्यतिरेकलक्षणो न्यायः सर्वकर्मसंन्यासपूर्वकोऽभिहितः किमयं विधिपरिप्रापितः किं वा स्वरसत एवात्र पुमान्प्रवर्तत इति । किं चातः, शृणु । यद्यात्मवस्तुसाक्षात्करणाय विधिप्रापितोऽयं न्यायस्तदाऽवश्यमात्मवस्तुसाक्षात्करणाय व्यावृत्तशुभाशुभकर्मराशि* रेकाग्रमना अन्वयव्यतिरेकाभ्यां यथोक्ताभ्यामात्मदर्शनं करोति, अपरिसमाप्यात्मदर्शनं ततः प्रच्यवमानः आरूढपतितो भवति । यदि पुनर्यदृच्छातः प्रवर्तते तदा न कश्चिद्दोषः इति विधिपरिप्रापित-इति ब्रूमः । यत आह ——

शमादिसधनः पश्येदात्मन्यात्मानमञ्जसा ।
अन्वयव्यतिरेकाभ्यां त्यक्त्वा युष्म*दशेषतः ॥ ४
युष्मदर्थे परित्यक्ते पूर्वोक्तैर्हेतुभिः श्रुतिः ।
वीक्षापन्नस्य कोऽस्मीति तत्त्वमित्याह सौहृदात् ॥

अत्रापि चोदयन्ति सांख्याः । शरीरेन्द्रियमनोबुद्धिष्वनात्मस्वात्मेति निस्संधिबन्धनं मिथ्याज्ञानं-

तन्निबन्धनो ह्यात्मनोऽनेकानर्थसम्बन्धस्तस्य चाऽन्वयव्यतिरेकाभ्यामेव निरस्तत्वान्निर्विषयं तत्त्वमस्यादिवाक्यं प्राप्तम्। तस्माद्वाक्यस्य चैष महिमा योऽयमात्मानात्मनोर्विभाग इति*। तन्निराकरणायेदमुच्यते——

भेदसंविदिदं ज्ञानं भेदाभावश्च साक्षिणि।
कार्यमेतदविद्याया ज्ञात्मनात्याजयेद्वचः॥६॥

'ज्ञात्मनात्यजयेद्वच' इत्युपश्रुत्याह कश्चिन्मिथ्याज्ञानव्यतिरेकेणात्माऽनवबोधस्याऽभावात् किं वाक्येन निवर्त्यते। अज्ञानं हि नामाज्ञानाभावः, तस्य चाऽवस्तुस्वाभाव्यात्कुतः संसारकारणत्वम्। न ह्यसतः सज्जन्मेष्यते। "कुतस्तु खलु सोम्यैवं स्यादिति कथमसतः सज्जायेत" इति श्रुतेरित्यत्रोच्यते——

अज्ञात एव सर्वोऽर्थः प्राग्यतो बुद्धिजन्मनः।
एकेनैव सता संश्च* सन्नज्ञातो भवेत्ततः॥७॥

'सन्नज्ञातो भवेत्तत' इत्युक्तमधस्तनेन श्लोकेन, कोऽसौ सन्नज्ञात इत्यपेक्षायां तत्स्वरूपप्रतिपादनायाह——

प्रमित्सायां यष्टाभाति स्वयं मातृप्रमाणयोः ॥
स्वमहिम्ना * च यः सिद्धः सोऽज्ञातार्थोऽवसी-
यताम् ॥८८॥

अत्र केचिदाहुर्यत्किञ्चिदिह वाक्यं लौकिकं वैदिकं वा तत्सर्वं संसर्गात्मकमेव वाक्यार्थं गमयति । अतस्तत्त्वमस्यादिवाक्येभ्यः संसर्गात्मकमहं ब्रह्मेति विज्ञाय तावन्निदिध्यासीत यावदवाक्यार्थात्मकः प्रत्यगात्मकः प्रत्यगात्मविषयोऽहं ब्रह्मेति समभिजायते तस्मादेवं विज्ञानात्कैवल्यमाप्नोतीति तन्निराकरणायेदमुच्यते——

सामानाधिकरण्यादेर्घटेतरखयोरिव ॥
व्यावृत्तेः स्यादवाक्यार्थः साक्षान्नस्तत्त्वम-
र्थयोः ॥८९॥

कुतोऽवाक्यार्थोऽवसीयत इति चेत्तत्प्रतिपत्त्यर्थं विशेषणविशेष्ययोः सामर्थ्योक्तिः——

निर्दुःखित्वं त्वमर्थस्य तदर्थेन विशेषणात् ॥
प्रत्यक्त्वा * च तदर्थस्य त्वंपदेनास्य सन्निधेः ॥९०॥

उक्तं सामानाधिकरण्यं विशेषणविशेष्यभावश्च संक्षेपतः। अथ लक्ष्यलक्षणव्याख्यानायाह—

कूटस्थबोधप्रत्यक्तमनिमित्तं सदात्मनः॥
बोद्धृताहन्तयोर्हेतुस्ताभ्यां तेनोपलक्ष्यते॥११॥

....बुद्धेः कूटस्थबोधप्रत्यक्त्वानिमित्ते बोद्धृताप्रत्यक्त्वे ये त्वसाधारणे तयोर्विशेषवचनम्—

बोद्धृता कर्तृता बुद्धेः कर्मता स्यादहन्तया॥
तयोरैक्यं यथा बुद्धौ पूर्वयोरेवमात्मनि॥१२॥

यथा बुद्धौ पूर्वयोरेवमात्मनीत्यतिदेशेन बुद्धिसाधर्म्यविधानान्नानात्वप्रसक्तौ तदपवादार्थमाह—

धर्मधर्मित्वभेदोऽस्याः सोऽपि नैवात्मनो यतः॥
प्रत्यग्ज्योतिरतोऽभिन्नं भेदहेतोरसंभवात्॥१३॥

भेदहेत्वसंभवं दर्शयन्नाह—

न कस्यांचिदवस्थायां बोधप्रत्यक्त्वयोर्भिदा॥
व्यभिचारोऽथवा दृष्टो यथाऽहंतद्धियोः सदा॥१४॥

यस्मादज्ञानोपादानायास्त्वबुद्धेर्भेदो न त्वात्मनस्तस्मादेतत्सिद्धम्—

कूटस्थबोधतोऽद्वैतं साक्षात्त्वं * प्रत्यगात्मनः ॥
कूटस्थबोधाद्बोद्धृ री धीः स्वतो ह्रीयं विनश्वरी ॥

अथाधुना प्रकृतस्यैव परिणामिनः कूटस्थस्य च लक्षणमुच्यते——

विशेषं कंचिदाश्रित्य यत्स्वरूपं प्रतीयते ॥
प्रत्यभिज्ञाप्रमाणेन परिणामी स देहवत् ॥१६॥
सामान्याच्च विशेषाच्च स्वमहिम्नैव यो भवेत् ॥
व्युत्थायाप्यविकारी स्यात्कुम्भाऽऽकाशादिवत्तु नः ॥१७॥

आत्मनो बुद्धेश्च बोधप्रत्यगात्मत्वमभिहितं, तयोरसाधारणलक्षणाभिधानार्थमाह——

बुद्धेर्यत्प्रत्यगात्मत्वं तत्स्याद्देहाद्युपाश्रयात् ॥
आत्मनस्तु स्वरूपं तन्नभसः सुषिता यथा ॥१८॥
बोद्धृत्वं तद्बुद्धेवास्याः प्रत्ययोत्पत्तिहेतुतः * ॥
आत्मनस्तु स्वरूपं तत्तिष्ठन्तीव महीभृतः ॥१९॥

तयोः कूटस्थपरिणामिनोरात्माऽनवबोध एव संबन्धहेतुर्न पुनर्वास्तवः कश्चिदपि संबन्ध उपपद्यते

इत्याह——

सम्यक्संशयमिथ्यात्वैर्धीरेवेयं विभज्यते ॥
हीनोपादानताऽमीषां मोहादध्यस्यते दृशौ ॥२०॥

कुतः कूटस्थात्मसिद्धिरिति चेद्यतः——

न हानं हानमात्रेण नोदयोऽपीयतायतः ॥
तत्सिद्धिः स्यात्तु तद्धीने हानादानविधर्मिणि ॥२१॥

एवम्——

आगमाऽपायिहेतुभ्यां धृत्वा सर्वाननात्मनः ॥
ततस्तत्त्वमसीत्येतद्यस्मादिद्धं निजं तमः ॥२२॥

इत्यादि पुनः पुनरुच्यते। ग्रन्थलाघवाद्बुद्धिलाघवं प्रयोजकमिति। तत्र यद्यपि तत्त्वमस्यादिवाक्यादुपादित्सिताद्द्वितीयात्मार्थवत्पारोक्ष्यसद्वितीयार्थः प्रतीयते तथाऽपि तु नैवासावर्थः श्रुत्या तात्पर्येण प्रतिपिपादयिषितः प्रागप्येतस्य प्रतीतत्वादितीममर्थमाह——

तदित्येतत्पदं लोके बह्वर्थप्रतिपादकम् ॥
अपरित्यज्य पारोक्ष्यमभिधानोत्थमेव तत् ॥२३॥
त्वमित्यपि पदं तद्वत्साक्षान्मात्रार्थवाचि तु ॥

संसारितामसंत्यज्य साऽपि स्यादभिधानजा ॥२४॥

विरुद्धोद्देशनत्वाच्च पारोक्ष्यदुःखित्वयोरविवक्षितत्वमित्याह——

उद्दिश्यमानं वाक्यस्थं नोद्देशेन गुणान्वितम् ॥
आकाङ्क्षितपदार्थेन संसर्गं प्रतिपद्यते ॥२५॥

यतस्तदेवमतोऽनुपादित्सितयोरपि ॰ तत्त्वमर्थयोर्विशेषणविशेष्यभावो भेदसंसर्गरहिता वाक्यार्थलक्षणयैवेति उपसंहारः——

तदो विशेषणार्थत्वं विशेष्यत्वं त्वमस्तथा ॥
लक्ष्यलक्षणसंबन्धस्तयोः स्यात्प्रत्यगात्मना ॥

कथं पुनरविवक्षितविरुद्धनिरस्यमानस्य लक्षणार्थत्वम्——

लक्षणं सर्पवद्रज्ज्वाः प्रतीचः स्यादहं तथा ॥
तद्बाधेनैव वाक्यार्थं वेत्ति सोऽपि तदाश्रयात् ॥

इयं चाऽवाक्यार्थप्रतिपत्तिरन्वयव्यतिरेकाभिज्ञस्यैव, यस्मात्——

यावद्यावन्निरस्याऽयं देहादीन्प्रत्यगञ्चति ॥

तावत्तावत्तदर्थोऽपि त्वमर्थं प्रविविक्षति ॥२८॥

कस्मात्पुनःकारणाद्देहाद्यनात्मत्वप्रतिपत्तावेवा-
त्मा तदर्थमात्मत्वेनाऽभिलिङ्गते न विपर्यय इति, उ-
च्यते। प्रत्यगात्माऽनवबोधस्याऽनात्मस्वाभाव्या-
त्तदभिनिर्वृत्तश्चाहंबुद्ध्यादिदेहान्तस्तस्मिन्नात्मत्व-
मविद्याकृतमेवाऽऽत्मत्वमिवाऽनात्मत्वमपिस-
ऽविद्यस्यैव, यतो निरविद्यो विद्वान्वाक्यार्थस्व-
स्वकेवलोऽवशिष्यते तस्मादुच्यते—

देहादिव्यवधानत्वात्तदर्थं स्वयमप्यतः ।
परोक्ष्येणैव जानाति साक्षात्त्वं तदनात्मनः ॥

यथोक्तार्थप्रतिपत्तिसौकर्याय दृष्टान्तोपादानम्—

प्रत्यगुद्भूतपित्तस्य यथा बाह्यार्थपीतता ।
चैतन्यं प्रत्यगात्मीयं बहिर्वद्दृश्यते तथा ॥३०॥

यस्मादेवमतो विशुद्धमवसीयताम्—

पदानुद्धृत्य वाक्येभ्यो ह्यन्वयव्यतिरेकतः ।
पदार्थाँल्लोकतो बुद्ध्वा वेत्ति वाक्यार्थमञ्जसा * ॥

कुतः पुनः सामान्यमात्रवृत्तेः पदस्य वाक्यार्थप्रति-

संसारितामसंत्यज्य साऽपि स्याद‌भिधानजा॥२४॥

विरुद्धो देशनत्वाच्च पारोक्ष्यदुःखित्वयोरविवक्षितत्वमित्याह——

उद्दिश्यमानं वाक्यस्थं नोद्देशेन गुणान्वितम्॥
आकाङ्क्षितपदार्थेन संसर्गं प्रतिपद्यते॥२५॥

यतस्तदेवमतोऽनुपादित्सितयोरपि ∴ तत्त्वमर्थयोर्विशेषणविशेष्यभावो भेदसंसर्गरहिता वाक्यार्थलक्षणयैवेति उपसंहारः——

तदो विशेषणार्थत्वं विशेष्यत्वं त्वमस्तथा॥
लक्ष्यलक्षणसंबन्धस्तयोः स्यात्प्रत्यगात्मना॥

कथं पुनरविवक्षितविरुद्धनिरस्यमानस्य लक्षणार्थत्वम्——

लक्षणं सर्पवद्रज्ज्वाः प्रतीचः स्यादहं तथा॥
तद्बाधेनैव वाक्यार्थं वेत्ति सोऽपि तदाश्रयात्॥

इयं चाऽवाक्यार्थप्रतिपत्तिरन्वयव्यतिरेकाभिज्ञस्यैव, यस्मात्——

यावद्यावन्निरस्याऽयं देहादीन्प्रत्यगच्छति॥

तावत्तावत्तदर्थोऽपि त्वमर्थं प्रविविक्षति ॥२९॥

कस्मात्पुनः कारणाद्देहाद्यनात्मत्वप्रतिपत्तावेवाऽत्मा तदर्थमात्मत्वेनाऽभिलिङ्गते न विपर्ययइति, उच्यते। प्रत्यगात्माऽनवबोधस्याऽनात्मस्वाभाव्यात्तदभिनिर्वृत्तश्चाहंबुद्ध्यादिदेहान्तस्तस्मिन्नात्मत्वमविद्याकृतमेवाऽऽत्मत्वमिवाऽनात्मत्वमपि साऽविद्यस्यैव, यतो निरविद्यो विद्वानवाक्यार्थरूपस्वकेवलोऽवशिष्यते तस्मादुच्यते ———

देहादिव्यवधानत्वात्तदर्थं स्वयमप्यतः।

परोक्ष्येणैव जानाति साक्षात्त्वं तदनात्मनः॥

यथोक्तार्थप्रतिपत्तिसौकर्याय दृष्टान्तोपादानम् ———

प्रत्यगुद्भूतपित्तस्य यथा बाह्यार्थपीतता।

चैतन्यं प्रत्यगात्मीयं बहिर्वद्दृश्यते तथा ॥३०॥

यस्मादेवमतो विशुद्धमवसीयताम् ———

पदान्युद्धृत्य वाक्येभ्यो ह्यन्वयव्यतिरेकतः।

पदार्थांल्लोकतो बुद्ध्वा वेत्ति वाक्यार्थमञ्जसा॥

कुतः पुनः सामान्यमात्रवृत्तेः पदस्य वाक्यार्थप्रति-

पत्तिहेतुत्वमिति, बाढम्

सामान्यं हि पदं ब्रूते विशेषो वाक्यकर्तृकः ॥
श्रुत्यादिप्रतिबद्धं सद्विशेषार्थं भवेत्पदम् ॥ ३२ ॥

अन्वयव्यतिरेकपुरःसरं वाक्यमेव सामानाधिकरण्यादिनाऽविद्यापटलप्रध्वंसद्वारेण मुमुक्षुं स्वाराज्येऽभिषेचयति न त्वन्वयव्यतिरेकमात्रसाध्योऽयमर्थ इत्याह

बुद्ध्यादीनामनात्मत्वं लिङ्गादपि च सिध्यति ॥
निवृत्तिस्तावता नैतीत्यतो वाक्यं समाश्रयेत् ॥ ३३ ॥

न केवलमनुमानमात्रशरणोऽभिलषितमर्थं न प्राप्नोतीत्यनर्थं * च प्राप्नोतीत्याह

अनादृत्य श्रुतिं मोहादतो बौद्धास्तमस्विनः ॥
आपेदिरे निरात्मत्वमनुमानैकचक्षुषः ॥ ३४ ॥

न चानादरे कारणमस्ति यस्मात्सर्वत्रैवाऽनादरनिमित्तं प्रमाणस्य प्रमाणान्तरप्रतिपन्नप्रतिपादनं वा विपरीतप्रतिपादनं संशयितप्रतिपादनं वा न वाऽप्रतिपादनमिति । न चैतेषामन्यतमदपि कार-

णमस्ति । यत्प्राह—

मानान्तराऽनवष्टब्धं निर्दुःख्यात्मानमञ्जसा ॥
बोधयन्ती श्रुतिः केन न प्रमाणमितीर्यते ॥३५॥

न च संशयितव्यमवगमयतीति यतः—

सर्वसंशयहेतौ हि निरस्ते कथमात्मनि ॥
जायते संशयो वाक्यादनुमानेन युष्मदि ॥३६॥

अपि च—

यत्र स्यात्संशयो नासौ ज्ञेयश्चात्मेति पण्डितैः ॥
न यतः संशयप्राप्तिरात्मनोऽवगतित्वतः ॥३७॥

अनवबोधकत्वं तु दूरोत्सारितमेव, यत्प्राह—

बोधयेऽप्यनुभवो यस्य न कथंचन जायते ॥
तं कथं बोधयेच्छास्त्रं लोष्टं नरसमाकृतिम् ॥३८॥

अन्वयव्यतिरेकपुरःसरं वाक्यमेवाऽवाक्यार्थरूपमात्मानं प्रतिपादयतीत्यस्य पक्षस्य दृढिम्ने श्रुत्युदाहरणमुपन्यस्यति—

जिघ्राणीममहं गन्धमिति यो वेत्त्यविक्रियः ॥
स आत्मा तत्परं ज्योतिः शिरसीदं वचः श्रुतेः ॥३९॥

यथा 'तत्सत्यं' 'स आत्मा' 'तत्त्वमसी' त्यस्य शेषत्वे नाऽन्वयव्यतिरेकश्रुतिर्यथा "य एषोऽक्षिणि पुरुषो दृश्यते" इत्याद्या "अथ यो वेदेदं जिघ्राणी" त्यन्ता, तथाऽहं ब्रह्मास्मीत्यस्य शेषः——

अहमः प्रत्यगात्माऽर्थो निरस्ताशेषयुष्मदः॥
ब्रह्मणीति श्रुतिर्न्याय्यायोऽयमित्यादिनाऽसकृत्॥४०॥

कथं पुनरयमर्थोऽवसीयते अहंव्याजेन आत्मार्थो बुबोधयिषित इति, यतः——

एष आत्मा स्वयंज्योती रविसोमाग्निवाक्षुसः॥
इतेष्वस्तं दृगेवास्ते भासयंश्चित्तचेष्टितम्॥४१॥
निर्णेनेक्ति च पृष्टो मुनिः——

आत्मनैवेत्युपश्रुत्य कोयमात्मेत्युदीरिते॥
बुद्धेः परं स्वतो मुक्तमात्मानं मुनिरभ्यधात्॥४२

यस्माच्चात्माऽत्राहंव्याजेन प्रत्यङ्मात्रो जिग्राहयिषितस्तस्मादहंवृत्तिः स्वरूपस्य विलयेनैव वाक्यार्थवगमाय कारणत्वं प्रतिपद्यत इतीमम-

र्थमाह—

अहंवृत्त्यैव तद्ब्रह्म यस्मादेषोऽवगाच्छति ॥
तत्स्वरूपत्वयेनातः कारणं स्यादहंकृतिः ॥४३॥

अतस्त्वं च यः प्रतिज्ञातोऽर्थो "नाहं ग्राह्यो न तद्धीन" इत्यादि सयुक्तिभिरुपपादित इति कृत्वोपसंह्रियते—

गृहीताहं पदार्थश्चेत्कस्माज्ज्ञो न प्रपद्यते ॥
प्रत्यक्षादिविरोधाच्चेत्प्रतीच्युक्तिर्न युष्मदि ॥४४॥

पूर्वस्यैव श्लोकार्थस्य विस्पष्टमाह—

पराञ्च्येव तु सर्वाणि प्रत्यक्षादीनि नात्मनि ॥
प्रतीच्येव प्रवृत्तं तत्त्वमसीति वचोऽञ्जसा ॥४५॥

तस्मात्प्रमातृप्रमाणप्रमेयेभ्यो हीयमानोपादीयमानेभ्योऽन्वयव्यतिरेकाभ्यां मुञ्जेषीकावदशेषबुद्धिविक्रियासाक्षितयाऽऽत्मानं निष्कृष्य तत्त्वमस्यादिवाक्येभ्योऽपूर्वादिलक्षणमात्मानं विजानीयात्तदेतदाह—

अहं दुःखी सुखी चेति येनाऽयं प्रत्ययोऽध्रुवः ॥
अवगत्यन्तगो भाति सम्यगात्मेति वाक्यधीः ॥

प्रमाणान्तराऽनवष्टब्धंनिरस्ताशेष*कार्यकारणा
त्मकद्वैतप्रपञ्चंसत्यज्ञानानन्दलक्षणमात्मानंतत्त्व
मस्यहंब्रह्मास्मीत्यादिवाक्यंसंशयितमिथ्याज्ञाना
ऽज्ञानप्रध्वंसमुखेनसाक्षादपरोक्षात्कर तत्वन्य
स्ताऽऽमलकवत्प्रतिपादयत्येवेत्यसकृदभिहित
म्। तत्रकेचिदाहुस्तत्त्वमस्यादिवाक्यैर्यथाऽव
स्थितवस्तुयाथात्म्यव्याख्याननिष्ठैर्नयथोक्तोऽ-
र्थःप्रतिपत्तुंशक्यते,ऽभिधाश्रुतित्वात्तेषां,नहिलो
केऽभिधाश्रुतेःप्रमाणान्तरनिरपेक्षायानद्यास्ती
रेफलानिसन्तीत्यादिकायाःप्रामाण्यमभ्युपग-
तम्।अतोनियोगमुखेनैवा*भिधाश्रुतेःप्रामाण्यं
युक्तंप्रामाणान्तरनिरपेक्षत्वान्नियोगस्य ऽस्यप
रिहारार्थमशेषप्रत्यक्षादिप्रमेयत्वनिराकरणद्वारे
णातीन्द्रियार्थविषयत्वादभिधाश्रुतेःप्रामाण्यंसु
प्तपुरुषप्रबोधकवाक्यस्येववक्तव्यमित्ययमार-
म्भः ——

नित्यावगतिरूपत्वादन्यमानानपेक्षणात्॥

शब्दादिगुणहीनत्वात्संशयाऽनवतारतः॥४७

तृष्णानिष्ठीवनैर्नात्माप्रत्यक्षाद्यैःप्रमीयते॥

प्रत्यगात्मत्वहेतोश्चस्वार्थत्वादप्रमेयतः*॥

श्रुतिरपीममर्थंनिर्वदति——

दिदृक्षितपरिच्छिन्नपराग्रूपादिसंश्रयात्॥

विपरीतमतोदृष्ट्यास्वतोबुद्धंनपश्यति॥४८॥

न्यायसिद्धमतोवक्ति दृष्टेर्द्रष्टारमात्मनः॥

नपश्येत्प्रत्यगात्मानंप्रमाणंश्रुतिरादरात्॥५०॥

अनुमानाऽविषयत्वेऽन्यदपिकारणमुच्यते——

प्रत्यक्षस्यपराक्त्वान्नसंबन्धग्रहणंयतः॥

आत्मनोऽतोऽनुमित्याऽस्याऽनुभवोनकथं

चन॥५१॥

एवमयंप्रमातृप्रमाप्रमेयव्यवहारःसर्वएवपराचीन-

विषयएवनप्रतीचीनमात्मानमवगाहयितुमलम्।

एवंचसत्यनेनैवयथोक्तोऽर्थो*ऽनुमातुंशक्यतइत्या

ह——

प्रमाणव्यवहारोऽयंसर्वएवपराग्यतः॥

सुविचार्याप्यतोऽनेन युष्मद्येव दिदृक्षते ॥५२॥

यस्माल्लौकिकप्रत्यक्षादिप्रमाणाऽनधिगम्योऽहं ब्रह्मास्मीति वाक्यार्थस्तस्मात्——

अन्वयव्यतिरेकाभ्यां निरस्याऽऽप्राणतो※

यतः॥ वीक्षापन्नस्य कोऽस्मीति सदसीति श्रुतिर्जगौ ॥५३॥

सोऽयमन्वयव्यतिरेकन्यायस्तावानेव यदवसानो वाक्यार्थस्तदभिज्ञस्याहं ब्रह्मास्मीत्याविर्भवति। द्रष्टृदृश्यविभागेनागमापायिसाक्षिविभागेन च श्रुत्यभ्युपगमतः † संक्षिप्योच्यते——

दृश्यत्वाद्घटवद्देहो देहवच्चेन्द्रियाण्यपि ॥

मनश्चेन्द्रियवज्ज्ञेयं मनोवन्निश्चयादिमत् ॥५४॥

तथा सकलकार्यकारणागमापायिविभागसाक्षित्वेनापि——

प्रागसद्यातिपश्चात्सत्सच्च यायादसत्तथा॥

अनात्माभिजनं तत्स्याद्विपरीतः स्वयंदृशिः ॥५५

तत्र घटादीनां दृश्यानामनात्मत्वं द्रष्ट्रात्मपूर्वकं प्र-

त्यक्षेणैव प्रमाणेनोपलभ्याऽनात्मनश्चासाधारणान्धर्मानवधार्य तैर्दृश्यत्वाऽऽगमापायादिभिर्धर्मैः शरीरेन्द्रियमनोनिश्चयादिवृत्तीरनात्मतयाव्युदस्याऽहंवृत्तिमतोऽपि दृश्यत्वाऽविशेषात् द्रष्टृपूर्वकत्वमवसीयते। तदेतदाह ——————

घटादयो यथा लिङ्गं स्युः परम्परयाऽहमः॥

दृश्यत्वादहमप्येवं लिङ्गं स्याद्द्रष्टुरात्मनः॥५६॥

ननु द्रष्टृदर्शनदृश्यानां जाग्रत्स्वप्नसुषुप्तेष्वागमापायदर्शनाद्यत्साक्षिकौ तेषामागमापायौ स न्ञागमापायरहित आत्मा यथा यन्निबन्धनौ जगतः प्रकाशाप्रकाशौ स प्रकाशाप्रकाशविभागरहितः सूर्य इति। यदा चैवं तदा वाक्याऽवगम्यस्यार्थस्याऽनुदिताऽनस्तमितविज्ञानमात्रस्वभावस्याऽनुमानेनैव प्रतिपन्नत्वात्पुनरपि वाक्यस्य निर्विषयत्वप्रसङ्गः। नैष दोषः। लिङ्गव्यवधानेन * तत्प्रतिपत्तेः। ननु साक्षादपरोक्षादात्मस्वभावेनानात्मनो हानोपादानयोः संबन्धग्रहणात्कमतिशयं वाक्यं कुर्यात्। मैवं वोचः। लिङ्गाधीनत्वात्तत्प्रति

पत्तेः। नहि लिङ्गव्यवधानेनात्मप्रतिपत्तिः साक्षादपरोक्षात्प्रतिपत्तिर्भवति। "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते" इति श्रुतेः। अत आह ——

लिङ्गमस्तित्वनिष्ठत्वान्न स्याद्वाक्यार्थबोधकम्॥ सदसद्व्युत्थितात्माऽयमतो वाक्यात्प्रतीयते॥५८॥

ननु यदि व्यावृत्तसदसद्विकल्पजातं वस्त्वभीष्टं वाक्याद्भवतस्तथापि तूत्सार्यते वाक्यविषया तृष्णा, यस्मादन्तरेणापि वाक्यश्रवणं निरस्ताशेषविकल्पमागोपालाविपालपण्डितं सुषुप्ते वस्तु सिद्धमतो नार्थो वाक्यश्रवणेन। नैतदेवम्। किं कारणम्। सर्वानर्थबीजस्यात्मानवबोधस्य सुषुप्ते संभवात्। यदि हि सुषुप्तेऽज्ञानं नाभविष्यदन्तरेणापि वेदान्तवाक्यश्रवणमनननिदिध्यासनान्यहं ब्रह्मास्मीत्यध्यवसायात्सर्वप्राणभृतामपि स्वरसत एव सुषुप्तप्रतिपत्तेः सकलसंसारोच्छित्तिप्रसङ्गो * न च कैवल्यात्पुनरुत्थानं न्याय्यमनिर्मोक्षप्रसङ्गात्।

नचान्य एव सुषुप्तोऽन्य एवोत्थित इति शक्यं वक्तुम्। नाद्राक्षमहं सुषुप्तेऽन्यत्किञ्चिदपीत्युत्थितस्य प्रतिभिज्ञादर्शनात्*। तस्मादवश्यं सुषुप्तेऽज्ञानमभ्युपगन्तव्यम्। ननु यदि तत्राज्ञानमभविष्यद्रागद्वेषघटाज्ञानादिवत्प्रत्यक्षमभविष्यत्। यथेह लोके घटं न जानामीत्यज्ञानमव्यवहितं प्रत्यक्षम्। अत्रोच्यते। न। अभिव्यञ्जकाभावात्। कथमभिव्यञ्जकाभाव इति चेच्छृणु ——

बाह्यां वृत्तिमनुत्पाद्य व्यक्तिः स्यान्नाऽहमो यथा॥
नर्तेऽन्तःकरणं तद्वद् ध्वान्तस्य व्यक्तिरात्मसौ॥११॥

कश्चिदतिक्रान्तं विस्मृत्य* "दृश्यत्वादहमप्येवं लिङ्गं स्याद् द्रष्टुरात्मन" इति निर्युक्तिकमभिहितमित्याह। किं कारणमहं तज्ज्ञात्रोर्विवेकाऽप्रसिद्धेः। यथेह घटदेवदत्तयोर्ग्राह्यग्राहकत्वेन स्फुटतरो विभागः प्रसिद्धो लोके न तथेहाऽहङ्कारतज्ज्ञात्रोर्विभागोऽस्तीति। तस्मादसाध्वेतदभिहितमिति। अत्रोच्यते ——

दाह्यदाहकतैकत्र यथा स्याद्वह्निदारुणोः॥

ज्ञेयज्ञातृकतैवं स्यादहंज्ञात्रोः परस्परम् ॥५८॥

एवं तावदविद्योत्थस्या* न्तःकरणस्य बाह्यविषयनिमित्तरूपावच्छेदायाऽहंवृत्तिर्व्याप्रियते तयाऽवच्छिन्नं सत्कूटस्थप्रत्यगात्मोपादानावबोधरूपस्याव्यवधानतया विषयभावं प्रतिपद्यत इति तत्र तयोर्ज्ञात्रहन्तारूपयोरवभासकावभास्यत्वसंबन्धव्यतिरेकेण नान्यत्संबन्धान्तरमुपपद्यते। अहंतारूपं त्वात्मसात्कृत्वाहं कञ्चुकं परिधायोपकार्यत्वोपकारकत्वक्षमः सन् बाह्यविषयेणोपकारिणाऽपकारिणा वाऽऽत्मात्मीयसंबन्धं प्रतिपद्यते, तदभिधीयत इति——

इदं ज्ञानं भवेज्ज्ञातुर्मम ज्ञानं तथाऽहमः ॥

अज्ञानोपाधिनेदं स्या* द्द्विक्रियाऽतोऽहमो मम ॥

एकस्यैव ज्ञातुरन्तर्बाह्यनिमित्तभेदाद्द्विभिन्नेऽपि विषये इदं ममेति ज्ञानवैरूप्यं जायत इत्युक्तम्। अत्रोपक्रियमाणस्यैव ज्ञातुर्विषये मम प्रत्ययो भवति विपर्यये चेदं प्रत्यय इति कथमवगम्यते। अवगम्यतामन्वय-

व्यतिरेकाभ्यां तत्कथमित्याह ——

अनुपक्रियमाणत्वान्न ज्ञातुः स्यादहं मम ॥
घटादिवदिदं तु स्यान्मोहमात्रव्यपाश्रयात् * ॥६१

मोहतत्कार्याश्रयत्वात् ज्ञातृत्वविक्रिययोः पूर्वत्रे॰दं
ममज्ञानान्वयः प्रदर्शितः। अथाधुना तद्व्यतिरेकेण-
व्यतिरेकप्रदर्शनार्थमाह ——

विक्रियाऽज्ञानशून्यत्वान्नेदं न च ममात्मनः ॥
उत्थितस्य सतोऽज्ञानं नाहमज्ञासिषं यतः * ॥६२॥

आत्मानात्मविवेकस्येयत्ताप्रदर्शनार्थमाह ——

वाक्यप्रत्यक्षमानाभ्यामियानर्थः प्रतीयते ॥
अनर्थकृ*त्तमोहानिर्वाक्यादेव सदाऽऽत्मनः ॥६३॥

द्वितीयाध्यायादौ श्रोतृचतुष्टयमुपन्यस्तं, तत्र कृत्स्ना-
नात्मनिवृत्तौ सत्यां यः प्रत्यगात्मन्यवाक्यार्थतां प्रति-
पद्यते स क्षपिताशेषान्तरायहेतुरिति न तं प्रति वक्तव्यं
किंचिदप्यवशिष्यते। योऽपि वाक्यश्रवणमात्रादे-
व प्रतिपद्यते॰ तस्याप्यतीन्द्रियशक्तिमत्त्वान्न किं-
चिदप्यपेक्षितव्यमस्ति, यश्च श्राविततत्त्वमस्यादि

वाक्यः स्वयमेवाऽन्वयव्यतिरेकौ कृत्वा तदवसान एव वाक्यार्थं प्रतिपद्यते ❋ ऽसावपि यथार्थं प्रतिपन्न इति पूर्ववदेवोपेक्षितव्यः। यः पुनरन्वयव्यतिरेकौ कारयित्वाऽपि पुनः पुनर्वाक्यं श्राव्यते ❋ यथाभूतार्थप्रतिपत्तये तस्य कृतान्वयव्यतिरेकस्य सतः कथं वाक्यं श्राव्यते इत्युच्यते——

नवसंख्याहृतज्ञानो दशमो विभ्रमाद्यथा ॥
नवेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥

अथ दृष्टान्तगतमर्थं दार्ष्टान्तिकार्थे समर्पयिष्यन्नाह——

अपविद्धद्वयोऽप्येवं ❋ तत्त्वमस्यादिना विना ॥
वेत्ति नैकलमात्मानं नान्वेष्यं चात्र कारणम् ❋ ॥

नान्वेष्यं चात्र कारणमित्युक्तं तत्कस्मादिति चोदिते प्रत्याह, अन्वेषणाऽसहिष्णुत्वात्तत्कथमित्याह——

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी ॥
सहते न विचारं सा तमो यद्वद्दिवाकरम् ॥ ६६ ॥

तस्याः खल्वस्याप्रविद्याया भ्रान्तेः सम्यग्ज्ञानोत्पत्ति-द्वारेण निवृत्तिः —

बुभुत्सोश्चेदिनीचास्यसदसीत्यादिनादृढम् * ॥
प्रतीचिप्रतिपत्तिः स्यान्नासौ मानान्तराद्भवेत् ॥ ६७

कथं पुनर्वाक्यं प्रतिपादयत्येवेति चेद्दृष्टान्तोक्तिः —

जिज्ञासोर्दशमं यद्वन्नवातिक्रम्य तान्यतः ॥
त्वमेव दशमोऽसीति कुर्यादेवं प्रमां वचः ॥ ६८ ॥

सा च तत्त्वमस्यादिवाक्यश्रवणजा प्रमोत्पन्नत्वादेव न-चनैव मिति प्रत्ययान्तरं जायते तदेतद्दृष्टान्तेन प्रति-पादयति —

दशमोऽस्मीति वाक्योत्थान धीरस्य विहन्यते ॥
आदिमध्यावसानेषु न नवस्वस्य संशयः ॥ ६९ ॥
एवं तत्त्वमसीत्यस्माद्वैतनु * प्रत्यगात्मनि ॥ ७०
सम्यग्ज्ञातत्वमर्थस्य जायेतैव प्रमा दृढा

प्रत्यगात्मनि प्रमोपजायत इत्युक्तं, तत्र चोद्यते किं यथा घ-टादिप्रमेयविषया प्रमाकर्त्रादिकारकभेदाऽनपन्हवेन-जायते तथैव उताशेषकारकग्रामोपमर्द्देन कर्त्तुः प्रत्यगा-

त्मनीत्युच्यते ———

प्रत्यक्त्वा* ऽस्य स्वतो रूपं निष्क्रियाकारकाफ-
लम्॥ अद्वितीयं तदिद्धाधीः प्रत्यगात्मेवलक्ष्यते ॥ ७१॥

यस्मादेवम्* ———

विपश्चितोऽप्यतस्तस्यामात्मभावं वितन्वते ॥
दवीयस्स्विन्द्रियार्थेषु क्षीयते ह्युत्तरोत्तरम् ॥ ७२॥

आह यदि वाक्यमेव यथाभूतार्थावबोधकं कथं कस्य हेतोरविद्योत्थापितस्य कर्तृत्वादेरुपदेशः इत्युक्ते प्रतिविधीयते ———

भ्रान्तिप्रसिद्ध्याऽनूद्यार्थं तत्तत्त्वं भ्रान्तिबाधया ॥
अयं नेत्युपदिश्येत तथैवं तत्त्वमित्यपि ॥ ७३॥

इममर्थं दृष्टान्तेन बुद्धावारोपयति ———

स्थाणुः स्थाणुरितीवोक्तिर्न नृबुद्धिं* निरस्यति ॥
व्यनुवादात्तथैवोक्तिर्भ्रान्तिं पुंसो न बाधते ॥ ७४॥

यस्माच्छ्रोतृप्रसिद्ध्यानुवाद्येव त्वमिति पदं तस्माद्दृश्यमानस्य त्वाद्दुःखित्वादेरविवक्षितत्वमेव, विधी

यमानत्वे हि सति विरोधप्रसङ्गो न तु विधीयमानानूद्य-
मानयोरिति स्वप्रधानयोर्हि पदयोर्विरोधाशङ्का सा-
मान्यात्लिङ्गितत्वात्तयोर्न विपर्यये ———

ऽनात्लिङ्गितसामान्यौ न जिहासितवादिनौ ॥
व्युत्थितौ तत्त्वमौ तस्मादन्योन्याभिसमीक्षणौ ॥

ऽपास्तसामान्यार्थत्वादनुवादस्थत्वाद्विधीयमानेन-
च सह विरोधाद् दुःखित्वादेरस्तु कामं जिहासितार्थयो-
रसंसर्गो यथोपन्यस्तदोषविरहात्तत्त्वमर्थयोः संसर्गो
ऽस्तु नीलोत्पलवदिति चेन्नैवमप्युपपद्यते तस्मात् ———

तदर्थयोरस्तु निष्ठात्माऽद्वयपारोक्ष्यवर्जितः ॥
नाऽद्वितीयं विनाऽऽत्मानं नात्मा नित्यदृशा विना ॥

अत्राह किमिह जिहासितं किं वोपादित्सितमित्युच्यते । प्र-
त्यगात्मार्थविधायिनस्त्वंपदादुभयं प्रतीयते ऽहं दुःखी
प्रत्यगात्मा च । तत्र च प्रत्यगात्मनोऽहं दुःखीत्यनेनाभि-
सम्बन्धश्चात्मयाथात्म्याऽनवबोधहेतुक एवातोऽह-
मर्थोऽनर्थोपसृष्टत्वादज्ञानोत्थत्वाच्च हेय इति प्रत्यक्ष-
हेतोरवसीयते । तदर्थे किं हेयं किं वोपादेयमिति नाव-

ध्रियते * तत इदमभिधीयते—

परोक्ष्यं यत्तदर्थे स्यात्तद्धेयमहमर्थवत् ॥
प्रतीचेवाऽहमोऽभेदः परोक्ष्येणात्मनोऽपि से ॥

कथं पुनस्तदर्थोऽद्वितीयलक्षणः प्रत्यगात्मोपाश्रयं सद्वितीयत्वं दुःखित्वं निरन्वयमपनुदतीत्युच्यते, न चैतयोर्निवर्तकनिवर्त्यभावं वयं ब्रूमः। कथं तर्हि त्वमर्थे प्रत्यगात्मनि प्रागनवबुद्धाऽद्वितीयता सा ऽनेनावबोध्यतेऽतोऽनवबोधनिरासेन तद्गुत्थस्य सद्वितीयत्वस्य त्वमर्थस्थस्य परोक्षत्वस्य च तदर्थस्थस्य निरसनान्नवैयधिकरण्यादिचोद्यस्यावसरोऽस्तीति। तदिदमभिधीयते—

तत्त्वमर्थेन संपृक्तो * नानात्वं विनिवर्तयेत् ॥
नाऽपरित्यक्तपारोक्ष्यं त्वं तदर्थं सिसृप्सति ॥

कस्मात् पुनः कारणात्तदर्थोऽद्वितीयलक्षणस्त्वमर्थेन प्रत्यगात्मनाऽपृथगर्थः सन्नविद्योत्थं सद्वितीयत्वं निहन्तीत्युच्यते गिरो धा, तदुच्यते—

संसारिताऽद्वितीयेन पारोक्ष्यं चात्मना सह ॥

प्रासङ्गिकं * विरुद्धत्वात्तत्त्वंम्यांबाधनंतयोः॥
तत्त्वमर्थयोस्तुबाधकत्वेऽन्यदपिकारणमुच्यते——
अज्ञातपुरुषार्थत्वा * चश्रौतत्वा * तत्त्वमर्थयोः॥
स्वमर्थमपरित्यज्यबाधकौस्तांविरुद्धयोः॥८०

एवंतावद्यथोपक्रान्तेनप्रक्रियावर्त्मनानप्रत्यक्षादि-
प्रमाणान्तरैर्विरोधगन्धोऽपिसंभाव्यते। यदापु-
नः सर्वप्रकारेणापियतमानानैवेमंवाक्यार्थंसंभाव
यामः प्रत्यक्षादिप्रमाणान्तरविरोधतएवतस्मिन्न-
पिपक्षउच्यते——

प्रत्यक्षादिविरुद्धंचेद्वाक्यमर्थंवदेत्क्वचित्॥
स्यात्तुतद्दृष्टिविध्यर्थंयोषाग्निवदसंशयम्॥८१

यदातुतत्त्वमस्यादिवाक्यंसर्वप्रकारेणापिविचार्य
माणंनक्रियांकटाक्षेणापिवीक्षतेतदाप्रसंख्याना-
दिव्यापारोदुःसंभाव्यइति। तदुच्यते——

वस्त्वेकनिष्ठंवाक्यंचेन्नतस्यस्यात्क्रियार्थता॥
वस्तुनोह्येकरूपत्वाद्विकल्पस्याप्यसंभवः॥८२

भिन्नविषयत्वाच्चनप्रमाणान्तरविरोधः। कथम्,

उच्यते——

अपूर्वाधिगमं कुर्वत्प्रमाणं स्यान्न चेन्न तत्॥
न विरोधस्ततो युक्तो विभिन्नार्थावबोधिनोः॥८३॥

यस्त्वेवमपि भिन्नविषयाणां विरोधं वक्ति सोऽत्रापि विरोधं ब्रूयात्——

नायं शब्दः कुतो यस्माद्रूपं पश्यामि चक्षुषा॥
इति यद्वत्तथैवायं विरोधोऽक्षजवाक्ययोः*॥८४

प्रमाणानां सतां न विरोधः श्रोत्रादीनामिव भिन्नविषयत्वात्। ययोस्त्वभिन्नविषयत्वं तयोराखुनकुलयोरिव प्रतिनियत एव बाध्यबाधकभावः स्यादतस्तदुच्यते——

प्रत्यक्षं चेन्न शाब्दं स्याच्छाब्दं चेदक्षजं कथम्॥
प्रत्यक्षाभासः प्रत्यक्षे ह्यागमाभासकागमे॥८५॥

न च प्रतिज्ञाहेतुदृष्टान्तन्याय इह संभवति, शब्दादीनां प्रत्येकं प्रमाणत्वात्, अत आह——

स्वमहिम्ना* प्रमाणानि कुर्वन्त्यर्थावबोधनम्॥
इतरेतरसापेक्ष्ये* प्रामाण्यं नेष्यते स्वतः॥८६॥

नचसुखदुःखादिसंबन्धोऽवगत्यात्मनः प्रत्यक्षादि प्रमाणैर्गृह्यते येनविरोधः प्रत्यक्षादिप्रमाणैरुह्यते, कथं, शृणु ———

दुःखितावगतौ चेत्स्यात् प्रमीयेत साऽऽत्मवत्।
कर्मण्येव प्रमान्याय्या न तु कर्तर्यपि क्वचित्॥ ८७॥

अभ्युपगमेऽपि च प्रसंख्यानशतेनापि नैवात्वसम्भावितदोषान्मुच्यसेऽतआह ———

प्रमाणबद्धमूलत्वाद्दुःखित्वं केन वार्यते।
अग्न्युष्णवद्निवृत्तिश्चेद्नैरात्म्यं ह्येति सौगतम्।
अथमतम् ———

निराकुर्यात्प्रसंख्यानं दुःखित्वं चेत्स्वनुष्ठितम्।
प्रत्यक्षादिविरुद्धत्वात्कथमुत्पादयेत्प्रमाम्॥ ८८

ननु प्रसंख्यानंनाम तत्त्वमस्यादिशब्दार्थान्वयव्यतिरेकयुक्तिविषयबुद्ध्याम्रेडनमभिधीयते, तच्चानुष्ठीयमानं प्रमितिवर्द्धनयाॅ परिपूर्णां प्रमितिं जनयति नपुनरैकाग्र्यवर्द्धनयेति। यथाऽशेषाऽशुचिनीडे स्त्रीकुणपे कामिनीति निर्वस्तुकः पुरुषायासमात्रज-

नितः प्रत्यय इति। तन्न, यतः ——

अभ्यासोपचयाद्बुद्धेर्यत्स्यादैकाग्र्यमेवतत्॥
नहिप्रमाणान्यभ्यासात्कुर्वन्त्यर्थावबोधनम्॥
अभ्यासोपचिताकृत्स्नंभावनाचेन्निवर्तयेत्॥
नैकान्तिकीनिवृत्तिः स्याद्भावनाजंहितत्फलम्॥

अपिचाह ——

दुःख्यस्मीत्यपिचेद्ध्वस्ताकल्पकोट्युपबृंहिता॥ स्वल्पीयोऽभ्यासजास्थास्न्वी भावने-
त्यत्रकाप्रमा॥८२॥

ननुशास्त्रात्स्यात्स्तुत्वंभविष्यतिनैवं, यथाऽवस्थितवस्तुयाथात्म्याऽवबोधमात्रकारित्वाच्छास्त्रस्य, नहिपदार्थशक्त्याधानकृच्छास्त्रम्। प्रसिद्धंचलोके ——

भावनाजंफलंयत्स्याद्यच्चस्यात्कर्मणःफलम्॥
नतत्स्थास्न्वितिमन्तव्यंद्रविडेष्विवसंगतम्॥

यद्यपिप्रत्यक्षादिप्रमाणोपात्तमात्मनोदुःखित्वंतथापितत्त्वमस्यादिवाक्योत्थप्रत्ययएवबलीयानिति-

निश्चयोऽव्यभिचारिप्रामाण्योवाक्योपात्तत्वात्,* प्रमेयस्य च स्वत एव निर्दुःखित्वसिद्धेः, प्रत्यक्षादेस्तु सव्यभिचारित्वात्, संभावनायाश्च पुरुषपरिकल्पनामात्रावष्टम्भत्वा* च्चेति——

निर्दुःखित्वं स्वतः सिद्धं प्रत्यक्षादेश्च दुःखिता॥
कोह्यात्मानमनादृत्य विश्वसेद्बाह्यमानतः॥८४॥

संबन्धार्थ एव——

अपि प्रत्यक्षबाधेन प्रवृत्तिः प्रत्यगात्मनि॥
पराञ्चि खानीत्येतस्माद्धच सो गम्यते श्रुतेः॥८५॥

अभ्युपगम्यैवमुच्यते* न तु प्रमाणं सत्प्रमाणान्तरेण विरुद्ध्यत इत्यसकृदवोचाम। यत्रापि वाक्यप्रत्यक्षयोर्विरोधाशङ्का तत्रापि पुरुषमोहवशादेव सा जायते न तु परमार्थत इति। अतआह——

प्रमां चेज्जनयेद्वाक्यं प्रत्यक्षादिविरोधिनीम्॥
गौणीं प्रत्यक्षतां ब्रूयान्मुख्यार्थासंभवाद्बुधः॥८६॥

तस्यार्थस्य सुखप्रतिपत्त्यर्थमुदाहरणम्——

अग्निः सम्यगधीतेऽसौ जहासोच्चैश्च मञ्चकः॥

यथा तद्वदहंवृत्त्या लक्ष्यतेऽनर्हयाऽपि सः ॥९७॥

कस्मात्पुनः कारणात्साक्षादेवात्मा नाभिधीयते किमनया कल्पनयेति, तत्राह ——

त्वमित्येतद्विहायाऽन्यन्नवर्त्माऽऽत्मावबोधने ॥
समस्तीह त्वमर्थोऽपि गुणलेशेन* वर्तते ॥९८॥

कस्मात्पुनर्हेतोर्ह्यहमित्येतदपि गुणलेशेन वर्तते न-पुनः साक्षादेवेति। विधूतसर्वकल्पनाकारणस्वाभाव्यादात्मनोऽतश्चाह ——

व्योम्नि धूम्रतुषाराभ्रमलिनानीव दुर्धियः ॥
कल्पयेयुस्तथा मूढाः संसारं प्रत्यगात्मनि ॥९९॥

ननु सर्वकल्पनानामप्यात्मन्यत्यन्तासंभवे समानेऽहंवृत्तौ कः पक्षपाते हेतुर्येन वृत्त्यन्तराणि विधूयाहंवृत्त्यैवात्मोपलक्ष्यत इत्युच्यते ——

चिन्निभेयमहंवृत्तिः *प्रतीचीवाऽऽत्मनोऽन्यतः ॥
पूर्वोक्तेभ्यश्च हेतुभ्यस्तस्मादात्माऽनयोच्यते ॥१००॥

वृत्तिभिर्युष्मदर्थाभिर्लक्ष्यते चेद्दृशिः परः ॥
अनात्मत्वं भवेत्तस्य वितथं च वचः श्रुतेः ॥१०१॥

यथोक्तेन——

अनेनगुणलेशेनह्यत्यहंकर्तृकर्मया ॥

लक्ष्यतेऽसावहंवृत्त्यानाञ्जसाऽत्राभिधीयते ❋॥

नाञ्जसाऽत्राभिधीयतइतिकोहेतुरितिचेत्——

षष्ठीगुणक्रियाजातिरूढयःशब्दहेतवः ॥

नात्मन्यन्यतमोऽमीषांतेनात्मानाभिधीयते ॥३

यदिशब्दोऽभिधानाभिधेयत्वसंबन्धाङ्गीकारेण-नात्मनिवर्तते,कथंशब्दादहंब्रह्मास्मीतिसम्यग्बोधोत्पत्तिरुच्यते——

असत्येवर्त्मनिस्थित्वानिरुपायमुपेयते ॥

आत्मत्वकारणाद्धिद्मोगुणवृत्त्याविबोधिताः ॥४

कथंपुनरभिधानमभिधेयेनानभिसंबद्धंसदनभि-धेयेऽर्थेप्रमांजनयतीति,शृणु। यथाऽनभिसंबद्ध-मप्यनभिधेयेऽर्थेऽविद्यानिराकरणमुखेनबोधयतीत्याह——

शयानाःप्रायशोलोकेबोध्यमानाःस्वनामभिः।

सहसैवप्रबुध्यन्तेतथैवंप्रत्यगात्मनि ॥१०५॥

नहिनाम्नोऽस्तिसंबन्धोव्युत्थितस्यशरीरतः ॥
तथाऽपिबुध्यतेतेनयथैवंतत्त्वमित्यतः ॥१०६॥

यथाच —

बोधाबोधौनभोऽस्पृष्ट्वाकृष्णधीनीडगौयथा ॥
बाध्येतरात्मकौ*स्यातांतथेहात्मनिगम्यताम् ॥

असत्येवर्त्मनिस्थित्वेत्युपश्रुत्याऽतिविस्मितोमहता संभ्रमेणकश्चिच्चोदयति —

नासन्नुपायोलोकेऽस्तिपरमार्थविनिश्चये ॥
नासल्लिङ्गाद्धिबाष्पादेःकश्चिदग्निंप्रपद्यते ॥१०८
इत्येवंचोदयेद्योऽपियोजयेत्तं*घटादिना ॥
सदसद्भ्यांविभक्तोऽसौपर्यायश्चनचानयोः ॥१०९

एवंकुचोद्य*मुन्मृत्याथेदानींप्रकृतमभिधीयतेऽप्रकृतंचानभिधेयेकथमभिधाश्रुतिरविद्याध्वंस्याऽऽत्मनिज्ञानंजनयतीतितत्रैवकारणान्तरमुच्यते —

अतिदुःस्थोऽप्रबोधोऽत्रह्यात्मैवास्यप्रबुद्धता ॥
निमित्तमात्राद्व्येत्येषानासाग्रेबदरंयथा ॥११०॥

अनुदितानस्तमितकूटस्थबोधमात्रस्वाभाव्यादा —

त्मनोदुःसंभाव्योऽविद्यासद्भावइतिचेन्न।अवि-
द्याप्रसिद्धैवतत्सद्भावसिद्धेरुलूकनिशावत्।इत्य
तइदमुच्यते ——————

अहोधार्ष्ट्यमविद्यायानकश्चिदतिवर्तते॥
प्रमाणंवस्त्वनादृत्य*परमात्मेवतिष्ठति॥१११

यस्मादविद्याप्रसिद्धैवाविद्यासद्भावसिद्धिरतःप्रा-
त्मवस्तुवृत्तानुरोधेननकथंचनापितत्संभावनाप्य
स्ति।यतआह ——————

ज्ञानंयस्यनिजंरूपंक्रियाकारकवर्जितम्॥
संभावनाप्यविद्यायास्तत्रस्यात्केनहेतुना॥११२

सोयमेवमनुदितानस्तमितावगतिमात्रशरीरआत्मा
पिसन्नविचारितप्रसिद्धाविद्यामात्रव्यवहितइवातं
थेवेक्ष्यतेयतोऽतः ——————

अनुमानादयंभावाद्व्यावृत्तोऽभावमाश्रितः॥
ततोऽप्यस्यनिवृत्तिःस्याद्वाक्यादेवबुभुत्सतः॥११३

भाववदभावादपिनिवृत्तिरनुमानादेवकिमितिनभ-
वतीतिचेच्छृणु ——————

नव्यावृत्तिर्यथाभावाद्भावे नैवा*ऽविशेषतः ॥
अभावादप्यभावत्वाद्व्यावृत्तिर्न तथेष्यते ॥११४॥

यतो नाऽनुमानेन व्याविद्याशेषक्रियाकारकफलात्मनि स्वराज्येऽभिषेक्तुं शक्यते तस्मात् —

अविद्यानिद्रयासोऽयं प्रसुप्तो दुर्विवेकया ॥
भावाभावव्युदासिन्या* श्रुत्यैव प्रतिबोध्यते ॥

अत्राहानुदितानस्तमितविज्ञानात्मस्वरूपत्वाद्दुःसंभाव्याविद्येति । नैतदेवं कुतो यत आह —

कुतोऽविद्येति चोद्यं स्यान्नैवं प्रमेयत्वसंभवात् ॥
कालत्रयापरिच्छिन्ने* न चोद्यं चोद्यसंभवः ॥

यस्मात्तत्त्वमस्यादिवाक्यमेवात्मनोऽशेषामविद्यां निरन्वयामपनुदति तस्मात् —

अज्ञातममनादृत्य प्रमाणं सदसीति ये ॥
बुभुत्सन्तोऽन्यतः कुर्युस्तेऽक्ष्णापि रसवेदनम् ॥

एवमप्रतिहतामहं ब्रह्मेति प्रमां तत्त्वमस्यादिवाक्यं कुर्वदपि न प्रतिपादयतीति चेदभिमतं न कुतश्चनापि प्रतिपत्तिः स्यादत आह —

इदं चेदनृतं ब्रूयात्सत्यामवगतावपि ॥
न चान्यत्रापि विश्वासीद्ध्यवगत्यविशेषतः ॥११८॥
न चोपादित्सितात्स्वाक्यार्थाद्वा वाक्यार्थान्तरं कल्पयितुं युक्तं, यस्मात् ——
न चेदनुभवोऽतः स्यात्पदार्थावगतावपि ॥
कल्प्यं विध्यन्तरं तत्र न ह्यन्योऽर्थोऽवगम्यते ॥
न च यथाऽभिमतोऽर्थो यथोक्तेन न्यायेन नावसीयते ऽ कोऽसौ न्याय इत्याह ——
नामादिभ्यो निराकृत्य त्वमर्थं निष्परिग्रहः ॥
निःस्पृहो युष्मदर्थेभ्यः शमादिविधि*चोदितः ॥
भङ्क्त्वा चान्नमयादींस्तान् पञ्चानात्मतयाऽगलान्* ॥ अहं ब्रह्मेति वाक्यार्थं वेत्ति चेन्नार्थ ईहया* ॥१२१॥
न चेदेवमभ्युपगम्यते वाक्यस्य प्रमाणस्य सतोऽप्रामाण्यं प्राप्नोति । तदाह ——
यदर्थं च प्रवृत्तं यद्वाक्यं तत्र न चेच्छ्रुतम् ॥
प्रमामुत्पादयेत्तस्य प्रामाण्यं केन हेतुना* ॥१२२॥

अथमन्यसे——

जानीयाच्चेत्प्रसंख्यानाच्छब्दः सत्यवचाः क-
थम्॥ पारोक्ष्यं शब्दो नः प्राह प्रसंख्यानात्त्वसं-
शयम्॥१२३॥

नचयुक्तिशब्दावृत्तिलक्षणात्प्रसंख्यानाद्यथावत्प्र
तिपत्तिर्भविष्यतीतिसंभावयामः। यस्मात्——

युक्तिशब्दौ पुराऽप्यस्य नचेदकुरुतां प्रमाम्॥
साक्षादावर्तनात्ताभ्यां किमपूर्वं करिष्यति॥

अथैवमपि प्रसंख्यानमन्तरेण प्राणान्धारयितुं
न शक्नोषीति चेच्छ्रवणादावेव संपादयिष्यामः।

कथम्——

प्रसंख्यानं श्रुतावस्य न्यायोऽस्त्वाम्रेडनात्म-
कः॥ ईषच्छ्रुतं सामि श्रुतं सम्यक्श्रुत्वा-
ऽवगच्छति॥१२५॥

ननु प्रसंख्यानविधिमनभ्युपगच्छतः पारमहंसीच
र्याबौद्धादिचर्यावदशास्त्रपूर्विका प्राप्नोतिततश्चा-
रूढपतितत्वं नच स्यात्, अशेषकर्मणां च निवृत्ति-

र्न प्राप्नोतीत्युच्यते ———————

त्वमर्थस्यावबोधाय विधिरप्याश्रितो यतः॥
तमन्तरेण ये दोषास्तेऽपि नायान्त्यहेतवः॥१२६॥

इति श्रीमत्पूज्यपादसुरेश्वराचार्यकृतनैष्कर्म्यसिद्धि संबन्धोक्तौ तृतीयोऽध्यायः॥ ३ ॥

॥ अथ चतुर्थोऽध्यायः॥ * ॥ ॥ * ॥

॥ नमः परस्मै ॥

पूर्वाध्यायेषु यद्वस्तु विस्तरेणोदितं स्फुटम्॥
संक्षेपतोऽधुना वक्ष्ये तदेव सुखवित्तये *॥१॥
संक्षेपविस्तराभ्यां हि मन्दोत्तमधियां नृणाम्॥
वस्तूच्यमानमेत्यन्तःकरणं तेन भण्यते॥२॥
आत्माऽनात्मा च लोकेस्मिन् प्रत्यक्षादिप्रमाणतः॥
सिद्धस्तयोरनात्मा तु सर्वत्रैवात्मपूर्वकः॥३॥
अनात्मत्वं स्वतः सिद्धं देहाद्भिन्नस्य वस्तुनः॥
ज्ञातुरप्यात्मता तद्वन्मध्ये संशयदर्शनम्॥४
असाधारणांस्तयोर्धर्मान् ज्ञात्वा धूमाग्निवद्बुधः॥
अनात्मनोऽपबुद्ध्यन्तान् जानीयादनुमानतः॥५

इदमित्येवबाह्येऽर्थेह्यहमित्येवबोद्धरि॥
द्वयंदृष्टंयतोदेहेतेनायंमुह्यते जनः॥६॥

केनपुनर्न्यायेनात्मानात्मनोस्स्वमहिषयोरिव विभागःक्रियतइत्युच्यते——

न्यायःपुरोदितोऽस्माभिरात्मानात्मविभा-
गकृत्॥तेनेदमर्थमुत्सार्यह्यहमित्यत्रयो-
भवेत्॥७॥ विद्यात्तत्त्वमसीत्यस्माद्भावा-
भावदृशंसदा॥अनन्तरमबाह्यार्थंप्रत्य-
क्स्थंमुनिरञ्जसा॥८॥

उच्यतांतर्हिकयातुपरिपाट्यावाक्यार्थंवेत्तीति॥उच्यते,अन्वयव्यतिरेकाभ्याम्——

त्यक्तकृत्स्नेदमर्थत्वात्त्यक्तोऽहमितिमन्यते॥
नावगच्छाम्यहंयस्मान्निजात्मानमनात्म
नः॥९॥ [redacted]

अथशरीरादिबुद्धिपर्यन्तःस सर्वोऽनात्मैवेति प्रमाणाद्विनिश्चित्यकिमितिबुभुत्सातोनोपरम ते श्रृणु——

अनुच्छिन्नबुभुत्सश्च प्रत्यग्घेतोरनात्मनः ॥९॥
दोलायमानचित्तोऽयं मुह्यते भीतवन्नरः ॥१०॥

अविलुप्तविज्ञानात्मन आत्मत्वादेव नित्यसांनिध्याद् बुभुत्सुः किमिति न प्रतिपद्यत इति। यस्मात्——

यैरद्राक्षीत्पुराऽऽत्मानं यमनात्मेति वीक्षते॥
दृष्टेर्द्रष्टारमात्मानं तैः प्रसिद्धैः प्रमित्सति ॥११॥

कस्मात्पुनर्हेतोः पराचीनाभिः शब्दाद्यवलोकिनीभिर्बुद्धिभिरात्मानमनात्मवन्न वीक्षते इत्युच्यते——

चक्षुर्न वीक्षते शब्दमतदात्मत्वकारणात्॥
यथैवं भौतिकी दृष्टिर्नात्मानं परिपश्यति ॥१२॥

प्रत्यक्षादिप्रमाणस्वाभाव्यानुरोधेन तावत्तददर्शनकारणमुक्तम्। अथ प्रमेयस्वाभाव्यानुरोधेन प्रतिषेध उच्यते——

धीविक्रियासहस्राणां हानोपादानधर्मिणाम्॥
सदा साक्षिणमात्मानं प्रत्यक्त्वान्नाहमीक्षते ॥१३॥

क्व पुनरियं विवेकबुद्धिः किमात्मन्युताऽनात्मनीति। किंचातः। यद्यात्मनि कूटस्थत्वव्याघातोऽनात्मद-

र्शित्वात् अथाऽनात्मनि तस्याप्यचैतन्यान्न विवेकसं-
बन्ध इत्युच्यते। दाह्यदाहकतैकत्रेत्युक्तपरिहारात्

बुद्धावेव विवेकोऽयं यदनात्मतया भिदा ॥
बुद्धिमेवोपमृद्नाति कदलीं तत्फलं यथा ॥९४॥

सोऽयमतत्त्वेतत्त्वदृक्

अनुमानप्रदीपेन हित्वा सर्वाननात्मनः ॥
संसारैकावलम्बिन्या तदभावं धियेप्सति ॥९५॥

योऽयमन्वयव्यतिरेकजो विवेक आत्माऽनात्मविभागलक्षणोऽनात्मस्थः स्थाणौ संशयावबोधवत् प्रतिपत्तव्योऽयथावस्तुस्वाभाव्यान्मृगतृष्णिकोदकप्रबोधवदित्यत आह

संसारबीजसंस्थोऽयं तद्धिया मुक्तिमिच्छति ॥
शशो निमीलनेनेव मृत्युं परिजिहीर्षति ॥९६॥

अस्यार्थस्य दृढिम्ने श्रुत्युदाहरणम्

इममर्थं पुरस्कृत्य श्रुत्या सम्यगुदाहृतम् ॥
यच्चक्षुषेति विस्रब्धं न दृष्टेरिति च स्फुटम् ॥९७॥
बुद्ध्यन्तमपविद्ध्यैवं कोन्वहं स्यामितीक्षितुः ॥

श्रुतिस्तत्त्वमसीत्याह सर्वमानातिगामिनी ॥१८॥

एष संक्षेपतः पूर्वाध्यायत्रयस्यार्थ उक्तः सोऽयं न्याय्योपि वेदान्तार्थः शास्त्राचार्यप्रसादाल्लभ्योऽप्यनपेक्षितशास्त्राचार्यप्रसादोऽनन्यापेक्षसिद्धस्वभावत्वात्कैश्चिच्छद्महृद्धानैर्न प्रतीयते, तेषां संग्रहार्थमभिमतप्रामाण्योदाहरणम् ——

भगवत्पूज्यपादैश्चोदाहार्येवमेव तु ॥
सुविस्पष्टोऽस्मदुक्तोऽर्थः सर्वभूतहितैषिभिः ॥१९॥

किं परमात्मन उपदेश उतापरमात्मन इति । किं चाऽतो यदि परमात्मनस्तस्योपदेशमन्तरेणैव मुक्तत्वान्निरर्थक उपदेशोऽथापरमात्मनस्तस्यापि स्वत एव संसारस्वभावत्वान्निष्फल उपदेशः । एवमुभयत्रापि दोषवत्त्वात् । अत आह ——

अविविच्योभयं वक्ति श्रुतिश्चेत्स्याद्ग्रहस्तथा ॥
इति पक्षमुपादाय पूर्वपक्षं निरात्य च ॥२०॥

तच्चेदमविवेकात्स्वतो विविक्तात्मने तत्त्वमसीत्युपदिष्टम् ——

युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ।
यतोऽनभिज्ञे* वाक्यं स्याद्बधिरेष्विव गायनम् ॥२१॥

तस्य च युष्मदस्मद्विभागविज्ञानस्य का युक्तिरुपाय-भावं प्रतिपद्यते । शृणु—

अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च ।
स्यादेतदहमित्यत्र युक्ति॰ रेवावधारणे ॥२२॥

कथं तौ ॐ युक्तिरित्यत्राह—

नाद्राक्षमहमित्यस्मिन् सुषुप्तेऽन्यन्मनागपि ।
न वारयति दृष्टिं स्वां* प्रत्ययं तु निषेधति ॥२३॥

एवं विज्ञातवाच्यार्थे॰ श्रुतिर्लोकप्रसिद्धितः ।
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये ॥२४॥

तत्र त्वमिति पदं यत्र लक्षणया वर्तते सोऽर्थ उच्यते—

अहंशब्दस्य या निष्ठा ज्योतिषि प्रत्यगात्मनि ।
सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता ॥२५॥

अन्यच्चान्वयव्यतिरेकोदाहरणम्—

छित्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते ।

तथाशिष्टेनसर्वेणयेनयेनविशेष्यते ॥२६॥
विशेषणमिदंसर्वंसाध्वलङ्करणंयथा ॥
अविद्याध्यस्तमतःसर्वंज्ञातमात्मन्यसद्भवेत् ॥२७॥
तस्मात्त्यक्तेनहस्तेनतुल्यंसर्वंविशेषणम् ॥
अनात्मत्वेनतस्माद्ज्ञोमुक्तःसर्वविशेषणैः ॥२८॥
ज्ञात्वैवात्मासदाग्राह्योज्ञेयमुत्सृज्यकेवलः ॥
अहमित्यपियद्ग्राह्यंव्यपेताङ्गःसमंहितत् ॥२९॥
दृश्यत्वादहमित्येषनात्मधर्मोघटादिवत् ॥
तथान्येप्रत्ययाज्ञेयादोषाश्चात्माऽमलोह्यतः ॥३०॥

सर्वन्यायोपसंग्रहः ———

नित्यमुक्तत्वविज्ञानंवाक्याद्भवतिनान्यतः ॥
वाक्यार्थस्यापिविज्ञानंपदार्थस्मृतिपूर्वकम् ॥३१॥
अन्वयव्यतिरेकाभ्यांपदार्थःस्मर्यतेध्रुवम् ॥
एवंनिर्दुःखमात्मानमक्रियंप्रतिपद्यते ॥३२॥
सदेवेत्यादिवाक्येभ्यःप्रमास्फुटतराभवेत् ॥
दशमस्त्वमसीत्यस्माद्यथैवंप्रत्यगात्मनि ॥३३॥

वीक्षापन्नस्योदाहरणम् ———

युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ॥
यतोऽनभिज्ञे * वाक्यं स्याद्बधिरेष्विव गा-
यनम् ॥२१॥

तस्य च युष्मदस्मद्विभागविज्ञानस्य का युक्तिरुपाय-
भावं प्रतिपद्यते । शृणु——

अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च ॥
स्यादेतदहमित्यत्र युक्ति * रेवावधारणे ॥२२॥

कथं तौ * युक्तिरित्यत्राह——

नाद्राक्षमहमित्यस्मिन्सुषुप्तेऽन्यन्मनागपि ॥
न वारयति दृष्टिं स्वां * प्रत्ययं तु निषेधति ॥२३॥

एवं विज्ञातवाच्यार्थे * श्रुतिलोकप्रसिद्धितः ॥
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये ॥२४॥

तत्र त्वमिति पदं यत्र लक्षणयावर्तते सोऽर्थ उच्यते——

अहंशब्दस्य या निष्ठा ज्योतिषि प्रत्यगात्मनि ॥
सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता ॥२५॥

अन्यच्चान्वयव्यतिरेकोदाहरणम्——

छित्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते ॥

तथाशिष्टेनसर्वेणयेनयेनविशेष्यते ॥२६॥
विशेषणमिदंसर्वंसाध्वलङ्करणंयथा ॥
अविद्याध्यस्तमतःसर्वंज्ञातमात्मन्यसद्भवेत् ॥२७॥
तस्मात्त्यक्तेनहस्तेनतुल्यंसर्वंविशेषणम् ॥
अनात्मत्वेनतस्माद्ज्ञोमुक्तःसर्वविशेषणैः ॥२८॥
ज्ञातैवात्मासदाग्राह्योज्ञेयमुत्सृज्यकेवलः ॥
अहमित्यपियद्ग्राह्यंव्यपेताङ्गसमंहितत् ॥२९॥
दृश्यत्वादहमित्येषनात्मधर्मोघटादिवत् ॥
तथाऽन्येप्रत्ययाज्ञेयादोषाश्चात्माऽमलोह्यतः ॥३०॥

सर्वन्यायोपसंग्रहः ———

नित्यमुक्तत्वविज्ञानंवाक्याद्भवतिनान्यतः ॥
वाक्यार्थस्यापिविज्ञानंपदार्थस्मृतिपूर्वकम् ॥३१॥
अन्वयव्यतिरेकाभ्यांपदार्थःस्मर्यतेध्रुवम् ॥
एवंनिर्दुःखमात्मानमक्रियंप्रतिपद्यते ॥३२॥
सदेवेत्यादिवाक्येभ्यःप्रमास्फुटतराभवेत् ॥
दशमस्त्वमसीत्यस्माद्यथैवंप्रत्यगात्मनि ॥३३॥

दीक्षापन्नस्योदाहरणम् ———

नवबुद्ध्यपहाराद्धि स्वात्मानं दशपूरणम्॥
अपश्यन् ज्ञातुमेवेच्छेत् स्वमात्मानं जनस्तथा॥३४

अविद्याबद्धचक्षुष्ट्वात् कामापहृतधीः सदा॥
विविक्तं दृशिमात्मानं नेक्षते दशमं यथा॥३५॥

सोऽयमेवमविद्यापटलावगुण्ठितदृष्टिः सन् कथमुत्थाप्यत इत्याह——

यथा स्वापनिमित्तेन* स्वप्नदृक् प्रतिबोधितः॥
करणं कर्म कर्तारं स्वाप्नं नैवेक्षते स्वतः॥३६॥

अनात्मज्ञस्तथैवायं सम्यक् श्रुत्याऽवबोधितः॥
गुरुं शास्त्रं तथा मूढं स्वात्मनोऽन्यन्न पश्यति॥३७

स किं सकलसंसारप्रविविक्तमात्मानं वाक्यात्प्रतिपद्यते उत नेतीत्यत्र ब्रूमः। कूटस्थावगतिमात्रशेषत्वात्प्रतिपत्तेरत आह——

दण्डावसाननिष्ठः स्याद्दण्डसर्पो यथा तथा॥
नित्यावगतिनिष्ठं स्याद्वाक्याज्जगदसंशयम्॥

कुतस्तत्, यस्मात् पश्यन्निति यदा ह्येवैः प्रत्यक्त्वमजमद्वयम्॥ अपूर्वानपरानन्तं त्वमात्तदु-

पलक्ष्यते॥३९॥ तत्त्वमस्यादिवाक्योत्थ-
विज्ञानेनैवबाध्यते॥

यस्मात्——

अस्माद्यपरंरूपंनास्तीत्येवनिरूप्यते॥
अन्यथाग्रहणाभावाद्बीजंतत्स्वप्नबोधयोः॥४०॥

अस्यार्थस्यदृढिम्नेउदाहरणम्——

कार्यकारणबद्धौताविष्येते विश्वतैजसौ॥
प्राज्ञः कारणबद्धस्तुद्वौतौतुर्ये*नसिध्यतः॥४१॥
अन्यथागृह्णतःस्वप्नोनिद्रातत्त्वमजानतः॥
विपर्यासेतयोःक्षीणेतुरीयंपदमश्नुते*॥४२॥

तथाभगवत्पादीयमुदाहरणम्——

सुषुप्ताख्यंतमोऽज्ञानंबीजंस्वप्नप्रबोधयोः॥
स्वात्मबोधप्रदग्धंस्याद्बीजंदग्धंयथाऽभवम्॥
एवंगौडैर्द्राविडैर्नःपूज्यैरर्थःप्रभाषितः*॥४३॥
अज्ञानमात्रोपाधिःसन्नहमादिदृगीश्वरः॥४४॥

तत्रान्यथाग्रहणवदन्यथाग्रहणबीजग्रहणमनात्म
धर्मएवेत्याह——

इदं ज्ञानमहं ज्ञाता ज्ञेयमेतदिति त्रयम् ॥
योऽविकारो विजानाति परागेवास्य तत्तमः ॥४५॥

यत एतदेवमतस्तस्यैव बीजात्मनस्तमसश्चित्तधर्मविशिष्टस्य स्वकार्यैर्द्वितीयाभिसंबन्धो न त्वविकारिण आत्मन इत्याह दृष्टान्तेन——

रूपप्रकाशयोर्यद्वत्संगतिर्विक्रियावतोः ॥
सुखदुःखादिसंबन्धश्चित्तस्यैवं विकारिणः ॥

तदेतदन्वयव्यतिरेकाभ्यां दर्शयिष्यन्नाह——

संप्रसादे विकारित्वादस्तं याते विकारिणि ॥
पश्यतो नात्मनः किंचिद्द्वितीयं स्पृशतेऽण्वपि ॥

सोऽयं कूटस्थज्ञानमूर्त्तिरात्मा——

यथा प्राज्ञे तथैवायं स्वप्नजागरितान्तयोः ॥
पश्यन्नप्यविकारित्वाद्द्वितीयं नैव पश्यति ॥४८॥
एवं ज्ञानवतो नास्ति ममाहंमतिसंश्रयः ॥
भास्वत्प्रदीपहस्तस्य ह्यन्धकार इवाग्रतः ॥४८॥

तत्र दृष्टान्तः——

प्राक्प्रबोधाद्यथा सिद्धिर्द्वैतादन्यस्य वस्तुनः ॥

बोधादेवमसिद्धत्वं बुद्ध्यादेः प्रत्यगात्मनः ॥५०॥
स एष विद्वान् हानोपादानशून्यमात्मानमात्मनि पश्यन्——

सर्वमेवानुजानाति सर्वमेव निषेधति ॥
भेदात्मलाभोऽनुज्ञा स्यान्निषेधोऽतत्स्वभावतः ॥५१॥

सर्वस्योक्तत्वादुपसंहारः——

परमार्थात्मनिष्ठं यत्सर्ववेदान्तनिश्चितम् ॥
तमोऽपनुद्धियां * ज्ञानं तदेतत्कथितं मया ॥५२
एतावदिहोक्तम्——

नेहात्मविन्मदन्योऽस्ति न मत्तोऽज्ञोऽस्ति कश्चन ॥ इत्यजानन्विजानाति यः स ब्रह्मविदुत्तमः ॥५३॥

एवमात्मानं ज्ञात्वा किं प्रवर्तितव्यमुत निवर्तितव्यमाहोस्विन्मुक्तप्रग्रहतेत्युच्यते——

ज्ञेयाभिन्नमिदं * यस्माद् ज्ञेयवस्त्वनुसार्यतः ॥
न प्रवृत्तिं निवृत्तिं वा कटाक्षेणापि वीक्षते ॥५४॥

:::कुतएतद्ज्ञेयाभिन्नमितियतः——

प्रागात्मबोधाद्बोधोऽयंबाह्यवस्तूपसर्जनः * ॥
प्रध्वस्ताखिलसंसारस्त्वात्मैकालम्बनः * श्रुतेः ॥

एवमवगतपरमार्थतत्त्वस्यनशेषशेषिभावस्तत्कारणस्योत्सारितत्वादित्याह——

वास्तवेनैववृत्तेननिरुणद्धियतोभवम् ॥
निवृत्तिमपिमृद्नातिसम्यग्बोधःप्रवृत्तिवत् ॥५६॥
सकृदात्मप्रसूत्यैवनिरुणद्ध्यखिलंभवम् ॥
ध्वान्तमात्रनिरासेनततोन्यात्वन्यथामतिः * ॥
देशकालाद्यसंबन्धाद्देशादेर्मोहकार्यतः ॥
नानुत्पन्नमदग्धंवाज्ञानमज्ञानमस्त्यतः ॥५८॥
सम्यग्ज्ञानशिखिप्लुष्टमोहतत्कार्यरूपिणः ॥
सकृन्निवृत्तेर्बाध्यस्यकिंकार्यमवशिष्यते ॥५९॥

वास्तवेनैववृत्तेनाविद्यायाःप्रध्वस्तत्वान्नकिंचिदवशिष्यते इत्युक्तःपरिहारः। अथापरःसांप्रदायिकः——

निवृत्तसर्पः * सर्पोत्थंयथाकम्पंनमुञ्चति ॥
विध्वस्ताखिलमोहोऽपिमोहकार्यंतथात्मवित् ॥

यतः प्रवृत्तिर्बीजमु[illegible]

तरोरुत्खातमूल[illegible]॥

तथा बुद्धात्मन[illegible]॥

पश्चाल्लेपकपक्ष * [illegible]

बुद्धाद्वैतस्तत्त्व[illegible]॥

शुनां तत्त्वदृशां चैव[illegible]॥

कस्मान्न भवति, यस्मात्

स्वधर्मोऽज्ञायते ज्ञानं यथेष्टाचरणं ततः॥

धर्मकार्यैकधं तस्माद्यत्र धर्मोऽपि नेष्यते॥

प्रत्याचक्षाणाः ज्ञानेनो यथेष्टाचरणं [illegible]॥

यस्य सर्वे समारम्भाः प्रकाशं चेति सर्वदृक्॥

ति[illegible] सर्वप्रवृत्तिबीज यस्य तं ज्ञानं मुमुक्षव-

स्यायानविनष्टं भवति यथेष्टाचरणं, तदाह

यो [illegible] विरक्तः स्यात् [illegible] तस्मै प्रवर्तते॥

यो [illegible] विरक्तः [illegible] मुमुक्षुः [illegible]॥

तत्र दृष्टान्तः

[illegible]॥

कुत एतद्ज्ञेयाभिन्नमिति यतः —

प्रागात्मबोधाद्बोधोऽयं बाह्यवस्तूपसर्जनः ॥

प्रध्वस्ताखिलसंसारस्त्वात्मैकालम्बनः * श्रुतेः ॥

एवमवगतपरमार्थतत्त्वस्य न शेषशेषिभावस्तत्कारणस्योत्सारितत्वादित्याह —

वास्तवेनैव वृत्तेन निरुणद्धि यतो भवम् ॥

निवृत्तिमपि मृद्नाति सम्यग्बोधः प्रवृत्तिवत् ॥५६॥

सकृदात्मप्रसूत्यैव निरुणद्ध्यखिलं भवम् ॥

ध्वान्तमात्रनिरासेन ततोन्या त्वन्यथा मतिः * ॥

देशकालाद्यसंबन्धाद्देशादेर्मोहकार्यतः ॥

नानुत्पन्नमदग्धं वाज्ञानमज्ञानमस्त्यतः ॥५८॥

सम्यग्ज्ञानशिखिप्लुष्टमोहतत्कार्यरूपिणः ॥

सकृन्निवृत्तेर्बाध्यस्य किं कार्यमवशिष्यते ॥५९॥

वास्तवेनैव वृत्तेनाविद्यायाः प्रध्वस्तत्वान्न किंचिदवशिष्यते इत्युक्तः परिहारः । अथापरः सांप्रदायिकः —

निवृत्तसर्पः सर्पोत्थं यथा कम्पं न मुञ्चति ॥

विध्वस्ताखिलमोहोऽपि मोहकार्यं तथात्मवित् ॥

यतः प्रवृत्तिबीजमुच्छिन्नं तस्मात्——

तरोरुत्खातमूलस्य स्पर्शेनैव यथाक्षयः ॥
तथा बुद्धात्मतत्त्वस्य निवृत्त्यैव तनुक्षयः ॥६१॥

अथ लेपकपक्ष*निरासार्थमाह——

बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ॥
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ॥६२॥

कस्मान्न भवति, यस्मात्——

अधर्माज्जायतेऽज्ञानं यथेष्टाचरणं ततः ॥
धर्मकार्ये कथं तत्स्याद्यत्र धर्मोऽपि नेष्यते ॥६३॥

प्रत्याचक्षाण आह्वातो यथेष्टाचरणं हरिः ॥
यस्य सर्वे समारम्भाः प्रकाशं चेति सर्वदृक्*॥

तिष्ठतु तावत् सर्वप्रवृत्तिबीजघस्मरं ज्ञानं मुमुक्षुव-
स्थायामपि न संभवति यथेष्टाचरणं, तदाह——

यो हि यत्र विरक्तः स्यान्नासौ तस्मै प्रवर्तते ॥
लोकत्रयविरक्तत्वान्मुमुक्षुः किमितीहते ॥६५॥

तत्र दृष्टान्तः——

क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति ॥

मिष्टान्नध्वस्ततृड्ज्ञानन्नामूढस्तज्जिघत्सति॥६६

यतोऽवगतपरमार्थतत्त्वस्ययथेष्टाचरणंनमनागपि
घटतेमुमुक्षुत्वेऽपिच, तस्मात्——

रागोलिङ्गमबोधस्यचित्तव्यायामभूमिषु॥
कुतःशाड्वलतातस्ययस्याग्निःकोटरेतरोः॥६७

सकलपुरुषार्थसमाप्तिकारिणोऽस्यात्मावबोधस्य
कुतःप्रसूतिरित्युच्यते——

अमानित्वादिनिष्ठोयोयश्चाद्वेष्ट्रादिसाधनः॥
ज्ञानमुत्पद्यतेतस्यनबहिर्मुखचेतसः॥६८॥

उत्पन्नेऽऽत्मविज्ञानेकिमविद्याकार्यत्वात्प्रवृत्तिवन्नि
वृत्त्यात्मकामानित्वादयोनिवर्तन्तेउतनेति, नेति-
भ्रमः। किंकारणंनिवृत्तिशास्त्राऽविरुद्धस्वाभाव्या
त्परमात्मनोनतुनियोगवशात्। कथंतर्हि, शृणु——

उत्पन्नात्मप्रबोधस्यत्वद्वेष्टृत्वादयोगुणाः॥
अयत्नतोभवन्त्यस्यनतुसाधनरूपिणः॥६९॥

यतस्तदेवमतः——


इमंग्रन्थमुपादित्सुरमानित्वादिसाधनः॥


यत्नतःस्यान्नदुर्वृत्तःप्रत्यग्धर्मानुगोह्ययम्॥
नदातव्यश्चायंग्रन्थः ————
नाविरक्तायसंसारान्नानिरस्तैषणायच॥
नचायमवतेदेयंवेदान्तार्थप्रवेशनम्॥७१॥
ज्ञात्वायथोदितंसम्यग्ज्ञातव्यंनावशिष्यते॥
नचानिरस्तकर्मेदंजानीयदञ्जसाततः॥७२॥
निरस्तसर्वकर्माणःप्रत्यक्प्रवणबुद्धयः॥७[illegible]
निष्कामायतयःशान्ताजानन्तीदंयथोदितम्॥
श्रीमच्छङ्करपादपद्मयुगलंसंसेव्यलब्ध्वो-
च्चिवान्,ज्ञानंपारमहंस्यमेतदमलंस्वान्ता-
न्धकारापनुत्॥माभूदत्रविरोधिनीमतिर-
तः सद्भिःपरीक्ष्यंबुधैः,सर्वत्रैवविशुद्ध-
येमतमिदंसन्तःपरंकारणम्॥७४॥सुभा-
षितंचार्वपिनाऽमहात्मनांदिवाकरोनक्तदृशा-
*मिवामलः॥प्रभातिभात्येवविशुद्धचेत-
सांनिधिर्यथाऽपास्ततृषांमहाधनः॥७५॥
विष्णोःपादानुगांयांनिखिलभवनुदंशङ्करोऽ-

बामयोगात्सर्वज्ञंब्रह्मसंस्थंमुनिगणसहितं सम्यगभ्यर्च्यभक्त्या ॥ विद्यांगङ्गामिवाहंप्रवरगुणनिधेःप्राप्यवेदान्तदीप्तां कारुण्यात्तामवोचंजनिमृतिनिवहध्वस्तयेदुःखितेभ्यः ॥ वेदान्तोदरवर्तिभास्वदमलंध्वान्तच्छिदस्मद्धियो दिव्यज्ञानमतीन्द्रियेऽपिविषयेव्याहन्यतेनक्कचित् ॥ योनोन्यायशलाकयैवनिखिलंसंसारबीजंतमःप्रोत्सार्याऽऽविरकार्षीद्गुरुगुरुः पूज्यायतस्मैनमः ॥ ७७ ॥ संबन्धोक्तिरियंसाध्वीप्रतिश्लोकमुदाहृता ॥ नैष्कर्म्यसिद्धेर्ज्ञात्वेमांव्याख्याताऽसौभवेद्ध्रुवम् ॥ ७८ ॥ * ॥ + ॥ * ॥ + ॥ *

इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यशिष्यश्रीसुरेश्वराचार्यविरचितायांनैष्कर्म्यसिद्धौसम्बन्धोक्तौचतुर्थोऽध्यायः ॥ ४ ॥ *

॥ इतिशुभमस्तु ॥ इति ॥ श्री ॥








॥ श्री ॥

॥ अद्वैतसिद्धिसिद्धान्तसारः ॥

॥ श्रीगणेशायनमः ॥

स्वस्ति श्रीकृष्णतत्त्वं श्रुतिविदितमनाद्य-
द्वितीयं विशुद्धं मिथ्यादृश्यातिरिक्तं परसु-
खमकलं प्रत्यगात्मैक्यरूपं ॥ श्रुत्वा मत्वा-
ऽनुचिन्त्याऽनुभवदृढतया स्वप्रकाशं निधा-
य स्वान्ते कर्तुं प्रवृत्तो हरिभजनमयं सारम-
द्वैत सिद्धेः ॥ १ ॥ अद्वैतसिद्धिसिद्धान्तान्साधि-
तानेव युक्तिभिः ॥ बुभुत्सोः सुखबोधाय दर्श-
यामि यथाक्रमं ॥ २ ॥ ब्रह्मात्मैक्यं प्रमेयं य-
द्वेदान्तानामशेषतः ॥ दु (१) र्ज्ञेयं तद्विना
दृश्यमार्जनं तत्त्वबोधतः ॥ ३ ॥ अद्वैतं श्रुति-
तात्पर्यं ब्रह्मतत्वं निरंजनं ॥ विनिश्चितय वियां
तत्र युक्तं युक्तिप्रदर्शनं ॥ ४ ॥ द्वैतमिथ्यात्व-
सिद्धेर्हि ब्रह्मात्मैक्यं प्रसिद्ध्यति ॥ ततोद्वैतस्य

मिथ्यात्वमुपपाद्यं तदादितः ॥ ५ ॥ तत्साधननिरासाभ्यां स्वपक्षपरपक्षयोः ॥ स्वपक्षसाधनं तस्मात्कर्तव्यं युक्तिभिर्दृढं ॥ ६ ॥ जगन्मिथ्याऽस्ति दृश्यत्वाज्जडत्वादविभुत्वतः ॥ सत्वासत्वगिरा वक्तुमशक्यं तत्स्ववर्णवत् ॥ ७ ॥ स्वाधिष्ठाने परे तत्त्वेऽध्यस्तस्तस्य जगतोऽथवा ॥ त्रैकालिकनिषेधस्य प्रतियोगितयाऽस्तु तत् ॥ ८ ॥ वस्तुत्वेऽपि निषेधस्य ब्रह्माभिन्नत्वहेतुना ॥ नाद्वैतहानिर्नो वास्ति प्रपञ्चस्यापि वस्तुता ॥ ९ ॥ अतात्त्विको निषेधोऽपि व्यावहारिक इष्यते ॥ विरोधस्तुल्यसत्वेन विश्वतत्प्रतिषेधयोः ॥ १० ॥ क्वचित्प्रतीत्यनर्हत्वमत्यन्तासत्वमुच्यते ॥ न तथात्वं प्रपञ्चस्य स्वाधिष्ठाने प्रतीतितः ॥ ११ ॥ अतो न तुच्छतापत्तिः शुक्तिरूप्यवदस्य तु ॥ अनिर्वाच्यस्य मिथ्यात्वं सिद्धमारोपितत्वतः ॥

॥१२॥ मिथ्यात्वाभावसत्वस्य ब्रह्मरूपत्वमि-
ष्यते ॥ नित्यत्वं स्वप्रकाशत्वं विभुत्वं ब्रह्मण-
स्तथा ॥१३॥ पूर्णत्वमपरिच्छिन्नतया दिक्का-
लवस्तुभिः ॥ निर्द्धर्मकतया सर्वधर्माभावस्य-
सम्भवात् ॥१४॥ तत्वज्ञाननिवर्त्यत्वं मिथ्या-
त्वं जगतोऽस्तु वा ॥ ज्ञानप्रयुक्तावस्थानसामा-
न्यविरहस्य यत् ॥१५॥ प्रतियोगित्वमेवैतन्नि-
वर्त्यत्वं मतं यतः ॥ हेत्वात्मना स्वरूपेण चा-
वस्थानं द्विधा मतं ॥१६॥ ब्रह्मज्ञानप्रयुक्तेयं
विरहप्रतियोगिता ॥ न घटे मुद्गरापातात्सा
भवेद्धेत्ववस्थितौ ॥१७॥ अज्ञानस्य स्वका-
र्येण प्रविलीनेन वा सह ॥ वर्त्तमानेन वा ज्ञाना-
न्निवृत्तिर्बाध इष्यते ॥१८॥ तत्वमस्यादिवा-
क्योत्थसम्यग्धीजन्ममात्रतः ॥ अविद्या सह
कार्येण नासीदस्ति भविष्यति ॥१९॥ रूप्यो-
पादानमज्ञानं स्वकार्येण सहैव तत् ॥ स्वाधि-

ध्यानस्य विज्ञानात्साक्षात्काराग्निवर्त्तते ॥
॥२०॥ ज्ञानत्वव्याप्यधर्मेण तत्वज्ञाननिव-
र्त्यता ॥ यद्वा ज्ञाननिवर्त्यत्वं साक्षात्कारत-
येष्यते ॥२१॥ यद्वा स्वाश्रयनिष्ठस्यात्य-
न्ताभावस्य सर्वथा ॥ प्रतियोगित्वमेवास्तु
मिथ्यात्वं साधुसम्मतं ॥२२॥ मिथ्यात्वं
सद्विविक्तं वा मानसिद्धं सदिष्यते ॥ दोषा-
सहकृतज्ञानकरणं मानमीर्यते ॥२३॥ मि-
थ्यात्वस्यापि मिथ्यात्वे प्रपञ्चे सत्यता
न हि ॥ दृश्यत्वादेर्निषेध्यत्वावच्छेदक-
तयेष्यते ॥२४॥ मिथोविरहरूपत्वेऽसम-
सत्ताकयोर्न हि ॥ विरोधः सत्वमिथ्यात्व-
धर्मयोर्वा समुच्चयात् ॥२५॥ व्यावहारिक-
मिथ्यात्वं व्यावहारिकसत्यता ॥ हरन्नापी-
ह सत्यत्वं जातुकाल्पनिकं हरेत् ॥२६॥
मिथ्यात्वसाधने हेतुर्दृश्यत्वं तन्निरुच्य-

ते॥ शब्दादजन्यधीवृत्तिविषयो दृश्यमि-
ष्यते॥२७॥न शुद्धतुच्छयोरेवं व्यभिचा-
रो यतस्तयोः॥शब्दजन्यैकधीवृत्तिगो-
चरत्वं मतं द्वयोः॥२८॥सप्रकारकधीवृत्ति-
विषयत्वं तदस्तु वा॥कश्चिद्धर्मोऽस्ति सोपा-
ख्यः प्रकारो वृत्तिगो मतः॥२९॥न निष्प्रका-
रकज्ञानविषये शुद्धचिद्धने॥व्यभिचरो न
वा तुच्छे निरुपाख्यप्रकारगे॥३०॥चैतन्य
विषयत्वं वा चित्सम्बन्धित्वरूपधृक्॥न
चिति व्यभिचारोऽस्य सम्बन्धस्याप्यभा-
वतः॥३१॥यद्वा स्वव्यवहारे स्वातिरिक्ता-
याः स्वसंविदः॥अपेक्षावत्त्वमेवास्तु दृश्य-
त्वं हेतुरंजसा॥३२॥शुद्धं वा वृत्त्यभिव्यक्तं
चिन्मात्रं वा घटादिगं॥संविच्छब्देन ते-
नासौ व्यवहारोऽपि सर्वगः॥३३॥ब्रह्मणः
स्फूर्तिरूपे स्वातिरिक्ताया न संविदः॥

व्यवहारे नित्यसिद्धेऽपेक्षाऽस्तीति न दृश्य-
ता॥३४॥अस्तु वाऽस्वप्रकाशत्वं दृश्यत्वं
ब्रह्मगं न तत्॥ब्रह्मणः स्वप्रकाशत्वं यत्सा-
क्षादिति च श्रुतेः॥३५॥स्वापरोक्ष्येऽनपेक्ष-
त्वं स्वप्रकाशत्वमन्यतः॥अन्याधीनापरो-
क्षत्वाद्दृश्यत्वं स्याद्घटादिषु॥३६॥अवे-
द्यत्वेऽपरोक्षैकयोग्यताभावरूपि तत्॥
दृश्यत्वं तत्र नासिद्धिर्हेतुवैकल्यमेव वा॥
॥३७॥जडत्वमपि हेतुः स्याज्जगन्मिथ्या-
त्वसाधकं॥अज्ञानत्वं जडत्वं स्यादनात्मत्व-
मथास्तु वा॥३८॥अर्थोपलक्षितं भानं ज्ञान-
त्वेनोच्यते श्रुतौ॥तन्न व्यभिचरेन्मोक्षद-
शायामपि चिद्घने॥३९॥एवमानन्दभि-
न्नत्वमनात्मत्वं भवेन्नयात॥ब्रह्मत्वं वि-
षयोत्थेऽपिसुखे ज्ञानात्मनि स्वतः॥४०॥
परिच्छिन्नत्वमप्यस्ति हेतुर्मिथ्यात्व-

साधने॥ दिक्कालवस्तुनिच्छेदशून्यत्वा-
दात्मगं न तत्॥४१॥ स्वान्यूनसमसत्ता-
काभावैकप्रतियोगिता॥ प्रत्यज्ञानविष-
न्मुख्ये नातो सिद्धिरिहेष्यते॥४२॥ तस्मा-
द्वेति श्रुतिः प्राह जन्यत्वं वियदादिषु॥
अतोऽन्यदार्त्तमित्याह ब्रह्मभिन्नं विन-
श्यति॥४३॥ घटाद्याः स्वानुगस्फूर्तिव-
स्तुन्यारोपिता इमे॥ विभक्तत्वाद्यथा
सर्पमालाद्या रज्जुवद्वंतवे॥४४॥ अस्ति
प्रतीयमानत्वं स्वाभाववति वस्तुनि॥ क
ल्पितत्वं निवर्त्यत्वं स्वरूपज्ञानतोऽथवा
॥४५॥ स्वोपादानैकनिष्ठस्यात्यन्ता-
भावस्य सर्वथा॥ प्रतियोगी पटोऽयं स्या-
दंशित्वादितरांशिवत्॥४६॥ मिथ्यात्व-
साधकाः सर्वे ये दृश्यत्वादिहेतवः॥ सो-
पाधिके न सन्त्येत उपाधेरनिरूपणात्॥

॥४७॥ आभाससाम्यं नान्येषां नैते बाधि-
तगोचराः॥ प्रत्यक्षयोग्यसत्वस्यानिरुक्ते-
र्बाधकं न तत्॥४८॥ तस्माद्ध्यक्षयोग्य-
स्य सत्त्वस्येहानिरुक्तितः॥ नाध्यक्षबाधो-
मिथ्यात्वलिङ्गस्यात्रोपपद्यते॥४९॥ न(१)
लौकिकं न सामान्यजन्यं साक्ष्यात्मकं च
न॥ प्रत्यक्षं बाधते लिङ्गं मिथ्यात्वस्यानु-
मापकं॥५०॥ सन्घटश्चेत्यधिष्ठानब्रह्मैव
स्त्ववभासते॥ यथेदं रूप्यमित्यत्र भाती-
दं रजताश्रयः॥५१॥ रूपादिहीनकालादे-
रक्षगोचरता यथा॥ तथा रूपादिहीनस्य
ब्रह्मणः किं न सम्भवेत्॥५२॥ सर्वाधिष्ठा-
नमेवैकं सत्सर्वत्रानुभूयते॥ न वा वेदविरो-
धेन मात्वंमानान्तरं भजेत्॥५३॥ चन्द्रे
प्रादेशप्रत्यक्षं यथाऽऽगमविरोधतः॥ अ-
प्रमाणं तथाऽध्यक्षं भेदग्राहि न सा भवे-

त्॥५४॥असम्भावितदोषस्यापौरुषेयत्वात्स्वतः॥यथा प्रमात्वं वेदस्य तथा मानान्तरे न तत्॥५५॥वेदानुकूलतर्कोऽपि प्रत्यक्षात्प्रबलो यतः॥ततो न तेन बाधोऽस्ति मिथ्यात्वानुमितेरपि॥५६॥ नोपजीव्यविरोधोपि शङ्क्यो यस्मान्न बाध्यते॥उपजीव्यं स्वरूपं यद्बाध्यते तद्विलक्षणं॥५७॥मिथ्याभूतेन सम्यग्धीर्जन्यते प्रतिबिम्बवत्॥ध्वनिधर्मविशिष्टैश्च वर्णैः शाब्दी प्रमा यथा॥५८॥प्रामाण्यं रूपतो मिथ्या तदर्थो न मृषा भवेत्॥सर्वबाधावधित्वेन ब्रह्मैव विषयो यतः॥५९॥विपक्षबाधकोपेतं प्रत्यक्षस्यास्ति बाधकं॥अनुमानमपीत्येतद्बलवद्धि परीक्षितं॥६०॥परीक्षितप्रमाणत्वशब्दबाध्यमपीष्यते॥प्रत्यक्षं तात्त्विकत्वेन व्या-

वहारिकगोचरं ॥६१॥ व्यावहारिकमानत्व-
मागमेन न बाध्यते ॥ बाध्यते तात्त्विकं त-
स्य प्रामाण्यमपरीक्षितं ॥६२॥ न प्रत्यक्षा-
विरोधाय तत्त्वमोर्लक्षणाऽऽश्रिता ॥ किन्तु
तात्पर्यविषयीभूताखण्डप्रतीतये ॥६३॥ अ-
न्यशेषममुख्यार्थं वाक्यं स्यात्प्रस्तरादि-
कं ॥ अनन्यशेषमद्वैतवाक्यं मुख्यार्थमि-
ष्यते ॥६४॥ शक्यार्थमात्रबोधित्वं न मु-
ख्यार्थत्वमिष्यते ॥ तात्पर्यविषयीभूतस्वा-
र्थबोधित्वमेव तत् ॥६५॥ अमुख्यार्थं तथा-
ऽन्यार्थतात्पर्यकमितीष्यते ॥ न लाक्षणिक-
मात्रं वा विभागोऽयं विविच्यतां ॥६६॥
तथा चाद्वैतवाक्यस्य लक्षणाश्रयणेऽपि
हि ॥ मुख्यार्थत्वं सुसंपन्नं तात्पर्यविषयत्व-
तः ॥६७॥ मानान्तरविरोधे सत्येव स्या-
ल्लक्षणेत्यपि ॥ निरस्तं लक्षणा यस्मान्न

मुख्यार्थत्वबाधिका ॥६८॥ तस्मादद्वैतवा-
क्यं हि सिद्धं प्रत्यक्षबाधकं ॥ स्वार्थेतात्पर्य-
वत्त्वेन बलवत्तरभावतः ॥६९॥ प्राबल्यमा-
गमस्यैवापच्छेदन्यायतो मतं ॥ पौर्वापर्ये-
हि पूर्वस्य दौर्बल्यं प्रकृतेरिव ॥७०॥ तत्पर-
त्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकं ॥ पूर्व-
स्य बाधकं नायं सर्प इत्यादिवाक्यवत् ॥
॥७१॥ व्यावहारिकप्रामाण्यं प्रत्यक्षादेः श्रुते-
स्तु तत् ॥ तात्त्विकत्वविरोधेन तत्परत्वं
ततः श्रुतेः ॥७२॥ मानान्तराबाधितत्वात्प-
रत्वं तेन च श्रुतेः ॥ व्यभिचारः परत्वस्य
न प्रमानन्तरभ्रमे ॥७३॥ अपवादापवादे स्या-
दुत्सर्गस्य व्यवस्थितिः ॥ निर्दोषत्वं श्रुतेस्त-
स्मान्नान्यथासिद्धमिष्यते ॥७४॥ तात्पर्यवि-
षये यस्मात्प्रामाण्यं चाभ्युपेयते ॥ पूर्वोक्त-
न्यायतस्तस्मान्न वैषम्यं मनागपि ॥७५॥

न मिथ्यात्त्वानुमानस्य वन्हिशैत्यानुमानव-
त्॥कालात्ययापदिष्टत्वं विशेषोऽस्ति यत-
स्तयोः॥७६॥औष्ण्यवल्लिङ्गतो ग्राह्यं शैत्यं तु
व्यावहारिकं॥औष्ण्यप्रत्यक्षतः साम्याल्लिङ्ग-
ग्राह्यं हि बाध्यते॥७७॥प्रत्यक्षसिद्धं सत्त्वं
तु प्रकृते व्यावहारिकं॥तद्विरुद्धं न मिथ्यात्वं
वस्तुसत्वविरोधि तत्॥७८॥व्यावहारिकस-
त्त्वैकग्राहकेण न बाध्यते॥प्रत्यक्षेण ततो व-
न्हिशैत्यग्राहि न साम्यभाक्॥७९॥ मानं
परीक्षितत्वेन प्रत्यक्षं प्रबलं भवेत्॥नोपजी-
व्यापरोक्षत्वादिना प्राबल्यमश्नुते॥८०॥अ-
तोऽनुमानशब्दाभ्यां प्रत्यक्षे बाध्यते रिता
॥अपरीक्षितभावेन चन्द्रप्रादेशिकत्ववत्॥
॥८१॥पार(१)मार्थिकमद्वैतं प्रविश्य शरणं
श्रुतिः॥विरोधादुपजीव्येन न बिभेति कदा
चन॥८२॥प्रत्यक्षाद्वेदवाक्यस्याद्वैततात्प-

येकस्य तु॥प्राबल्यं तेन बाध्यत्वं प्रत्यक्ष-
स्य श्रुतेर्गिरा॥८३॥अध्यस्तग्राहि प्रत्यक्ष-
मधिष्ठानप्रमावहा॥बाधते श्रुतिरद्वैतब्रह्म-
तत्त्वावबोधिका॥८४॥अचिन्त्यं शब्दसा-
मर्थ्यं बुद्ध्वा ब्रह्मात्मबोधके॥वेदान्तवाक्ये
सन्देहो न कार्यो दोषवर्जिते॥८५॥अ(१)त्य-
न्तासत्यपि ज्ञानमर्थे: शब्द: करोति हि॥
अबाधात्तु प्रमामत्र स्वत:प्रामाण्यनिश्चलां
॥८६॥अतोऽवबोधक(२)त्वेन दुष्टकार-
णवर्जनात्॥अबाधाच्च प्रमाणत्वं वस्तुन्य-
क्षादिवच्छ्रुते:॥८७॥प्रत्यक्षादिप्रमाण-
स्य व्यावहारिकमात्वत:॥तात्त्विकं न प्र-
माणत्वमतो नास्ति विरोधधी:॥८८॥अ-
द्वैतपरवेदान्तानुमानाद्यविरोधिता॥प्रत्य-
क्षादेरत: सिद्धा मा विबाधविनिश्चयात्॥
॥८९॥न चानुमानबाध्यत्वं मिथ्यात्वा-

नुमितेरपि ॥ व्याप्यत्वासिद्धिदोषाद्यैर्दुष्ट-
त्वात्तेऽनुमाऽप्रमा ॥ ८० ॥ श्रुत्यनुग्राहकत्वा-
च्च सद्धेतोर्व्याप्तिदर्शनात् ॥ मूलप्रमाणसद्भा-
[redacted]वान्मिथ्यात्वानुमितिर्ध्रुवा ॥ ८१ ॥ न च
सत्त्वानुमानं स्याज्जगत्यर्थक्रियाक्षमे ॥ स्वा-
प्ने हि कामिनीसङ्गे व्यभिचाराद्वृथाऽनुमा ॥
॥ ८२ ॥ भ्रान्त्या प्रतीयमानेऽर्थे न सत्त्वं पार-
मार्थिकं ॥ न हि स्वाप्ने प्रियाद्यर्थे पारमार्थि-
कता भवेत् ॥ ८३ ॥ चिदध्यस्तत्वमिथ्यात्वे
तुल्ये स्वाप्नेऽथ जागरे ॥ अर्थक्रियासमर्थत्व-
मपि तुल्यं तयोर्द्वयोः ॥ ८४ ॥ प्रसद्धिलक्षणं
विश्वमपरोक्षप्रतीतितः ॥ सद्धिलक्षणमप्येत-
द्बाध्यत्वात्स्वाप्नवस्तुवत् ॥ ८५ ॥ सदसत्त्वे
विरुद्धत्वान्नास्मिन्सम्भवतो यतः ॥ अतोऽ
निर्वाच्यता सिद्धयेन्मिथ्यात्वं तत एव हि
॥ ८६ ॥ ऐन्द्रजालिकवन्नेशो भ्रान्तत्वापत्ति-

रण्यपि॥ तन्मायाकल्पितत्वेऽपि नापारो-
क्ष्याद्यसम्भवः॥८७॥ देहात्मैक्यभ्रमे य-
द्वज्जीवाविद्याप्रकल्पिते॥जीवापरोक्ष्यम-
स्त्येवं नाविद्यामाययोर्भिदा॥८८॥ स्वप्नप्र-
पञ्चवन्मायामात्रमित्यादिसन्नयात्॥ ब्रह्म-
ज्ञानैकबाध्यत्वात् तदज्ञानप्रकल्पितं॥८९॥
नार्थातिरिक्तोऽज्ञानेऽस्ति विशेषस्तत्त्ववि-
न्मतः॥९(१) येनैव विशेषो हि निराकारस्त-
याधियां॥१००॥ ब्रह्मज्ञानेतराबाध्यब्रह्मान्या
सत्व(२)नाश्रयं॥ पारमार्थिकसत्त्वाधिक-
रणावृत्तिमद्भवेत्॥१॥ शुक्तिरूप्यत्ववद्ब्र-
ह्मावृत्तित्वात्सत्यभेदवत्॥ ब्रह्मान्यत्वाज्ज-
गत्सर्वं मिथ्या स्याच्छुक्तिरूप्यवत्॥२॥
ब्रह्मत्वं ब्रह्मवृत्तित्वान्न भेदप्रतियोगि तत्॥
न सन्निष्ठो भवेज्जातु भेदः सत्प्रतियोगि-
कः॥३॥ मिथ्यात्वं ब्रह्मतुच्छातिरिक्तत्व-

व्यापकं भवेत्॥ समस्तमिथ्यावृत्तित्वाद्यया
दृश्यत्वमिष्यते॥४॥ दृश्यत्वं सदवृत्ति स्या-
दभिधेयैकवृत्ति यत्॥ शुक्तिरूप्यत्ववद्भ्रा-
न्तिसिद्धवस्तुगतं यतः॥५॥ परमार्थसद्भिन्न-
त्वव्याप्यं दृश्यत्वमस्तु वा॥ दृश्यान्यावृत्तिध-
र्मत्वात्प्रातिभासिकता समं॥६॥एवमन्येऽ-
पि मिथ्यात्वे विपश्चिद्भिर्यथोचितं॥ प्रयोगा-
ऊहनीयाः स्युर्वादध्वान्तप्रहाणये॥७॥ हेत-
वोभीष्टसिद्ध्यर्थं सम्यञ्चो बहवश्च नः॥ तल्पाः
परस्य दुष्टाश्च ज्ञातव्या युक्तिभिर्बुधैः॥८॥
शब्दबाध्यं न मिथ्यात्वं शब्दतात्पर्यमद्व-
ये॥ तत्र सिद्धे यतः सर्वविश्वमिथ्यात्वम-
न्तरा॥९॥ विश्वं सत्यमिति श्रौतं वाक्यं स्तु-
ति परं मतं॥ त्रैकालिकनिषेधोऽस्याभिम-
तोऽस्त्यद्वयश्रुतेः॥१०॥ तात्पर्यलिङ्गसंयुक्ता
श्रुतिरद्वैततत्परा॥ तत्रापि त्रिविधं लिङ्गम-

र्थनिष्ठं प्रमावहं ॥११॥अज्ञातत्वादिभेदेन
निर्विवादं सत्तां मतं ॥शब्दनिष्ठं तु त्रिविधं
प्रसक्त्यन्तरवारकं ॥१२॥उपक्रमोपसंहृत्यो-
रैक्यरूप्यमिहादिमं ॥अभ्यासश्चार्थवादश्च
निर्विवादमिति त्रयं ॥१३॥अज्ञातत्त्वं मतं
मानान्तरसिद्धे चिदद्वये॥सप्रयोजनता मो-
क्षहेतुधीबिषयत्वतः ॥१४॥अबाधितत्त्वं
सन्दिग्धं तच्च निर्णीयते स्फुटम्॥अन्यथाऽ
नुपपत्त्या च गतिसामान्यतस्तथा॥१५॥
न हि विश्वनिषेधात्मा द्वैतं स्याद्व्यावहारि-
कं॥येन तत्र श्रुतेः सिद्ध्येत्प्रामाण्यं व्यावहा-
रिकं॥१६॥अतस्तत्र श्रुतेरस्ति प्रामाण्यं ता-
त्त्विकं परं॥व्यावहारिकसत्यत्त्वं द्वैते तत्र
श्रुतेरपि॥१७॥व्यावहारिकमेवास्ति प्रामा-
ण्यं न तु तात्त्विकं॥मिथो विरुद्धयोर्नास्ति
तात्त्विकत्त्वप्रयोगतः॥१८॥विश्वसत्यत्व-

वाक्यस्य गतिरस्त्यन्यथैव हि॥ सामाना-
धिकरण्यं हि यतः सिद्धं चतुर्विधं॥१९॥
अध्यासे स्यादिदं रूप्यमभेदे तत्त्वमस्यपि
॥ स्थाणुः पुमांस्तु बाधायां [redacted] वैशिष्ट्ये
नीलमुत्पलं॥२०॥अध्यासे वाथ बाधायां
विश्वं सत्यमितीष्यते॥ न तेनाद्वैततात्पर्य-
वतोवाक्यस्य बाधनं॥२१॥ यत्त्वेकाकी
न रमत इति गीः सप्रपञ्चतां॥ पुमर्थमाह
तन्नैवं सा ऽविवेकिपरा श्रुतिः॥२२॥ एकधै-
वेति वेदान्तः साक्षान्मोक्षैकहेतुतां॥ प्राहाद्वै-
तात्मबोधस्य निष्प्रपञ्चैकतत्परः॥२३॥
विश्वसत्यत्वगीस्तस्माद्व्यावहारिकसत्त्व-
गा॥ब्रह्मज्ञानेतराबाध्यं व्यावहारिकमिष्य-
ते॥२४॥अप्रामाण्यप्रसङ्गोऽपि न सत्यत्व-
श्रुतेर्मम॥अतत्त्वावेदकत्वेन स्यादनिष्टक-
रो मनाक्॥२५॥ तात्पर्येण तु सर्वासां श्रुती-

नां सम्मतं समं ॥अस्मत्सिद्धान्तगं तत्त्वावेद-
कत्वं समन्वयात्॥२६॥अनन्यशेषमिथ्या-
त्वश्रुतेः स्वार्थपरत्वतः॥अन्यशेषतया वि-
श्वसत्यत्वश्रुतिरन्यगा॥२७॥तत्परत्वेन
चाद्वैतश्रुतेः प्राबल्यमिष्यते॥ततो न तद्वि-
रोधेन सत्यं विश्वं वदेच्छ्रुतिः॥२८॥पक्षा-
दीनां हि मिथ्यात्वबोधनेऽपि न नः क्षतिः॥
साधकस्य च मिथ्यात्वे न क्षतिः सत्वसा-
धने॥२९॥प्रतिबिम्बस्य बिम्बैकसाधनत्व-
मिहेक्ष्यते॥तस्य बिम्बात्मना सत्वे मिथ्या-
त्वं तु स्वरूपतः॥३०॥शुभादिसूचकत्वं
हि स्वाप्नार्थस्यासतोऽपि च॥वर्णारोपितदी-
र्घत्वाद्यपि सत्यार्थबोधकं॥३१॥मायाक-
ल्पितहस्त्यादिर्भयकम्पादिकारणं॥अतो
न तात्त्विकं सत्वं साधकत्वे प्रयोजकं॥३२॥
अर्थावच्छिन्नमेवास्ति ज्ञानं सर्वत्र कारणं॥

न केवलमतोप्यर्थो हेतुरस्ति मृषात्मकः
॥३३॥ नह्यर्थगतमौत्कृष्ट्यं विना ज्ञानं सु-
खादिके॥शक्नोत्यौत्कृष्ट्यमाधातुमितोऽ
र्थस्तत्र कारणं॥३४॥न चाप्रयोजकं मि-
थ्यात्वानुमानं यतोऽन्यथा॥दृग्दृश्ययोर्हि
सम्बन्धो दृश्यसत्त्वे न सम्भवेत्॥३५॥
तस्मादाध्यासिकः सिद्धः सम्बन्धो दृग्दृश्य-
योः॥ साक्षाच्चिद्दृक्प्रकाशः स्यात्स्वसंसृष्टप्र-
काशकः॥३६॥दृश्याधिष्ठानरूपेण न परम्प-
रया भवेत्॥वृत्त्याऽऽवरणभङ्गे चित्प्रकाशो-
ऽनावृतः स्वतः॥३७॥अतो वृत्तेः पुरा दृश्या-
प्रतीतिरुपपद्यते॥धीवृत्तेरुदयात्पूर्वमज्ञा-
तार्थप्रसिद्धये॥३८॥धीवृत्तिव्यतिरिक्तस्य
ज्ञानस्यावश्यकत्वतः॥अन्यथा साधकाभा-
वे स्यादर्थो नरशृङ्गवत्॥३९॥वृत्तिरूपं न
तज्ज्ञानं किं तु साक्षि चिदद्वयं॥वृत्तिगो-

त्पत्तिनाशाद्यसंस्पृष्टं विविधं स्ववत् ॥४०॥
अज्ञानसाधकत्वात्तन्नाज्ञानविनिवर्तकं ॥
तच्च वृत्त्युपरक्तं सदज्ञानान्ध्यनिवर्तकं ॥
॥४१॥ सर्वतीर्थदृशां सिद्धिः स्वाभिप्रेतस्य
वस्तुनः ॥ यदस्त्युपगमादेव तत्सिद्धिर्वार्य-
ते कुतः ॥४२॥ सर्वतीर्थदृशां तावत्सामान्यं
मानलक्षणं ॥ अज्ञातार्थावगमनं त्वदुक्ते
तन्न युज्यते ॥४३॥ स्वतः सिद्धोऽथवासिद्धो
देहादिस्ते भवन्भवेत् ॥ प्रमाणानां प्रमा-
णत्वं नोभयत्रापि लभ्यते ॥४४॥ प्रमा-
णान्यन्तरेणापि देहादिश्चेत्प्रसिद्ध्यति
॥ वद प्रमाणैः कोन्वर्थो न हि सिद्धस्य
साधनं ॥४५॥ स्वतोऽसिद्धे प्रमेये तु ना-
सतो व्यञ्जिका प्रमा ॥ नाभिव्यनक्ति स-
विता शशशृङ्गं स्फुरन्नपि ॥४६॥ प्रतिबि-
म्बितचैतन्यं घटाधिष्ठानतोऽपृथक् ॥

सर्वावभासकर्तृत्वं चिद्वस्तुनोऽतोऽद्वयात्म-
नः ॥४७॥ चिदध्यस्ततया सर्वं चिदज्ञानैक-
कारणं ॥ चिज्ज्ञानेनैव [redacted] बाध्यं तन्न चि-
तोऽतः पृथङ् मनाक् ॥४८॥ विश्वस्याध्या-
सिकत्वेपि प्रातिभासिकवस्तुनः ॥ वैलक्ष-
ण्यं पुरा वृत्तेश्चिदध्यस्तं घटादि यत् ॥४९॥
इन्द्रियद्वारतश्चित्तं तत्संयुक्तं घटादिकं ॥
विषयं व्याप्य तेजस्त्वात्तदाकारं भवत्यपि
॥५०॥ अविद्योपाधिको जीवः सर्वव्यापी
मतः क्वचित् ॥ तथाऽन्तःकरणोपाधिः परि-
च्छिन्नो मतः क्वचित् ॥५१॥ तत्राद्ये विषया-
भासि जीवचैतन्यमिष्यते ॥ द्वितीये ब्रह्मचै-
तन्यं विशेषोऽयं विविच्यतां ॥५२॥ जीवस्या-
नावृतत्वे वाऽवृतत्वे वा मते भवेत् ॥ विषयो-
परागार्थो वा ऽऽवरणाभिभवाय वा ॥५३॥
वृत्तिः स्यात्सर्वगत्वेऽस्य प्रतिकर्मव्यवस्थ-

तो ॥ परिच्छिन्नत्वपक्षे साऽभेदाभिव्यक्त-
ये मता ॥ ५४ ॥ उपपादनमेतेषां युक्तिभिर्वि-
स्तरेण तु ॥ ज्ञेयमस्मत्कृते प्रत्यक्तत्वचि-
न्तामणौ स्फुटं ॥ ५५ ॥ एतः सत्यामविद्या-
यां शक्तेरभिभवादपि ॥ तूलाज्ञानक्षतेर्वा स्या-
देकदेशविनाशतः ॥ ५६ ॥ कटवद्वेष्टनाद्वा-
ऽप्यवृतेर्भीतभटादिवत् ॥ आवृतिक्षत्यनिर्मो-
क्षबाधानामुपपत्तितः ॥ ५७ ॥ अवस्थावद
भिन्नैवावस्थाऽज्ञानात्मिका मता ॥ अज्ञा-
नैक्यं तु सर्वत्राऽस्त्यनुस्यूतैकरूपतः ॥
॥ ५८ ॥ अनेकाज्ञानपक्षे तु न शङ्कोदेति म-
न्मने ॥ एकेनैव विनाशेऽपि व्यवस्था प्राग
भाववत् ॥ ५९ ॥ न मिथ्यात्वानुमानं वा
प्रतितर्कपराहतं ॥ ब्रह्मणो निर्विशेषस्य निः-
सामान्यस्य वस्तुतः ॥ ६० ॥ स्वप्रकाशतया
ज्ञातेप्यानन्दत्वादमानतः ॥ अधिष्ठानत्व-

मस्त्येव सामान्यादेश्च सम्भवात्॥६१॥
कल्पितानां हि सामान्यविशेषाणां प्रवाह-
तः॥अनादित्वेन नो शङ्क्यमत्राऽन्योन्या-
श्रयादिकं॥६२॥सत्त्वानन्दत्वमुख्याना-
मेव कल्पितभेदतः॥सामान्यत्वात्तथा
पूर्णानन्दत्वादेर्विशेषता॥६३॥आनन्दा-
द्यात्मना तस्याऽऽवृतस्याऽपि चिदात्मनः॥
सद्रूपेण प्रकाशस्य सम्भवान्न क्षतिः क्वचि-
त्॥६४॥यत्प्रसादादविद्यादि सिद्ध्यतीव
दिवानिशं॥तमप्यपन्हुतेऽविद्या नाज्ञान-
स्यास्ति दुष्करं॥६५॥विश्वोपादानविष-
याज्ञानस्य श्रवणादिजम्॥वृत्तिरूपं विरो-
धि स्याज्ज्ञानं न तु चिदात्मकं॥६६॥
अनादित्वेन चाऽविद्याध्यासे दोषानपे-
क्षता॥अन्यान्तःकरणाध्यासे त्वविद्या स-
र्वदोषभूः॥६७॥अधिष्ठानापरोक्षत्वं का-

रणं सकलभ्रमे ॥ चैतन्यस्यापरोक्षत्वं स्व-
प्रकाशतया स्वतः ॥ ६८ ॥ अध्यस्तत्वादवि-
द्यायाः स्वावच्छिन्ने चिदात्मनि ॥ तेनैव सा-
क्षिणः तस्या अपरोक्षत्वमिष्यते ॥ ६९ ॥ सम-
सत्ताकता ऽविद्यादोषद्वैतप्रपञ्चयोः ॥ कार्य्य-
कारणभावेन मिथ्यात्वमुभयोः समं ॥ ७० ॥
वेदान्तवाक्यजं ज्ञानं मतं स्वपरबाधकं ॥
नानवस्था ऽस्ति दृश्यत्वमात्रबाधे ऽपि
बाधकं ॥ ७१ ॥ यद्यपि ब्रह्मचैतन्यं ज्ञानं
वृत्तिगतं स्वतः ॥ सत्यं तथा ऽपि धीवृत्तेर्मि-
थ्यात्वाद्बाधसम्भवः ॥ ७२ ॥ नाधिष्ठान-
विषयः प्राक् स्यात्तस्या मिथ्यात्वधीरपि ॥
ततस्तत्सिद्धये पूर्वं प्रवृत्तिरुपपद्यते ॥ ७३ ॥
आत्मैक्यज्ञानबाध्यं तदज्ञानं तत्र कल्पि-
तं ॥ सकार्यमत स्तस्य नान्यथा विनिव-
र्तनं ॥ ७४ ॥ वेदान्तश्रवणादिभ्यो वृत्तेर्जन्म

न कर्मभिः॥ तेषां तद्योग्यतासिद्ध्यै विधि-
र्नोत्पत्तये धियः॥७५॥ तत्वज्ञानं विनाऽ
विद्यानिवृत्तिर्नान्यतो भवेत्॥ न ज्ञाने श्र-
वणाद्यन्यत्साधनं वेद उच्यते॥७६॥ मि-
थ्यात्त्वेऽपि प्रपञ्चस्य श्रुतिसूत्रादिनिर्ण-
ये॥ विरोधतन्निरासोक्तिर्व्यावहारिकस-
त्त्वतः॥७७॥ मृध्यस्तेऽपीन्द्रजालादा-
वैन्द्रजालिकपूरुषे॥ ईक्षापूर्वकस्रष्टृत्वं
दृष्टं स्यात्प्रकृते तथा॥७८॥ मिथ्यास्वा-
प्नरथादीनां सृष्टिरुच्यत आगमे॥ मृध्य-
स्तस्याऽपि सर्पादेर्भयकम्पादिहेतुता-
॥७९॥ परमार्थिकदृष्ट्या तु न च शङ्का
न चोत्तरं॥ तदनन्यत्वमित्यत्र श्रुतेर्हार्दं
तथेक्ष्यते॥८०॥ मायाविन इवेशस्य
स्वाभासस्यापि देहिनः॥ लीलया भ्राम-
णं तेन न भ्रान्तत्त्वं महेशितुः॥८१॥

यथा सतो जनिर्नैव मसतोऽपि जनिर्नच॥
जन्यत्वमेव जन्यस्य मायिकत्वसमर्पकं॥
॥८२॥ सदसत्कार्यवादादिनिषेधेनैव
युक्तिभिः॥ कार्यकारणभावोऽत्रानि-
र्वाच्ये पर्यवस्यति॥८३॥ तदेवं सर्वविश्व-
स्याद्वये ब्रह्मणि कल्पनात॥ प्रतिकूलेन
तर्केण न मिथ्यात्वे पराहतिः॥८४॥स-
कमेवाद्वितीयं सदित्यादिश्रुति मस्तकं॥
अनुगृह्णाति मिथ्यात्वाऽनुमानं सर्वतो-
वरं॥८५॥ निर्दोषशब्दभावेन वेदे प्रामा-
ण्यसम्भवः॥ आप्तत्वापौरुषेयत्वे दोषा-
भावे गतार्थके॥८६॥ योग्यतादेश्च मि-
थ्यात्वबोधनेऽपि श्रुतेर्गिरा॥ तदर्थस्य
न मिथ्यात्वं तन्निमित्ताद्यभावतः॥८७॥
शाब्दिकन्यायवैषम्यान्नोपजीव्यविरो-
धिता॥ प्रत्यक्षादेः स्वरूपेण निमित्तत्वं

न सन्त्वतः ॥ ८८॥ बाध्यबाधकयोरैक्यरूपे सत्यपि न क्षतिः॥ सत्यं वेद्यं परं ब्रह्म वेदान्तानां प्रमात्वके ॥ ८९॥ वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः॥ वृक्षान्तरात्सजातीयो विजातीयः शिलादितः ॥ ९०॥ तथा तद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ॥ एकावधारणाद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ॥ ९१॥ जडभेदो विजातीयः सजातीया चितो भिदा॥ ज्ञानानन्दादिधर्माणां भेदः स्यात्स्वगता भिदा॥ ९२॥ यद्वाऽद्वितीयशब्देन सजातीयस्य वर्जनं ॥ एकावधारणाभ्यां तु [redacted] यथेष्टं शिष्टवर्जनं ॥ ९३॥ यद्वाऽद्वितीयशब्देन भेदत्रयनिषेधनात् ॥ एकावधारणाभ्यां तु सङ्कोचाशङ्कनं हृतं ॥ ॥ ९४॥ एतत्त्रयनिषेधेन ब्रह्माद्वैतपरा

श्रुति॥ प्रपञ्चगतमिथ्यात्त्वानुमानं बहु म-
न्यते ॥९५॥ नामरूपादिमुक्तः सन् शोकं त-
रति तत्त्ववित् ॥ भिद्यते हृदयग्रन्थिरित्या-
दिश्रुतिभिः स्वयं ॥९६॥ तत्त्वज्ञाननिवर्त्य-
त्वस्याऽन्यथानुपपत्तितः ॥ मिथ्यात्त्वं
बोधितं तस्य सत्यत्त्वे न निवर्त्यता ॥९७॥
मिथ्यात्वेन निवर्त्यत्वं बाधकत्वं प्रमात्व-
त ॥ अज्ञानकल्पिते दृश्येऽधिष्ठानज्ञान
एव हि ॥९८॥ अन्यथाऽनन्तनियमकल्प-
नागौरवं भवेत् ॥ आत्मप्रमानिवर्त्यत्वं
लाघवाज्जगतो मतं ॥९९॥ अज्ञानध्वंसि-
बोधस्य विनोत्पत्तिं न कस्यचित् ॥ [redacted] -
अपेक्षाऽस्ति न च ज्ञाने सेतुदर्शनवद्विधिः
॥२००॥ प्रत्यग्याथात्म्यधीरेव प्रत्यग-
ज्ञानहानिकृत् ॥ सा चात्मोत्पत्तितो ना-
न्यद् ध्वान्तध्वस्तावपेक्षते ॥१॥ यत्न-

हि द्वैतवद्यत्रत्वस्येत्यादिः श्रुतिः स्मृतिः॥
यानिशेत्यादिरज्ञानज्ञानाभ्यां धीभिदां
जगौ॥२॥ तस्माज्ज्ञाननिवर्त्यत्वमधिष्ठा-
नप्रमात्वतः॥प्रपञ्चगतमिथ्यात्वे प्रमाण-
मिति साधितं॥३॥ स्वप्नवद्दृष्टिसृष्टेश्चा-
ऽप्यन्यथानुपपत्तितः॥जगन्मिथ्यात्वसिद्धिः
सा ज्ञातमात्रैकसत्त्वभाक्॥४॥ साप्यनाद्य-
तिरिक्तेऽर्थे स्वीकृता कारणात्मना॥स्थायि-
त्वस्वीकृतेस्तत्र न बौद्धमततुल्यता॥५॥
प्रतीतिमात्रसत्त्वेपि कर्मज्ञानादिचोदना॥
प्रमाणं स्वाप्नकार्यादिभावबोधकवाक्यवत्
॥६॥ स्वाप्नवाक्यतद्विचाराभ्यां विशेषो वे-
दवाक्ययोः॥ विषयाबाधसद्भावाज्ज्ञातस-
त्वेपि सम्भवेत्॥७॥ प्रतिकर्मव्यवस्थापि
सिद्ध्येन्मन्दाधिकारिणा॥संप्रयोगादिज-
न्यत्वाध्यासस्तत्रैव बोध्यते॥८॥ व्याव-

हारिकसत्त्वेन व्यावहारिकबाधवत्॥ प्राति-
भासिकबाधोऽपि ज्ञातसत्त्वेन सम्भवेत्॥
॥९॥ जीवब्रह्मविभागादेरनादित्वेन नेष्यते
दृष्टिसृष्टित्वमेवं न स्यान्मुक्तस्य पुनर्भवः
॥१०॥ ब्रह्मरूपतया मुक्तेर्दृगन्यत्वं न सम्भ-
वेत्॥ वृत्त्युपाधिकचैतन्यं दृष्टिर्नो केवला
चितिः॥११॥ रज्जुसर्पादिवद्बिम्बं प्रति-
भासशरीरधृक्॥ सोऽयं सर्प इतीवात्र प्रत्य-
भिज्ञा न सा प्रमा॥१२॥ नाभेदे दृष्टिसृष्टि-
त्वमात्मरूपतया भवेत्॥ बाधकत्वं च त-
ज्ज्ञाने भवेदन्यूनसत्त्वतः॥१३॥ ध्रुवा द्यौः
स्याद्ध्रुवा भूमिरित्यादिश्रुतिरञ्जसा॥ प्र-
वाहानादितः कल्पादित्याहाद्वैततत्परा॥
॥१४॥ प्राणलोकादिसृष्टिं हि जीवात्सुप्तो-
त्थिताच्च श्रुतिः॥ वदन्ती दृष्टिसृष्टौ
स्यात्प्रमाणं तत्त्वतत्परा॥१५॥ तद्द्वितीये

न तत्रास्त्यन्यद्विभक्तं ततो न हि॥ यत्पश्ये-
दिति वेदान्तः सुषुप्तौ प्रलये प्रमा॥१६॥
अज्ञानस्य जगद्धेतोः शक्तिवैचित्र्यतो भवे-
त्॥वैचित्र्यं जगतोप्येवं वासिष्ठादौ प्रदर्शि-
तम्॥१७॥अविद्यायोनयो भावाः सर्वेऽमी
बुद्बुदा इव॥ क्षणमुद्भूय गच्छन्ति ज्ञानैक-
जलधौ लयं॥१८॥ तस्मात्प्रातीतिकं सत्वं
द्वैतजातस्य सर्वतः॥ ज्ञानज्ञेयात्मकं सर्वमा-
विद्यकमिति स्थितं॥१९॥रज्जुसर्पादिवद्वि-
श्वं नाज्ञातं सदितीरितं॥प्रबुद्धद्रष्टृसृष्टत्वा-
त्सुषुप्तौ च लयश्रुतेः॥२०॥स च द्रष्टैक
एवास्ति न तद्भेदे प्रमाणकं॥अविद्यावशा-
त्तो ब्रह्मैवास्ति जीवो न चेतरः॥२१॥तस्यै-
व प्रतिदेहं स्यादहमित्यादिधीर्भ्रमात्॥
स्वप्नवद्बन्धमोक्षादिव्यवस्थायाश्च स-
म्भवः॥२२॥ब्रह्मणो नित्यमुक्तत्वेप्यवि-

रोधः प्रतीतयोः॥मुक्तेश्च स्वस्वरूपत्वाद्ब-
न्धस्याविद्यकत्वतः॥२३॥ एकस्मिन्नपि
चैतन्ये बुद्धिभेदादयं भ्रमः॥बद्धो मुक्तः
सुखी दुःखी त्वमहञ्चायमित्यपि॥२४॥
अद्वैतैकपरत्वान्न श्रुतीनां द्वैतबोधने॥
तात्पर्यं प्रत्युताद्वैतमात्रैकपरता प्रमा॥
॥२५॥अनादिमायया सुप्तो यदा जीवः प्र-
बुध्यते॥ इत्यादिश्रुतिरेकत्वप्रतिपादन-
तत्परा॥२६॥कल्पितत्वेऽपि शास्त्रस्या-
स्योपदेष्टुर्गुरोरपि॥स्वाप्नमन्त्रादिवत्सि-
द्ध्येत्तत्त्वज्ञानं स्वरूपगम॥२७॥अबाधि-
तास्पदत्वेन शास्त्रप्रामाण्यमिष्यते॥न
तत्र सत्यतापेक्षा स्वाप्नमन्त्रोपदेष्टृवत्॥
॥२८॥कल्पकोऽनिश्चिताद्वैतो बद्धोऽहमि-
ति निश्चयात्॥य एकः सर्वदेहेषु समो-
क्षार्थप्रवृत्तिभाक्॥२९॥अज्ञानाच्छुद्धचि-

ज्ञातोः संसारित्वादिसम्भवात् ॥ तन्निरा-
साय शास्त्रोक्तसाधनेऽस्याधिकारिता
॥ ३० ॥ संसारस्योपलम्भेन न पूर्वं तत्त्वधी-
रपि ॥ शास्त्रप्रामाण्यदार्ढ्येन प्रवृत्तिरपि
सम्भवेत् ॥ ३१ ॥ तत्त्वज्ञानप्रवृत्त्यर्थं वाम-
देवादितद्विदां ॥ मुक्तिकीर्तनमेतेन न जीवा-
नेकता भवेत् ॥ ३२ ॥ स्वप्नवत् सर्वभेदस्य
प्रातिभासिकभावतः ॥ बद्धमुक्तादिनिष्ठ-
स्य सम्भवात्स्याद्व्यवस्थितिः ॥ ३३ ॥ अ-
नादिभावरूपैकचैतन्यविषयाश्रया ॥ त-
त्त्वज्ञाननिवर्त्यात्राऽस्त्वविद्या तत्त्ववि-
न्मता ॥ ३४ ॥ पूर्वस्मिन्नोत्तरज्ञाननिव-
र्त्येऽतिप्रसञ्जनम् ॥ न ज्ञानप्रागभावे वा
ऽनादिभावपदद्वयात् ॥ ३५ ॥ अज्ञानभ्र-
मयोर्भाववैलक्षण्येऽपि युक्तितः ॥ भवे-
द्द्वयोरुपादानोपादेयत्वं विदां मतं ॥

॥३६॥अन्वितं कारणत्वं स्यादुपादानत्व-
साधकं॥सादित्वं साधकं तद्वदुपादेयत्व
इष्यते॥३७॥नोभयत्राऽपि नियतं भावत्व-
मिति निर्णयः॥ध्वंसेऽपि चेत्तदापत्तिः कि-
न्त्वच्छिन्नमितो भवेत्॥३८॥साक्षाज्ज्ञाननि-
वर्त्यत्वं ज्ञानत्वेनास्तु लक्षणं॥न तत्राऽ-
सम्भवोऽव्याप्तिरतिव्याप्तिर्न वा भवेत्॥३९॥
तत्राज्ञानेऽहमज्ञोऽस्मि मामन्यं च न वेद्-
म्यहं॥सौषुप्तमपि चाध्यक्षं नाहङ्किञ्चिद्वे-
द्मिषं॥४०॥अज्ञानाश्रयत्वेऽप्यहमर्थस्या-
ज्ञताप्रथा॥साक्ष्यज्ञानाश्रयीभूतचितोऽ-
न्तःकरणैक्यतः॥४१॥सुखादौ शुक्तिरू-
प्यादौ न जानामीत्यसम्भवः॥नवेद्मीत्य-
न्यसौख्यादौ प्रमात्रज्ञानतो भवेत्॥४२॥
मयि ज्ञानं न चास्तीति भावस्यैकगोचरं
॥सामान्याभावमानस्य व्याहतत्वेन यु-

क्तितः॥४३॥ सर्वत्रानुभवे भावरूपमज्ञानमेव
हि॥ निर्णीतं तार्किकज्ञानाभावखण्डनयुक्ति-
भिः॥४४॥ नसुषुप्तिगविज्ञानं नाज्ञासिषमि-
ति स्मृतिः॥ कालाद्यव्यवधानत्वान्न ह्यात्म-
स्यमतीतभाक्॥४५॥ नभूतकालस्पृक्प्रत्य-
ङ् चागाऽऽमिस्पृगीक्ष्यते॥ स्वार्थदेशः प-
रोऽर्थोऽर्थो विकल्पस्तेन स स्मृतः॥४६॥
नचेदनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते॥ ना-
वेदिषं सुषुप्तेऽहमिति धीः किंबलाद्भवेत्॥
॥४७॥ साक्ष्यज्ञानसुखाकारास्तिस्रोऽप्य-
ज्ञानवृत्तयः॥ सुप्त्याख्या वृत्तिरेकैवाप्यस्तु
तत्र न वा क्षतिः॥४८॥ अज्ञाने भावरूपेऽस्मि-
न्ननुमानं प्रमावहं॥ उक्तं विवरणाचार्यैस्तथा-
न्यैर्बहुधेरितम्॥४९॥ किं च ज्ञानविरोधि-
त्वं सर्वज्ञानविरोधिगम्॥ अनादिभावता तु-
ल्या धारकं ह्ययभाववत्॥५०॥ अनाद्यभा-

नभिन्नत्वं सर्वज्ञानविरोधिगम्॥ अनाद्य-
भावभिन्नैकनिष्ठत्वादभिधेयवत्॥५१॥
प्रमाणं श्रुतयोऽप्यत्र न विन्दन्त्यनृतेन
हि॥ प्रत्यूढा इति छान्दोग्ये नीहारेणावृता
जना:॥५२॥ नतं विदाथ इत्याद्या अन्या:स-
न्ति प्रमापिका:॥ भावत्वेऽस्य तथा ज्ञाननि-
वर्त्यत्वे श्रुतिर्भवेत्॥५३॥ विश्वमायानि-
वृत्तिः स्याद्भूयश्चान्ते इति प्रमा॥ अज्ञानेऽन-
न्तशक्तित्वान्मायाशब्दोपपत्तित:॥५४॥
जीवस्याप्यनवच्छिन्नब्रह्मानन्दाप्रकाशना-
त्॥ साऽन्यथानुपपत्तिश्च मानमज्ञान इ-
ष्यते॥५५॥जीवस्य ब्रह्मरूपत्वादानन्दै-
कस्वरूपता॥ तदभानान्यथापत्तिः कथं
स्यात्तिमिरं विना॥५६॥ साऽविद्या साक्षि-
चिद्वेद्या साक्षी तद्वृत्तिगो मत:॥ शुद्ध-
चैतन्यभास्यत्वे तस्यावस्तुत्वमापतेत्॥

॥५७॥ भास्या स्वावृतचिद्धाम्नाऽविद्या
राहुवदिष्यते॥आश्रयो विषयश्चास्याः शु-
द्धं ब्रह्मैव सम्मतं॥५८॥उपाधेः प्रतिबिम्बै-
कपक्षपातितया ततः॥ संसारो जीवगो
नेशे बिम्बभूते चिदद्वये॥५९॥ न चिन्मा-
त्रं विरोध्यस्याः साधकत्वेन सम्भवेत्॥
तदेव बुद्धिवृत्तिस्थं विरोधि श्रुतिमानतः
॥६०॥चितोऽपि वृत्त्यवच्छेदादज्ञानेन वि-
रोधिता॥तृणादेर्भासकस्यापि दाहकत्वं
यथा रवेः॥६१॥चितोऽज्ञानाश्रयत्वेपि
प्रमाणं श्रुतिरिष्यते॥मायांतु प्रकृतिं वि-
द्यान्मायिनं तु महेश्वरं॥६२॥अज्ञाना-
श्रयत्वेऽपि जीवोऽज्ञ इति सम्भवेत्॥
अज्ञानकार्ययोगित्वाद्व्यपदेशोऽस्य
नो परे॥६३॥नीरूपस्यापि रूपस्य प्रति-
बिम्बो यथेष्यते॥कोशोप्यचाक्षुषस्ये-

व ब्रह्मणः किन्न सम्भवेत्॥६४॥ वस्तुतस्तु
श्रुतेरेव प्रतिबिम्बश्चितेर्मतः॥ उपाधिबिम्ब-
सम्बन्धानादित्वान्नास्य सादिता॥६५॥
सर्वतः प्रसृतत्वेन चितोऽप्यव्यवधानतः॥
प्राभिमुख्यस्य सद्भावात्प्रतिबिम्बोऽञ्जसा
भवेत्॥६६॥ प्रवच्छेद्यांशमादाय सामाना-
धिकरण्यतः॥ बन्धमोक्षोपपत्तिश्च युक्तिभिः
श्रुतिभिस्तथा॥६७॥ सर्वज्ञत्वं विशिष्टे
स्यान्न तदज्ञानमन्तरा॥ स्वतोऽसङ्गतयाऽ-
सङ्गश्रुतेर्नास्ति विरोधिता॥६८॥ स्वरूपतः
प्रमाणैर्वा सर्वज्ञत्वं द्विधा स्थितं॥ तच्चोभयं
विनाऽविद्यासम्बन्धं नैव सिद्ध्यति॥६९॥
जीवाश्रिताप्यविद्या स्वीकृता वाचस्पतेर्म-
ते॥ तथैव कल्प्यते सर्वं भूतभौतिकविम्ब-
कं॥७०॥ स्वेनैव कल्पिते देशे व्योम्नि य-
द्वद्वरादिकं॥ तथा जीवाश्रयाविद्यां म-

न्यन्ते ज्ञानकोविदाः ॥७१॥ चिन्मात्रं विष-
योऽस्त्यस्याः स्वयं ज्योतिरकल्पितं ॥ ना-
न्यदज्ञानकार्यत्वादप्रसक्तप्रकाशनं ॥७२॥
स्ययम्भानार्हमावृत्त्या न भातीत्याततं सु-
खं ॥ प्रकाशमानताऽध्यासाधिष्ठानत्वेन
चेष्यते ॥७३॥ पूर्णानन्दात्मनाऽभानेप्य-
परोक्षत्वयोग्यता ॥ जीवमध्यस्तभेदं प्र-
त्यावृतत्वाच्चितः स्वतः ॥७४॥ उभयोर-
प्यनादित्वान्नानन्तर्यं मिथोऽनयोः ॥
तद्भेदापगमे शुद्धचैतन्यं मोक्ष इष्यते ॥
॥७५॥ त्वदुक्तमर्थं नो वेद्मीत्येवं भातेऽपि
वस्तुनि ॥ स्वज्ञानानुभवात्साक्षी नाज्ञानेन
विरुद्ध्यते ॥७६॥ प्रमाणवृत्त्युपारूढप्र-
काशत्वेन चिन्मयम् ॥ निवर्त्तकमविद्या-
या न चित्सामान्यमिष्यते ॥७७॥ [illegible]-
अहङ्कारोऽस्त्यविद्योत्थो नात्मात्मग्रहणे.

लये ॥ अस्याग्रहात्स्वयंज्योतिर्भिन्नोऽतो जा-
गरेऽस्मृते: ॥ ७८ ॥ सुप्तिकालानुभूतात्मैक्या-
ध्यासान्निश्चयोऽहम: ॥ अहमस्वाप्समित्या-
त्मैक्यारोपेणापि सम्भवेत् ॥ ७९ ॥ अवि-
द्योपाधिकं सुप्तौ चैतन्यमनुभूय तत् ॥ बुद्ध्या-
वच्छेदत: स्मर्तृ न वैरूप्यं तयोर्भवेत् ॥ ८० ॥
स्थूल: स्यामिति वत्सुप्त्यै प्रवृत्तिरुपपद्यते ॥
सुप्तौ हेत्वात्मना तस्य स्थित: सर्वोपपत्तित:
॥ ८१ ॥ चिन्मात्राज्जायते सर्वमहङ्कार सुखं
जगत् ॥ अनात्मत्वमहङ्कारे सिद्धं भ्रान्त्या
समुत्थिते ॥ ८२ ॥ सुप्तौ विलयमायाति जाग-
रादौ स जायते ॥ आत्मभानेऽप्यभानात्स्या-
दनात्माऽसौ विनिश्चित: ॥ ८३ ॥ भौतिकत्वा-
द्विनाशित्वाद् दृश्यत्वाच्च जड़त्वत: ॥ वि-
कारत्वादनात्मत्वमहङ्कारस्य सिद्ध्यति ॥
॥ ८४ ॥ यथा देहघटादीनामनात्मत्वं

विनिश्चितं॥ तथैवास्याहमोऽप्यस्ति विचा-
राच्छ्रुतियुक्तिभिः॥ ८५॥ कर्तृत्वमात्मनो
नास्ति स्वभावादक्रियस्य यत्॥ कर्तृत्वादि-
विशिष्टाया बुद्धेरध्यासतो हि तत्॥ ८६॥
चिदचिद्ग्रन्थिरूपत्वाद्ध्यंशोऽहंकार इष्य-
ते॥ तत्राचिदंशे बुद्धौ हि कर्तृत्वं धर्म ईक्ष्यते
॥ ८७॥ बुद्धेस्तु तद्विशिष्टायाश्चित्यैक्याध्या-
समन्तरा॥ अहं कर्तेति भानस्यायोगेनाध्या-
स इष्यते॥ ८८॥ अतोऽन्तःकरणाध्यासात् क-
र्तृत्वं भाति चिद्घने॥ तद्द्वारा बन्धमोक्षादिव्य-
वहारोऽपि सिद्ध्यति॥ ८९॥ तथा देहेन्द्रियाद्यै-
क्याध्यास आत्मनि युज्यते॥ द्व्यंशत्वेनाहमि-
त्यस्य चिदंशो कर्तृतादिवत्॥ ९०॥ ब्राह्मणो-
ऽहं मनुष्योऽहं कारणोहऽमिति भानतः॥ तत्त-
दात्मविशिष्टैक्याध्यास आवश्यको मतः॥ ९१॥
देहेन्द्रियादितद्धर्माध्यास आत्मनि चिद्घने॥

सिद्धो न तं विना कश्चिद्व्यवहारः प्रसिद्ध्यति॥
॥८२॥ अविद्यायां तदध्यस्ते कार्येऽध्यासेऽखि-
ले मतं॥ मानलक्षणसद्भावादनिर्वाच्यत्वमेव
हि॥८३॥ सतः सति विभिन्नत्वे भिन्नत्वेऽप्य-
सतः सति॥ तथा सदसद्भिन्नत्वमनिर्वाच्य-
त्वलक्षणं॥८४॥ सत्वासत्त्वाख्यधर्माभ्यां
विचारं सहते न यत्॥ तथैव सदसत्वेन तदेवा-
सत्वस्य लक्षणं॥८५॥ सत्त्वावच्छिन्नभेदस्य
सत्वेति प्रत्यये ध्रुवं॥ सद्वैलक्षण्यमेवास्ति
सिद्धान्ते हि प्रयोजकं॥८६॥ नैकत्रोभयभि-
न्नत्वं व्याहतं चेति सांप्रतं॥ अताच्विकत्व-
स्वीकाराद्यन्निषेधसमुच्चये॥८७॥ स्वरू-
पाद्दुर्निरूप्यस्य किं चिद्रूपं न वास्तवं॥
अतः सदादिभिन्नत्वमनिर्वाच्यत्वलक्षणम्
॥८८॥ न ह्यताच्विकरूपे द्वे प्रतिषेधसमुच्च-
ये॥ सत्त्वासत्वे विरुद्ध्येते दृष्टस्तत्रगोचरो-

विधिः ॥२९९॥ उभयातात्त्विकत्वं नाप्येक-
त्रेदं विरोधभाक् ॥ यथा स्यात्तात्त्विकत्वे
वाऽप्युभयस्य विरोधिता ॥३००॥ वल्मीका-
दौ यतो दृष्टं स्थाणुत्वपुरुषत्वयोः ॥ अता-
त्त्विकत्वमेकत्र नैवं तात्त्विकरूपयोः ॥१॥
सत्त्वादिना विचारैकासहत्वं द्विविधं म-
तम् ॥ सत्त्वादिसर्वकालीनाभावाधारत्व-
मादिमम् ॥२॥ सद्रूपत्वाद्यभावोऽन्यो ना-
तिव्याप्तिरतश्छितिः ॥ निर्विशेषैकसद्रूपतया
कोपोऽन्यथाश्रुतेः ॥३॥ न सत्यादिगिरा सा-
क्षाद्वक्तुं शक्यं चिदद्वयं ॥ लक्षणाऽङ्गीकृता
तस्मादनिर्वाच्यत्वमक्षतं ॥४॥ प्रत्यक्षमनु-
मानं चागमोऽर्थापत्तिरिष्यते ॥ प्रमाणं
तावदत्रास्ति प्रत्यक्षमविपर्ययम् ॥५॥ प्रभा-
न्मिथ्यैव रजतमित्यनिर्वाच्यगोचरं ॥ न ख्या-
यमानरूप्यादौ नृशृङ्गसदृशं मृषा ॥६॥ वि-

मतं सत्वशून्यत्वे सत्यसत्वविलक्षणम्॥
सत्वासत्वविनिर्मुक्तं बाध्यत्वाद्रजतं ध्रुवं
॥७॥दोषप्रयुक्तभानत्वाद्यन्नैवं स्यान्न तत्त-
था॥यथा ब्रह्मेति नात्रस्या दप्रसिद्धविशेष-
णं॥८॥सामान्यतोऽपि तत्सिद्धेर्नाशतः सि-
द्धसाधनं॥न साध्यं व्याहृतं वा स्यात्समाहित-
तया पुरा॥९॥नार्थान्तरं भवेद्बाधान्नाभासस-
मता तथा॥न वा सत्प्रतिपक्षश्च ख्यातिबाधा-
द्यभावतः॥१०॥ख्यातिबाधान्यथासिद्धयाऽ-
प्यनिर्वाच्यत्वमक्षतं॥ततोऽनुमानमप्यत्र
प्रमाणमिति साधितं॥११॥ख्यातिबाधान्य-
थासिद्धिरूपार्थापत्तिरप्यमुं॥प्रमाणं साधय-
त्यर्थं तथैवात्र निदर्श्यते॥१२॥रूप्यं सच्चेन्न
बाध्येत न प्रतीयेत यद्यसत्॥प्रतीयतेऽतो
निर्वाच्यं सदसद्भिन्नमिष्यते॥१३॥प्रमापि-
कत्वं सत्वं स्यात्तत्वावेदकता प्रमा॥सा-

च शुद्धपरब्रह्मबोधकश्रुतिवाक्यगा॥१४॥
ब्रह्मणः स्वप्रकाशत्वेऽप्यज्ञानविनिवृत्तये॥
साफल्यं स्यात्प्रमाणस्य प्रवृत्तेर्न क्षतिस्ततः
॥१५॥ मुक्तत्वावेदकत्वेऽपि रजताद्यप्रमा-
त्वके॥ बाध्यं प्रयोजकत्वं स्याद्बाधके न्यू-
नसत्त्वतः॥१६॥ अबाध्यत्वं हि वा सत्वं न
चापाद्या विशिष्टता॥ त्रैकालिकनिषेधस्या-
प्रतियोगित्वमेव तत्॥१७॥ प्रतीत्यभावे-
ऽप्यसत्तोऽसन्नृशृङ्गमितीष्यते॥ तत्र सर्वो-
पपत्तिः स्याद्विकल्पेनैव शब्दतः॥१८॥ शब्द-
ज्ञानानुपाती स्याद्वस्तुशून्यो विकल्पकः
॥ विकल्पस्याऽपि ज्ञानान्यवृत्तित्वे बाधकं
न हि॥१९॥ प्रवृत्तिविषयत्वस्याऽन्यथा[illegible]-
सिद्धिरपि प्रमा॥ मानसत्त्वेन चासत्त्वे
सदसत्त्वे भवेद्यतः॥२०॥ ख्यातिबाधान्य-
थासिद्ध्याऽनिर्वाच्यत्वं मतं दृढं॥ बाध्य-

त्वमप्यनिर्वाच्ये न सत्ये नासतोष्यते॥२१॥
एवं च सत्यनिर्वाच्यभाव एव प्रयोजकः॥
प्रतियोगित्वमुक्त्येऽपि न सत्वादिविक-
ल्पकः॥२२॥ असत्वं निःस्वरूपत्वं तद्भिन्नाः
सस्वरूपताः॥ सस्वरूपत्वमेतस्माद्भाति
निष्प्रतियोगिकं॥२३॥ नासति प्रतियोगि-
त्वं शशशृङ्गादिवस्तुनि॥ न योग्यानुपल-
ब्धिः स्यादसत्युक्तं तदप्यतः॥२४॥ दृष्टोप-
लम्भसामग्री शशशृङ्गादियोग्यता॥ तस्यां
नाऽनुपलम्भोऽस्ति नास्ति साऽनुपलम्भ-
ने॥२५॥ न च योग्यतया व्याप्ता शशशृङ्गाऽ-
स्तिता क्वचित्॥ यद्बलादुपलम्भस्त आपा-
द्येत कथं चन॥२६॥ नासदासीन्नो सदासी-
दित्याद्याः श्रुतयोऽखिलाः॥ प्रमाणं स्यु-
रनिर्वाच्यभाव एव विचारतः॥२७॥ नचा-
[redacted]ऽत्र सदसच्छब्दो पञ्चभूतपरो मतो॥


प्रसिद्धपरतां त्यक्त्वा नाप्रसिद्धगतिर्नयः ॥
॥२८॥ न भूते सदसच्छब्दौ प्रसिद्धौ वस्त्व-
वस्तुगौ ॥ श्रुत्यन्तराऽविरोधाय सदेकं
ब्रह्म चिद्घनं ॥२९॥ सदासीत्तन्न चासीद्वा
सदसद्भ्यां विलक्षणं ॥ नासदासीदिति
श्रुत्याऽनिर्वाच्यं सिद्ध्यतीत्यतः ॥३०॥ प्र-
माणसम्भवादेवानिर्वाच्यख्यातिरिष्यते-
॥ न चाऽसदन्यथाख्यातिः प्रमाणविरहा-
न्विता ॥३१॥ असदेवमसाद्रूप्यमित्येवं
सद्विलक्षणं ॥ विषयीकुरुते मानं नासद्बा-
धकसम्भवात् ॥३२॥ नानुमानमसद्भाने
बाधायुक्त्या पुरोक्तया ॥ तथाऽङ्गीकारत-
स्ते स्यात्प्रवेशः सौगते मते ॥३३॥ न वा
सदुपरागोऽत्र विशेषः सोऽप्यसन्मतः ॥
ततोऽसदन्यथाख्यातिरसाध्वी दृष्टस-
म्मता ॥३४॥ न वाऽन्यत्र स्थितस्यैव

रूप्यादेर्भानतो भवेत् ॥ अन्यथाख्याति-
स्तत्रापि सन्निकर्षाद्ययोगतः ॥ ३५ ॥ संस्का-
रस्मृतिदोषाणां प्रत्यासत्तित्वमत्र नो ॥
रूप्यप्रत्यक्ष एतस्य संयोगः कारणं मतं ॥
॥ ३६ ॥ ततोऽनिर्वाच्यमेवेदं सर्वं विश्वं
सहेतुकं ॥ तच्चानिर्वाच्यमज्ञानोपादानक-
मितीरितम् ॥ ३७ ॥ तत्त्वज्ञाननिवर्त्यत्वा-
त्तथात्वं तस्य साधितं ॥ यद्वाऽस्य न स्व-
रूपेण त्रैकालिकनिषेधने ॥ ३८ ॥ प्रतियोग-
त्वमपि तु तात्त्विकत्वेन सम्मतं ॥ प्रतीतं
तात्त्विकत्वं तस्मात्तौतिकमिहेष्यते ॥ ३९ ॥
लोके वा तात्त्विकत्वेन प्रसिद्धरजतस्य
तत् ॥ त्रैकालिकनिषेधैकप्रतियोगित्व-
मिष्यते ॥ ४० ॥ नेह नानेति वेदान्ते किंच
नेति पदेरणात् ॥ सर्वस्याऽपि निषिद्धत्वा-
न्न प्रपञ्चान्तरोत्थितिः ॥ ४१ ॥ अन्वयव्य-

तिरेकाभ्यां शुक्त्यज्ञानेऽस्ति हेतुता ॥
उपादानं तदेवास्तु नोपादानान्तरं भवेत्
॥४२॥ सर्वधीप्रत्ययानां हि स्वस्वगोचर-
शूरता ॥ प्रतीतिकाले रूप्यस्य सत्त्वं सिद्ध-
मितीष्यते ॥४३॥ अध्यस्तत्वेऽपि द्वैरूप्यं
नेदन्त्वस्य प्रसज्यते ॥ स्वप्रकाशतयेदन्त्वा-
धिष्ठानस्य चिदात्मनः ॥४४॥ इदं रूप्य-
मिति ज्ञानं द्व्यात्मकं नात इष्यते ॥ स्वप्ने-
तु न च तद्रूपं ज्ञानं शङ्क्यं कथं चन ॥४५॥
द्वयोरध्यसनीयत्वादिदं रजतयोरपि ॥
स्वप्रकाशतयाऽविद्याधिष्ठानस्य चिदा-
त्मनः ॥४६॥ चाक्षुषेदं मनोवृत्त्यवच्छिन्न-
चितिगाऽसि या ॥ अविद्या तद्विवर्तत्वे
चाक्षुषत्वोपचारतः ॥४७॥ स्वत एवास्त्यु-
पाधित्वमविद्यावृत्तिभासके ॥ चैतन्येऽ-
स्मिन्नविद्याया वृत्तेर्नान्यदपेक्षणम् ॥

॥४८॥साक्षिवेद्यतया वृत्तौ नाज्ञानं यद्य-
पीष्यते॥तथाऽपि तदवच्छिन्ने शुक्त्यव-
च्छिन्नगं तमः॥४९॥नाज्ञाननाशिकाऽवि-
द्यावृत्तिः किं त्विदमाकृतिः॥धीवृत्तिस्तदभि-
व्यक्तचैतन्यं रूप्यभासकं॥५०॥नह्यवच्छे-
दकान्यत्वं फलभेदकरं मतं॥किं तु व्यञ्ज-
कभिन्नत्वं तथा च परमार्थसत्॥५१॥चैत-
न्यं स्यादधिष्ठानमध्यस्तस्य च तद्द्विधा॥
व्यावहारिकसच्चैकं द्वितीयं प्रातिभासिकं॥
॥५२॥स्वप्नजागरयोस्तुल्या प्रतिभासैकस-
त्यता॥अधिष्ठानमविद्यावच्छिन्नचैतन्य-
मेव हि॥५३॥ब्रह्मरूपास्तु वाऽविद्यानिवृत्ति-
रथ वाऽस्तु सा॥अनिर्वाच्येति नैवास्ति वि-
भागान्यूनता मनाक्॥५४॥ब्रह्मभिन्नं मृषा
सर्वमित्येवं वदतो विदः॥विभागातात्त्वि-
कत्वस्यापीष्टत्वमिति न क्षतिः॥५५॥

सत्त्वत्रैविध्यमप्यत्र व्यावहारिकमीरितं॥ता-
त्त्विकत्वं न कस्याऽपि ब्रह्मभिन्नस्य वस्तुनः॥
॥५६॥अबाध्यत्वं स्वकालेऽस्त्यनध्यस्ताध्यस्त-
योः समं॥अतोऽवान्तरभेदेन सत्त्वत्रैविध्यमि-
ष्यते॥५७॥सप्रकारकज्ञानादिबाध्यत्वेनैव
तद्भिदा॥तात्त्विकं सदधिष्ठानं शुद्धं निर्द्धर्म-
कं मतं॥५८॥तदेवं दृश्यमिथ्यात्वं सिद्धं ब्र-
ह्माद्वयं तथा॥अखण्डार्थपरं वाक्यं तत्त्वावेद-
कमित्यतः॥५९॥अविद्यातत्कृतं बन्धमप-
बाध्य स्वया दृशा॥भजन्ते यं महान्तोऽ-
पि तं भूमानं हरिं श्रये॥३६०॥इति सिद्धा-
न्तसारे श्रीसदानंदविदा कृते॥जगन्मिथ्या-
त्वनिष्ठोऽयं प्रथमः पूर्णतां गतः॥१॥इति
अद्वैतसिद्धिसिद्धान्तसारसङ्ग्रहे प्रथमः परि-
॥च्छेदः॥१॥



॥ श्री ॥

॥ अद्वैतसिद्धिसिद्धान्तसारसङ्ग्रहे ॥

॥ द्वितीयः परिच्छेदः प्रारभ्यते ॥

आनन्दैकरसं ब्रह्म वेदान्तैकप्रमाणकम् ॥
मुकुन्दमनिशं वन्दे हृदि स्थितमनामयम्
॥ १ ॥ हेयं निरूप्य बन्धाख्यं तन्निवृत्तेर्निबन्ध-
नम् ॥ यज्ज्ञानं तदखण्डार्थमादेयमधुनोच्य-
ते ॥ २ ॥ अखण्डार्थं द्विधा तच्च श्रौतलौकिक-
भेदतः ॥ पुनः पदार्थवाक्यार्थनिष्ठत्वेन
द्विधा मतम् ॥ ३ ॥ तत्त्वम्पदार्थनिष्ठं तद्द्वि-
विधं वैदिकं मतम् ॥ सत्यं ज्ञानमिति श्रौतं
तत्पदार्थपरं मतं ॥ ४ ॥ योऽयं प्राणेषु हृद्यन्त-
रित्यादि त्वम्पदार्थगं ॥ महाप्रकाश इत्यादि
लौकिकं स्यात्पदार्थगं ॥ ५ ॥ तत्त्वमस्यादि-
वाक्यं तु श्रौतं वाक्यार्थतत्परं ॥ सोऽयमित्या-
दिवाक्यार्थनिष्ठं तल्लौकिकं मतं ॥ ६ ॥ तत्रा-

पर्यायशब्दानामखण्डार्थत्वमाश्रितं ॥ पदवृ-
त्तिस्मारितार्थातिरिक्तागोचरप्रमा ॥ ७ ॥ या-
ऽस्ति तज्जनकत्वं तन्नातिव्याप्त्याऽतिदूषि-
तं ॥ संसर्गासङ्गिसम्यग्धीहेतुता या गिरामि-
यं ॥ उक्ताऽखण्डार्थता यद्वा तत्प्रातिपदि-
कार्थता ॥ ८ ॥ अविशिष्टमपर्यायानेकशब्द-
प्रकाशितं ॥ एकं वेदान्तनिष्णाता अखण्डं
प्रतिपेदिरे ॥ ९ ॥ प्रवृत्तिहेतुभेदं हि स्वीकृत्यै-
वोच्यते नयात् ॥ अनन्तादिपदानां च शुद्ध-
ब्रह्मैकनिष्ठता ॥ १० ॥ शुद्धे तात्त्विकसम्बन्धा-
भावादपि हि लक्षणा ॥ सिद्धेदतात्त्विकेनैव
सम्बन्धेन श्रुतेर्गिरां ॥ ११ ॥ अखण्डार्थपरं वा-
क्यं सत्यं ज्ञानमिति श्रुतेः ॥ तत्प्रातिपदिका-
र्थैकनिष्ठं लक्षणवाक्यतः ॥ १२ ॥ तन्मात्रस्यो-
त्तरत्वाद्वा तत्प्रकृष्टप्रकाशवत् ॥ तत्त्वमस्या-
दिकं वाक्यमखण्डार्थपरं मतं ॥ आत्मस्व-

रूपमात्रैकनिष्ठं वेत्येव साध्यते॥१३॥
एककार्यैककारणद्रव्यनिष्ठत्वे सति वस्तुतः॥
सामानाधिकरण्याद्वा तन्मात्रस्योत्तरत्व-
तः॥१४॥सोऽयमित्यादिवन्निर्वत्थं मान-
मात्रानुमानकं॥सत्यादिवाक्ये तन्मात्रप्रश्नो-
त्तरतया मतं॥१५॥ब्रह्मविदाप्नोतीत्यत्र
ब्रह्मात्मवेदनं॥इष्टसाधनभावेन बुभुत्सा त-
त्र युज्यते॥१६॥तत्त्वमस्यादिवाक्येऽपि
तन्मात्रप्रश्न उत्तरं॥कोऽहमित्यात्मरूपस्य
प्रश्नोत्तरतया भवेत्॥१७॥यद्यप्येकं परं
लक्ष्यं सत्यादिकगिरां मतं॥तथाऽपि वि-
निवर्त्यांशाधिक्येनेष्टं पदान्तरं॥१८॥
अतो वाच्यार्थवैशिष्ट्येऽखण्डसिद्धावुपा-
यता॥स्वरूपलक्षणस्यात्राविरोधित्वाद-
खण्डिते॥१९॥अभेदेऽपि धियो वृत्तिप्र-
युक्ताकारभेदतः॥लक्ष्यलक्षणभावोऽपि

सिद्धोदावृत्ततादिवत्॥२०॥शुद्धब्रह्मैकता-
कारा धीवृत्तिर्निष्प्रकारिका॥शुद्धब्रह्मैकवि
षयाज्ञानस्य विनिवर्तिका॥२१॥न वा सत्प्र-
तिप्रक्षोऽत्र शङ्क्योऽखण्डार्थसाधने॥प्रति-
कूलो यतस्तर्कः सर्वेषु प्रतिहेतुषु॥२२॥
दृष्टान्ते साध्यवैकल्यं न शङ्क्यं लक्षणेष्य-
ते॥तत्राखण्डपरत्वेऽतोऽप्युत्तरस्योचित-
त्वतः॥२३॥प्रश्नोत्तरे उभे युक्त्या ते प्राति-
पदिकार्थगे॥चन्द्रव्यक्तिस्ततो लक्ष्या
सामानाधिकरण्यतः॥२४॥दृष्टान्तिकेऽ-
पि किं ब्रह्मेत्येवं वाक्ये प्रकल्पिते॥सत्यं-
ज्ञानमिति श्रौतमखण्डार्थपरं भवेत्॥२५॥
सत्यज्ञानादिवाक्येऽत्र यद्यप्यस्ति विशेष-
णं॥नाकाङ्क्षाकल्पनं तत्र ब्रह्मव्यक्तिपरत्वतः
॥२६॥निष्प्रकारकबोधस्याधिष्ठानप्रत्यय-
त्वतः॥भ्रमादिविनिवृत्त्या स्यान्मोक्षहेतुत्व-

मञ्जसा॥२८॥ एकधैवानुद्रष्टव्यमित्यने-
कत्ववारणात्॥नाऽल्पमप्यन्तरं कुर्यादि-
ति भेदनिषेधनात्॥२८॥ केवलो निर्गुणश्चे-
ति गुणानां प्रतिषेधनात्॥ एकमेवाद्वितीयं
सदिति द्वैतनिषेधनात्॥२९॥ सर्वतोऽप्य-
नवच्छिन्नवस्तुमात्रपरौ मतौ॥अनन्तब्रह्म-
शब्दौ तद्वाक्यं चाखण्डतत्परम्॥३०॥ ए-
कत्वभेदाभावादेः स्वरूपत्वेन वस्तुतः॥न
विशिष्टपरत्वं स्यादुक्तवाक्यस्य कर्हि-
चित्॥३१॥संसर्गविषयेऽप्यस्याकाङ्क्षा-
दीनां सुसम्भवः॥न वाक्यत्वक्षतिर्दोषो
वेदान्तेऽखण्डबोधके॥३२॥यद्यप्यखण्ड-
वाक्यार्थचिद्धातोः स्वप्रकाशतः॥स्वतः
सिद्धत्वमेवेष्टं तथाऽप्यस्यप्रमाणजां॥
॥३३॥विना वृत्तिमविद्याया विनिवर्त्तकता
न हि॥मानवृत्तिरविद्यैकनिवृत्तिफलभा-

गिनी ॥३४॥ निष्प्रकारमपि ज्ञानं निर्विक-
ल्पकमिष्यते ॥ तार्किकैरपि किं वाच्यं वेदा-
न्तैर्निर्विशेषणम् ॥३५॥ विचारस्याऽपि
वेदान्ततात्पर्यैकविनिश्चये ॥ फलवत्त्वेन
निर्विघ्नब्रह्मज्ञानार्थता भवेत् ॥३६॥ आपात-
दर्शनं यस्मान्नाज्ञानविनिवर्त्तकम् ॥ अतो
विचारशास्त्रस्य प्रारम्भः सफलो मुनेः
॥३७॥ व्यावृत्ताकारतो ब्रह्माज्ञातत्वाद्विषयो
मतः ॥ स्वरूपनिश्चयाधीनं प्रयोजनमपी-
ष्यते ॥३८॥ निश्चयो मुक्तिफलकोऽखण्डा-
र्थज्ञानमेव सः ॥ सिद्धान्तपूर्वपक्षौ द्वौ क-
ल्पितत्वावलम्बिनौ ॥३९॥ संशयोऽध्य-
स्तसामान्यधर्मधीजननो मतः ॥ तस्मात्स-
म्यग्विषयः सिद्धो शास्त्रारम्भादिसम्भवः
॥४०॥ स्वरूपस्य प्रमेयत्वादुद्देश्यत्ववि-
धेयते ॥ सत्यादिद्वारतो ज्ञानादसाधारण

निश्चयः॥४१॥लक्षणा शक्यसम्बन्धस्ता-
त्पर्यानुपपत्तितः॥बीजत्वान्नान्वयासिद्धिः
प्रकृते सैव सम्मता॥४२॥ वाच्यार्थभेदात्स-
त्यादिगिरां पर्यायता न हि॥प्रादायाध्यस्तध-
र्मत्वं ब्रह्मव्यक्तिपरत्वतः॥४३॥ त्रिकालाबाध्य-
ताद्यैश्चानृतत्वादेरपोहनात्॥व्यावर्तकत्त्वं
प्रत्येकं सत्यादीनां गिरां भवेत्॥४४॥ न पदा-
न्तरवैयर्थ्यं स्वरूपैक्यपरत्वतः॥[redacted]व्यावृ-
त्तिभेदबोधित्वात्प्रामाणिकतया तथा॥४५॥
सत्तादीनां तु जातीनां व्यक्तितादात्म्यकारणा-
त्॥लक्ष्यव्यक्तिरपि ब्रह्म सत्तादि न जहाति
नः॥४६॥तात्पर्याविषयत्वेन धर्मा वेदप्रका-
शिताः॥प्रतात्त्विका यतो वेदप्रामाण्यं ता-
त्त्विके मतं॥४७॥सत्यमिथ्यात्त्वभेदोऽपि
लोकैर्वान्तरभेदतः॥वस्तुमात्रपरत्वेऽपि
बाधकत्त्वं श्रुतेर्मतं॥४८॥दोषाप्रयुक्तमान-

त्वं सत्यत्वे हेतुतां भजेत्॥ बोध्यबोधकयो-
स्तुल्यसत्ताकत्वं न तां भजेत्॥४९॥ व्यावृ-
त्तिसमसत्ताकं नैव व्यावृत्तिबोधकं॥ स्वप्नस्त्रि-
याः स्वजानन्दापेक्षयापि सुखान्तरे॥५०॥
व्यावृत्तिबुद्धिहेतुत्वं हेतोर्व्यावर्त्तकत्वतः॥
व्यावृत्तिस्तात्त्विकी सा ते मन्मते व्यावहारि-
की॥५१॥ ब्रह्माभिन्नतया साऽस्तु सत्या मि-
थ्या न वा क्षतिः॥ उपायो बोधसिद्धौ स्या-
त्सर्वभ्रान्तिनिवृत्तये॥५२॥ सत्ये ब्रह्मणि
सत्यादिशब्दा व्यावृत्तिद्वारतः॥ पर्यवस्य-
न्ति तात्पर्यं श्रुतीनां ब्रह्मणि ध्रुवं॥५३॥
ब्रह्मबोधोपयोगित्वं सत्यादेर्भावरूपतः॥
अस्थूलत्वादिशब्दानामभावद्वारतो हि
तत्॥५४॥ वादिनां कुमतप्राप्तातिव्याप्ति
विनिवृत्तये॥ सत्यज्ञानादिशब्दानां स्याद-
पेक्षा समुच्चये॥५५॥ सत्येनानृतव्यावृत्त-

ब्रह्मबोधनमन्तरा ॥ ब्रह्म विज्ञानमानन्दं न
सिद्ध्येच्छून्यतः पृथक् ॥ ५६ ॥ एवमेकैकशब्द-
स्याभावेऽतिव्याप्तितर्कणं ॥ व्यावृत्तिस्त्वार्थि-
की ज्ञेया न शाब्दी द्वारभावतः ॥ ५७ ॥ लक्ष्या-
र्थभेदाभावेऽपि व्यवच्छेद्यविभेदतः ॥ विज्ञा-
नानन्तपदयोः पर्यायव्यर्थते न हि ॥ ५८ ॥ एवं
समाहितं सम्यक्पदे स्वीकृत्य लक्षणां ॥ के
चित्तु लक्षणां वाक्ये प्राहुर्नैव पदे तु सा ॥ ५९ ॥
यथा घोषो गभीरायां नद्यामित्यत्र च द्वयोः ॥
गभीरनद्योरन्योन्यमन्वयज्ञानतः परः ॥ ६० ॥
विशिष्टार्थैकसम्बन्धि तीरं वस्त्वेव लक्ष्यते ॥
तथैव प्रकृतेऽन्योन्यविशिष्टार्थधियः परं ॥
॥ ६१ ॥ तत्सम्बन्धि परं ब्रह्माखण्डं वस्त्वेव
लक्ष्यते ॥ एकस्मिन्ब्रह्मणि [redacted] द्वारीभूताया
अपि तद्धियः ॥ ६२ ॥ मिलित्वा जननाच्छब्दै-
र्लक्षणातोऽप्यखण्डधीः ॥ तात्पर्यज्ञापका-

भावात्प्रत्येकं न पृथक्पदे॥६३॥लक्षणा
समुदाये स्यात्तस्माद्वाक्येऽपि लक्षणा
॥एवं पदार्थे तात्पर्यान्वयासिद्धिकृता पदे
॥६४॥लक्षणा तद्द्वयासिद्ध्या वाक्यार्थे
वाक्य इष्यते॥वाक्यं लाक्षणिकत्वेऽपि
भवेदेवानुभावकम्॥अज्ञातज्ञापकत्वाच्च
वेदान्ता अनुभावकाः॥६५॥एवं च तत्त्वम-
स्यादिमहावाक्यानुमानकम्॥निर्दोषं सो-
ऽयमित्यादिदृष्टान्तोऽत्रानुकूलकृत्॥
॥६६॥तत्र तद्देशकालादिविशेषणविवर्ज-
नात्॥विशेष्यमात्रमेकं हि बोध्यतेऽख-
ण्डितार्थकम्॥६७॥प्रत्यभिज्ञा पदार्था-
त्मभेदभ्रमनिवर्त्तिका॥नाभिज्ञा स्यात्पदा-
र्थैक्यविषयत्वेऽपि सा प्रमा॥६८॥एवं
तत्त्वमसीत्यस्य सत्यादिपदवाक्यतः॥
प्रमेयैक्येऽपि भेदान्ध्यनाशकत्वेन मान-

ता ॥ ६९ ॥ उपाधिभेदभिन्नोऽर्थो येनैकः
प्रतिपाद्यते ॥ तदपि स्यादखण्डार्थं महत्त्वं
कुम्भखं यथा ॥ ७० ॥ तथा तत्त्वमसीत्ये-
वमखण्डार्थावबोधकम् ॥ उपाधिभेदभि-
न्नेऽर्थेऽप्यैक्यस्य प्रतिपादनात् ॥ ७१ ॥
सत्यज्ञानादिगीरेतत्संसर्गव्यतिरेकिणी ॥
अर्थेप्रमाणं मानत्वान्नयनादिप्रमाणवत् ॥
॥ ७२ ॥ मानं वेदान्तवाक्यानि निर्गुणाख-
ण्डसाधनात् ॥ निर्गुणत्वं च तस्योक्तं श्रु-
त्या युक्तिसहायया ॥ ७३ ॥ निर्गुणस्ताव-
दात्माऽस्ति कैवल्यश्रुतिसद्गिरा ॥ उपास्त्यै
सत्यकामाद्या गुणास्तत्र समर्पिताः ॥ ७४ ॥
अन्यशेषतया तेषां परत्परत्वं न तच्छ्रु-
तेः ॥ निर्गुणप्रकृतस्याया अद्वितीयपरत्व-
तः ॥ ७५ ॥ तत्परत्वेन सत्त्वैक्यबोधिनोः
श्रुतिवाक्ययोः ॥ प्राबल्यान्न निषेध्यत्व-

मसङ्गेदादिबोधिभिः ॥७६॥ नब्रह्मण्य-
नुमानं वा सद्धर्मादिप्रमापकम् ॥ सिद्धसाध-
नदोषेण दूषितत्वान्निरर्थकम् ॥७७॥
ईश्वरस्तु सदावाप्तसमस्तशुभसद्गुणः॥
स्वीकृतोऽस्माभिरप्यत्र मायावित्वेन का-
लतः ॥७८॥ न निर्द्धर्मकतायां स्यात्काल-
सम्बन्ध आत्मनि॥ हेत्वसिद्धेर्न शुद्धस्य प-
क्षीकरणसम्भवः ॥७९॥ आनन्दादेस्तु नि-
त्यत्वात्तत्प्रेप्सायाश्च तत्र च ॥ सामर्थ्यस्य
त्वया वक्तुमशक्यत्वान्न साधनम् ॥८०॥
सद्धर्मकानुमाने ते सर्वत्रैवास्ति दूषणम्॥
न ब्रह्मसमसत्ताकधर्मे मानं तवानुमा॥८१॥
अपरब्रह्मविषया श्रुतिर्निर्द्धर्मकश्रुतेः॥ अवि-
रोधितयोपास्त्यै गुणानां स्यात्समर्पिका॥
॥८२॥ निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्व-
राः॥ ये मन्दास्तेऽनु कंप्यन्ते सविशेषनिरूप-

यैः ॥ ८३ ॥ वशीकृते मनस्येषां सगुणब्रह्म-
शीलनात् ॥ तदेवाविर्भवेत्साक्षादपेतोपा-
धिकल्पनम् ॥ ८४ ॥ सदेवासीदसद्वेति श्रुती
कारणकार्ययोः ॥ विषयीकुरुतः सत्वासत्वे
न ब्रह्मतत्परे ॥ ८५ ॥ शून्यत्वस्यापुमर्थत्वा-
दानन्दावाप्तिरिष्यते ॥ मुक्तिस्तस्मादसन्ने-
वेत्यादिश्रुतिरतत्परा ॥ ८६ ॥ ज्ञानादीनां
स्वरूपत्वाद् गुणत्वासिद्धिरेव हि ॥ तत्स्व-
रूपातिरिक्तानामाबोधं नित्यता मता ॥ ८७ ॥
औपाधिकगुणोक्त्याऽपि श्रुतिः प्रामाण्य-
मश्नुते ॥ मायाविदर्शिता मायानुवादिन्यो
गिरो यथा ॥ ८८ ॥ स्वाभाविकीति वाक्यं तु
लोके योग्यर्जिताद् गुणात् ॥ पृथक्कोत्त्या
न चिद्धातो स्वाभाविकगुणान्जगौ ॥ ८९ ॥
सत्यं तत्त्वमसीत्यादौ ब्रह्मसत्वैक्यतत्परे ॥
सत्वैक्ये तात्त्विके ब्रूतः श्रुती प्रामाण्यनिश्च-

यात्॥८०॥न पूर्वतन्त्रवच्चात्र व्यवस्था श्रुतिवाक्ययोः॥तत्र प्रामाण्यहेतुत्वं समकक्षतया मतम्॥८१॥इह त्वेकतरस्याऽस्ति प्राबल्यं तत्परत्वतः॥इतरस्य तु दौर्बल्यमिति वैषम्यमेतयोः॥८२॥विकारशब्दान्नेत्यादि सूत्ररीत्याऽपि नात्र सा॥व्यवस्था यत एकस्मिंस्तात्पर्यं श्रुतिसद्गिराम्॥८३॥न नञ्काक्षेडितीवात्र शब्दशास्त्रव्यवस्थया॥पर्युदासोऽस्ति नेतीति श्रुत्या सर्वं निषिध्यते॥८४॥द्वा सुपर्णेतिवेदार्थो बुद्धिजीवपरत्वतः॥न जीवब्रह्मणोर्भेदस्तथा पैंग्येऽपि वर्णनात्॥८५॥आत्मैवेदमिति श्रौतं ब्रह्मसार्वात्म्यतत्परं॥वाक्यं तद्विश्वमिथ्यात्वे पर्यवस्यति सर्वथा॥८६॥मिथ्यात्वब्रह्मसत्त्वात्मब्रह्मैक्यानां श्रुतेर्गिरा॥सिद्धत्वान्नाऽत्र कस्याऽपि सामर्थ्यं न-

न्निषेधने ॥८७॥ अविद्यासिद्धसाक्षित्वाद्य-
नुवादेन निर्गुणे ॥ श्रुतीनामस्ति तात्पर्यं
तादस्थ्यद्वारतो मतम् ॥८८॥ अन्यशेषत-
या नास्ति सार्व[redacted]इत्यादिनिवेदने ॥
तात्पर्यं वाक्यभेदः स्यादन्यथा श्रुतिमौलि-
षु ॥८९॥ यः सर्वज्ञ इति श्रुत्या ब्रह्मतत्त्वं
निवेदितम् ॥ तटस्थलक्षणद्वारा तात्पर्य्या-
न्नाप्युपासनम् ॥१००॥ न च ज्ञाने विधिः
शङ्क्योऽप्ययोग्ये तस्य निषेधनात् ॥ आत्म-
श्रावण्यसिद्धौ तत्कथनं कुत्र चिन्मतम् ॥
॥१॥ अथ योऽन्यामिति श्रुत्या भेददर्शन-
निन्दया ॥ नोपास्तिरुच्यते तत्र न सवेदे-
ति निन्दनम् ॥ २॥ आनन्दाद्या इति न्याये-
ऽखण्डवाक्यार्थसिद्धये ॥ वाच्यार्थस्यो-
पसंहारान्नोपास्यत्वस्य सम्भवः ॥ ३॥
उपास्तिविषयत्वेऽपि तात्विकत्वं न चे-

ऋयवत्॥ सत्यकामत्वमुख्यानां न वैक्यस्या-
ऽप्यवस्तुना॥४॥ विशिष्टविषयोपास्तिर्नि-
र्विशेषे न सम्भवेत्॥आनन्दादेरतो ब्रह्मरूप-
त्वादेव वस्तुना॥५॥ भ्रमत्वं सगुणोपास्तेर्वि-
शिष्टविषयत्वतः॥ न निर्गुणाद्युपास्तेस्त-
न्निर्विशेषास्पदत्वतः॥६॥ विशेष्यांशस्य
सत्वेऽपि न सत्यत्वं विशेषणे॥अतः सगुण-
वाक्यं नो गुणानां वस्तुतापरम्॥७॥ त्रिमा-
त्रालम्बनोपाधिविशिष्टस्यैव वस्तुनः॥
ध्येयत्वोक्त्या न शुद्धे सा नेक्षतेः स्याद्विरो-
धिता॥८॥य आत्मा ध्वस्तपाप्मेति गुणाः
सन्ति स्वरूपगाः॥ जिज्ञास्या न बहिर्भूताः
सत्यकामादयो गुणाः॥९॥ व्यावहारिकस-
त्वं स्याद्धर्माणां न तु धर्मिणः॥ अधिष्ठा-
नतया सत्वं पारमार्थिकमात्मनः॥१०॥
पृथगात्मानमित्यादिश्रुतिर्योमामिति

स्मृतिः ॥ कैवल्यहेतुधीसिद्धौ सगुणोपा-
सनं जगौ ॥ ११ ॥ निर्गुणज्ञानतो मुक्तिं त-
त्परत्वाज्जगौ श्रुतिः ॥ सगुणागुणयोर्ज्ञाने
महद्वैषम्यमिष्यते ॥ १२ ॥ अनन्तत्वादिर-
द्वैतस्वरूपपर इष्यते ॥ उपास्तिप्रकृतस्थो-
ऽपि वस्तुमात्रपरत्वतः ॥ १३ ॥ वाग्धेनुत्वा-
दिवन्नात्र सत्यकामादयो गुणाः ॥ अध्य-
स्ता ईश्वरान्नैतेऽन्यत्र सन्ति श्रुतेर्मताः ॥
॥ १४ ॥ नाम ब्रह्मेत्युपासीत सैषा नामाभि-
मानिनी ॥ स्मरेत्तस्यां हरिं ब्रह्मेत्येवमारोप-
तत्परा ॥ १५ ॥ शाखेन्दुन्यायतो ब्रह्मोपदेष्टुं
स्यादुपास्तिगीः ॥ नोपास्तौ श्रुतितात्पर्य-
मुपास्यत्वनिषेधतः ॥ १६ ॥ अन्यदेवेति
गीः श्रौती प्रमेयादप्रमेयतः ॥ घटादेः
शशशृङ्गादेरन्यद्ब्रह्मेति तत्परा ॥ १७ ॥
तस्मात्साधकसद्भावान्निर्गुणं ब्रह्म सम्म-

नम् ॥ सगुणत्वे तु बहुधा बाधकस्याऽपि
सत्वतः ॥१८॥ तत्परत्वात्पुमर्थैकफलत्वान्नि-
र्गुणश्रुतिः ॥ प्रबलास्यानुसारित्वमिष्यते
सगुणश्रुतेः ॥१९॥ सगुणश्रुतिबाहुल्यं प्रा-
बल्ये साधकं न हि ॥ नेक्षन्ते शतमन्धाना-
मिति न्यायस्य सम्भवात् ॥२०॥ युक्तोऽयु-
क्तश्च यत्रार्थ आगमस्य प्रतीयते ॥ स्यात्तत्र
युक्त एवार्थ इत्यप्यसमन्मते भवेत् ॥२१॥
अन्तरित्यादिसूत्रेषु न तात्त्विकगुणोक्तयः
॥आरोपितगुणैरेव सिद्धान्ते सिद्धिसम्भवात्
॥२२॥ दुःखधीर्वृत्तिरूपत्वादानन्दस्तु चि-
दात्मकः ॥ ब्रह्मण्यध्यस्तविश्वस्य न सत्त्वं
स्यात्ततः पृथक् ॥२३॥ निर्विशेषत्वरूपेण
विशेषप्रतिषेधनम् ॥ अद्वितीयतया द्वैत-
निषेध इव सम्भवेत् ॥२४॥ विचारसम-
येऽध्यस्तधर्मसम्भवतोऽञ्जसा ॥ विचा-

रविषयत्वं स्याच्चितो विविदिषा फलं ॥
॥२५॥ निर्विशेषं परं ब्रह्म सिद्धं श्रुत्यादिमा-
नतः॥ सगुणत्वमितोऽध्यस्तं मायया तत्र
केवलं॥२६॥ वेदान्ता निर्विशेषे स्युः प्रमा-
णं नान्यसम्भवः॥ तेऽपि लक्षणया ब्रह्म बो-
धयन्ति न मुख्यया॥२७॥ प्रसन्दिग्धाविप-
र्यस्तबोधकत्वेन मानतां॥ प्राप्नुवन्त्यत्र
वेदान्ता निर्विशेषेऽपि वस्तुनि॥२८॥ प्रगृ-
हीत्वैव सम्बन्धमभिधानाभिधेययोः॥ हि-
त्वा निद्रां प्रबुध्यन्ते सुषुप्तेर्बोधिताः परैः
॥२९॥ जाग्रद्वन्न हि सम्बन्धं सुषुप्तो वेत्ति
कश्चन॥ इति वाक्यस्य सम्बन्धं विना प्रा-
माण्यमीरितं॥३०॥ प्रतिबन्धक्षये पुंसः स-
म्बन्धग्रहणं विना॥ शब्दाज्ज्ञानं धियोऽ-
शुद्धिः प्रतिबन्ध इहेरितः॥३१॥ निष्प्रका-
रमपि ज्ञानं निर्विशेषात्मगोचरं॥ जायते

तम्॥सगुणत्वे तु बहुधा बाधकस्याऽपि
सत्वतः॥१८॥तत्परत्वात्पुमर्थैकफलत्वान्नि-
र्गुणश्रुतिः॥प्रबलास्यानुसारित्वमिष्यते
सगुणश्रुतेः॥१९॥सगुणश्रुतिबाहुल्यं प्रा-
बल्ये साधकं न हि॥नेक्षते शतमन्धाना-
मिति न्यायस्य सम्भवात्॥२०॥युक्तोऽयु-
क्तश्च यत्रार्थे आगमस्य प्रतीयते॥स्यात्तत्र
युक्त एवार्थ इत्यप्यस्मन्मते भवेत्॥२१॥
अन्तरित्यादिसूत्रेषु न तात्त्विकगुणोक्तयः
॥आरोपितगुणैरेव सिद्धान्ते सिद्धिसम्भवात्
॥२२॥दुःखधीवृत्तिरूपत्वादानन्दस्तु चि-
दात्मकः॥ब्रह्मण्यध्यस्तविश्वस्य न सत्वं
स्यात्ततः पृथक्॥२३॥निर्विशेषत्वरूपेण
विशेषप्रतिषेधनम्॥अद्वितीयतया द्वैत-
निषेध इव सम्भवेत्॥२४॥विचारसम-
येऽध्यस्तधर्मसम्भवतोऽञ्जसा॥विचा-

रविषयत्वं स्याच्चितो विविदिषा फलं ॥
॥२५॥ निर्विशेषं परं ब्रह्म सिद्धं श्रुत्यादिमा-
नतः ॥ सगुणत्वमितोऽध्यस्तं मायया तत्र
केवलं ॥२६॥ वेदान्ता निर्विशेषे स्युः प्रमा-
णं नान्यसम्भवः ॥ तेऽपि लक्षणया ब्रह्म बो-
धयन्ति न मुख्यया ॥२७॥ असन्दिग्धाविप-
र्यस्तबोधकत्वेन मानतां ॥ प्राप्नुवन्त्यत्र
वेदान्ता निर्विशेषेऽपि वस्तुनि ॥२८॥ अगृ-
हीत्वैव सम्बन्धमभिधानाभिधेययोः ॥ हि-
त्वा निद्रां प्रबुध्यन्ते सुषुप्ते र्बोधिताः परैः
॥२९॥ जाग्रद्वन्न हि सम्बन्धं सुषुप्तो वेत्ति
कश्चन ॥ इति वाक्यस्य सम्बन्धं विना प्रा-
माण्यमीरितं ॥३०॥ प्रतिबन्धक्षये पुंसः स-
म्बन्धग्रहणं विना ॥ शब्दाज्ज्ञानं धियोऽ-
शुद्धिः प्रतिबन्ध इहेरितः ॥३१॥ निष्प्रका-
रमपि ज्ञानं निर्विशेषात्मगोचरं ॥ जायते

शंसयोश्छेदि वेदान्तैकप्रमाणजं॥३२॥
तस्माद्बाधकसद्भावात्साधकाभावतस्तथा॥
सगुणत्वे परं ब्रह्म निर्गुणं सिद्धमञ्जसा॥३३॥
निराकारं स्वयंज्योतिस्तमसः परमर्कवत्॥
ज्ञानानन्दैकरूपत्वमृतेनान्याऽऽकृतिर्विभोः
॥३४॥ उपास्यतत्त्वसिद्धौ वा सर्वात्मकतया
विभोः॥ नियम्यगानुवादित्वात्तयोक्तेर्नान्य-
थेष्यते॥३५॥प्रवेष्टृत्वे च गम्यत्वेऽन्यथासि-
द्धे न विग्रहः॥कल्प्योऽथ क्रममुक्त्यै वा
तज्ज्ञानं वोपलक्षितं॥३६॥चिदानन्दस्वरूप-
स्य निराकारस्य वस्तुतः॥ विग्रहो मायया
भाति नान्यथा तर्क्यतां वृथा॥३७॥नाराय-
णादिशब्देन मायोपहितमुच्यते॥ चैतन्यं
न चितेर्नास्ति विग्रहस्यापि कल्पना॥३८॥
ज्ञानानन्दैकरूपत्वप्रतिपादनतत्परा॥श्रुति-
र्न विग्रहं वक्ति तात्पर्येणाद्वितीयगा॥३९॥

उपासनादिसंसिद्ध्यै ब्रह्मणो रूपकल्पना॥
वस्तुतस्तु निराकारं निर्गुणं निर्विशेषकं॥
॥४०॥ज्ञानमर्थप्रकाशात्म मुक्तावप्यनपा-
यतः॥निरुपाधिकमानन्द इष्टरूपत्वम-
श्रुते॥४१॥ ज्ञानानन्दापृथक्त्वेऽपि साफल्यं
स्यात्पदद्वये॥अद्वितीयस्वरूपं स्याद्द्वैता-
भावोपलक्षितं॥४२॥उभयावधिराहित्यं
नित्यत्वं सम्मतं विदां॥अविद्यायां तत्का-
र्ये वा साक्षिचैतन्यबिम्बनं॥४३॥ शुद्धब्रह्मा-
तिरिक्तो यो बुद्ध्युपाधिकतः पृथक्॥
साक्षी स एव वेदान्ते स्वीकृतः सर्वसाधकः
॥४४॥साक्षिणः सर्वजीवेषु साधारण्येऽपि
सर्वदा॥तत्तज्जीवादभेदेनाभिव्यक्तस्यैव
बोधिता॥४५॥ज्ञानानन्दैकरूपं यदद्वि-
तीयमनश्वरं॥नित्यं साक्षि परं ब्रह्मेत्येवं
सिद्धान्तदिग्जयः॥४६॥ चितो विवर्ताधि-

ष्ठानतयोपादानता मता॥ विवर्तकारणा-
ज्ञानगोचरत्वात्तथेष्यते॥४७॥अस्य द्वैते-
न्द्रजालस्य यदुपादानकारणं॥अज्ञानं तदु-
पाश्रित्य ब्रह्म कारणमुच्यते॥४८॥ स्वस्मि-
न्कार्यजनेरेव हेतुत्वं लक्षणं ध्रुवं॥उपादा-
नस्य तच्चास्ति विवर्तपरिणामयोः॥४९॥
ब्रह्ममाये जगद्योनी नोभयोः परिणामिता
॥ तयोर्विकारिणी माया ब्रह्म तत्र विवर्तते
॥५०॥ ब्रह्मणो निर्विकारत्वमसाधारण्य-
रूपतः॥ विकारित्वं तु मायायाः समसत्ता-
ककार्यतः॥५१॥ न ब्रह्मसमसत्ताकं जगत्त-
स्य विवर्तनं॥जगत्प्रातीतिकं तस्मात्सत्यं
ब्रह्मैव तात्त्विकं॥५२॥ मायैव वाऽस्त्यु-
पादानं निमित्तं परमेश्वरः॥अधिष्ठानं वि-
शुद्धा चिदिति पक्षोऽपि युक्तिभाक्॥५३॥
घटादेः कल्पितस्यैव कुलाले कर्तृतेष्यते॥

रूप्यादौ कल्पिते साक्षिकर्तृत्वं सम्मतं वि-
दाम् ॥५४॥ जनिकर्तुर्यतो वेति श्रुतिसूत्रप्र-
माणतः ॥ स्थित्याद्याधारलिङ्गाच्चोपादान-
त्वं प्रसिद्ध्यति ॥५५॥ तदैक्षत व्याकरोमी-
त्यादिश्रुत्या चिदद्वये ॥ ईक्षणादिकलाधा-
रतया कर्तृत्वमिष्यते ॥५६॥ एकविज्ञान-
तः सर्वविज्ञानश्रुतिमौलिगीः ॥ सच्च त्यच्च
भवत्येवमित्युपादानतां जगौ ॥५७॥ सर्वं
ब्रह्मेदमित्येवं सामानाधिकरण्यगीः ॥ प्र-
धिष्ठानतया सर्वव्यापित्वे मानमीशितुः
॥५८॥ सदुपादानकं विश्वं सत्स्वभावानु-
रञ्जितं ॥ नानाविकाररूपत्वान्मृत्स्नाव्या-
प्तघटादिवत् ॥५९॥ सुखदुःखादिवत्प्रेक्षापू-
र्वोत्पादितकार्यतः ॥ अभिन्नहेतूपादानं जग-
दित्यनुमानतः ॥६०॥ ब्रह्माभिन्ननिमित्तोपा-
दानं सिद्धमितीष्यते ॥ न वा सत्प्रतिपक्षोऽत्र

श्रुतिमौलिविरोधतः॥६१॥ब्रह्मणः स्वप्रका-
शत्वमवेद्यत्वे सति ध्रुवं॥अपरोक्षार्हतात्यन्ता-
भावानाश्रयतात्मकं॥६२॥तस्याव्याप्ति र्न
मोक्षेपि स्वरूपत्वेन सत्वतः॥ स्वरूपत्वेपि
तस्यास्ति लक्षणत्वं गुणत्ववत्॥६३॥य-
द्वाऽत्र योग्यतात्यन्ताभावो ब्रह्मैव तत्त्वतः
॥फलाव्याप्यतया त्वस्यावेद्यत्वमपि स-
म्भवेत्॥६४॥फलव्याप्यत्वमेवेष्टं घटादौ
न तु चिद्घने॥साक्षिभास्यत्वमेवेष्टं सुखादौ
रजतादिके॥६५॥फलाव्याप्यत्वतुल्याधि-
करणत्वस्य सम्भवात्॥ब्रह्मणः फलरूपत्वा-
न्न तद्गोचरतेष्यते॥६६॥स्वस्मिन्स्वाविष-
यत्वेऽपि व्यवहारैकहेतुता॥घटादेरप्रका-
शत्वाद्विषयत्वं विना न सा॥६७॥चैतन्या-
विषयत्वं वा स्वप्रकाशत्वमुच्यते॥चिद-
न्यस्य समस्तस्य चैतन्यविषयत्वतः॥६८॥

निःस्वरूपतया तुच्छे नातिव्याप्तिरसम्भ-
वः॥ स्वस्मिन्वृत्तिविरोधेन स्ववेद्यत्त्वं न
युज्यते ॥ ६९ ॥ यद्वा स्वव्यवहारे स्वातिरि-
क्तायाश्च सम्विदः॥ अनपेक्षत्वमेतद्वा स्वा-
वच्छिन्नानपेक्षता ॥ ७० ॥ स्वप्रकाशत्वधर्म-
स्य स्वरूपत्वमिहेष्यते ॥ नाद्वैतहानिर्बा-
धो वा नेदमिष्टं च वादिनां ॥ ७१ ॥ स्वप्र-
काशानुभूतिः स्यादनुभूतित्वहेतुना ॥
यन्नैवं न तदेवं स्यादित्यस्ति व्यतिरेकि-
मा ॥ ७२ ॥ मानानपेक्षसिद्धे र्हि स्वतः सिद्धि-
पदार्थता ॥ नृशृङ्गादेरसत्त्वत्वान्न माना-
मानयोग्यता ॥ ७३ ॥ आत्मनः स्वप्रकाश-
त्वं चिद्रूपत्वादपीष्यते ॥ चिद्रूपत्वं श्रुते-
र्मानात्स्वयंज्योतिर्गिरेष्यते ॥ ७४ ॥ आत्मै-
वास्ययतो ज्योतिः स्वयंज्योतिस्तदुच्य-
ते ॥ स्वातिरिक्तानपेक्षत्वात्स्वप्रकाशत्वसा-

त्मनः॥ ७५॥ दुर्विवेकतया जाग्रदवस्था-
यामनेकधा॥ आदित्यादेः समावेशात्स्वयं
ज्योतिष आत्मनः॥ ७६॥ सुविवेकतया
स्वप्ने तदन्यस्याखिलस्य हि॥ अभावाज्ज्यो-
तिषोऽत्रेति सफलं स्याद्विशेषणं॥ ७७॥
तथाऽऽत्मा स्वप्रकाशोऽयं स्वसत्तायां
प्रकाशतः॥ व्यतिरेकविहीनत्वात्प्रकाश-
स्याश्रयत्वतः॥ ७८॥ प्रकाशकर्तृभावाद्धे-
त्युक्तं विवरणे स्फुटं॥ अत एव घटादौ
नाप्रकाशोऽतिप्रसङ्गतः॥ ७९॥ निर्धर्मक-
तया ब्रह्मावेद्यत्वेन निरञ्जनं॥ अनन्तादि-
गिरां लक्ष्यं न वाच्यं हेत्वभावतः॥ ८०॥
लक्ष्यत्वव्यवहारोऽपि वाच्यत्वाभाव-
हेतुकः॥ निर्धर्मकतया वृत्तेर्निमित्ताभाव-
तो गिरां॥ ८१॥ सत्यज्ञानादिशब्दास्तेऽ-
ध्यस्तधर्मैकवाचिनः॥ लक्षयन्ति पर-

ब्रह्माखण्डव्यक्तिं च तान्विकीं ॥ ८२ ॥ व-
स्तुनः पदलक्ष्यत्वेप्यपदार्थत्वसम्भवात् ॥
अखण्डत्वेऽपि वाक्यार्थभावो ब्रह्मणि सि-
ध्यति ॥ ८३ ॥ अन्वान्विताभिधानेऽपि स्व-
रूपे लक्षणेष्यते ॥ अन्वितस्य न चावाच्य-
भावस्य क्षतिरस्तिवा ॥ ८४ ॥ अवाच्यमश-
ब्दमस्पर्शमखण्डं श्रुतयो जगुः ॥ स्वार्थे
मानतया तासां न चान्याव्यप्रकल्पना
॥ ८५ ॥ लक्षणास्वीकृतेः शक्तिमात्रस्यैव
निराकृतेः ॥ निर्द्दिष्टमेकतया वाच्यभावबा-
धादुपाधितः ॥ ८६ ॥ वेदान्तवाक्यजज्ञान-
निवर्त्याज्ञानगोचरं ॥ बोधयन्ति प्रमाण-
त्वाद्वेदान्ता ब्रह्म चिद्घनं ॥ ८७ ॥ दृष्टा
गुणक्रियाजातिसम्बन्धाः शब्दहेतवः
॥ नात्मन्यतस्मोह्येषां तेनात्मा नाभिधी-
यते ॥ ८८ ॥ आरोपितगुणादेस्तु तात्पर्या-

गोचरत्वतः॥अवाच्यत्वेऽस्ति तात्पर्यं सर्ववेदान्तसङ्गिरां॥८९॥ब्रह्मण्यवाच्ये यो विद्वान्वाच्यतामधिगच्छति॥स निस्त्रपो निमित्तानां विरहैः प्रतिबोध्यतां॥९०॥ घटादीनां मिथो भेदो भेदो जीवेशयोर्मिथः॥भ्रान्त्या प्रतीयमानत्वान्मिथ्या रज्जुभुजङ्गवत्॥९१॥सत्तर्कैः श्रुतिभिः स्मृत्या भिदाया बाधितत्वतः॥प्रतीत्यैकशरीरस्थ न भेदस्यास्ति वस्तुता॥९२॥भेदखण्डनयुक्तीनां तत्त्वतो भेदवारणात्॥व्यावहारिकभेदस्यावारकत्वान्न दुष्टता॥९३॥ भेदभ्रमाद्यधिष्ठानतत्त्वगोचरबोधतः॥भ्रमे समूले विध्वस्ते नैव भेदः प्रमाणभाक्॥९४॥ अनिर्वाच्यतया भेदो बाध्यत्वेनैव सम्मतः॥ ऐक्यं ब्रह्मस्वरूपत्वादबाध्यं श्रुतिबोधितं॥ ॥९५॥व्यवहारव्यवस्थापि व्यावहारिकभेद-

तः ॥ सिद्धा न भेदवस्तुत्वमपि साऽपेक्षते स्वयं
॥ ९६ ॥ अभेदे भेदमारोप्य धर्मधर्मिभ्रमावहा
॥ माया भ्रान्तिकरी दक्षाऽन्यसम्भावितदर्शि-
ने ॥ ९७ ॥ निरपेक्षस्वरूपस्य सापेक्षत्वं न
सम्भवेत् ॥ क्वचिदाविद्यका सा चेदपेक्षा ते-
न का क्षतिः ॥ ९८ ॥ अविद्याविनिवृत्तिश्च जी-
वब्रह्मैक्यमेव वा ॥ अपेक्षते प्रतीतौ तत्सापेक्ष-
त्वं हि मायिकं ॥ ९९ ॥ तात्त्विके निरपेक्षत्वे
न विरोधोऽस्ति तावता ॥ न हि काल्पनिकं
किञ्चिद्वस्तुतत्त्वमपि स्पृशेत् ॥ १०० ॥ चैत-
न्ये कल्पिताः सर्वे ये विरोध्यनुरोधिनः ॥
तेषां सापेक्षताप्येवं कल्पिता चिद्घने पदे
॥ १ ॥ ऐक्यस्य निरपेक्षत्वे भेदभ्रान्तिनि-
वृत्तये ॥ एकवाक्यत्वसद्भावात्स्वरूपपरस-
ङ्गिरां ॥ २ ॥ अतः काल्पनिको भेदः सर्वत्र
व्यावहारिके ॥ वस्तुन्यात्मन्यभेदस्तु ता-

त्त्विकः श्रुतिबोधितः ॥३॥ सापेक्षत्वात्सा-
वधेश्च तत्त्वे द्वैतप्रसङ्गतः ॥ एकाभावादस-
न्देहात्तद्रूपं वस्तुनो भिदा ॥४॥ कल्पितो
धर्मभेदोऽस्ति ज्ञानानन्दादिगोचरे ॥ तदै-
क्यं श्रुतिसंसिद्धं भेदभ्रान्तिनिवर्तकं ॥५॥
प्रतियोग्यादिसापेक्षं भेदज्ञानं न तात्त्विकं ॥
ऐक्यज्ञाने प्रमाणोत्थे वस्तुतः प्रतिबन्ध-
कं ॥ ६ ॥ स्वव्याघातकैरेवं जातिभिन्नैः
सदुत्तरैः ॥ निरस्तं भेदमादाय स्वात्माभे-
दो निषीदति ॥ ७ ॥ न समानविशेषादि-
रूपभेदः प्रमाणयुक् ॥ अभेदो विजयी
तस्माद्वेदान्तैकप्रमाणभाक् ॥ ८ ॥ एवं
प्रत्यक्षतः प्राप्तभेदस्यैव निवारणात् ॥
असाक्षात्कृतजीवेशभेदादौ का कथा त-
व ॥ ९ ॥ अप्रत्यक्षतयेशस्य तद्धर्मिप्रति-
योगिकः ॥ भेदोऽशक्यो ग्रहीतुं सोऽन्य-

थासिद्धस्तु तद्ग्रहः ॥ १० ॥ भेदानुवादिनी
श्रौती गीरवच्छिन्नमात्रगा ॥ अनवच्छिन्न-
चिद्धातोरभेदः श्रुतिसम्मतः ॥ ११ ॥ सौषु-
प्तिकानुभूतिस्त्वज्ञानावच्छिन्नभेदगा ॥
न शुद्धेऽथ न जीवानां मिथो भेदे प्रमाऽक्ष-
जा ॥ १२ ॥ नानुमानाद्भिदासिद्धि स्तयोर्नि-
र्द्धर्मकत्वतः ॥ स्वरूपासिद्धितः साध्यवै-
कल्यात्सिद्धसाधनात् ॥ १३ ॥ अप्रसिद्धवि-
शेषत्वादसाधारण्यदूषणात् ॥ अन्यथैवो-
पपत्त्या च सर्वस्मिन्सिद्धसाधनात् ॥ १४ ॥
अभ्रान्तत्वादयो धर्मा न तयोर्भेदसाध-
काः ॥ ज्ञानाज्ञानप्रयुक्तास्ते न स्वरूपनि-
बन्धनाः ॥ १५ ॥ शुद्धयोस्तत्त्वमोर्नैव ध-
र्मित्वमवकल्पते ॥ निर्विशेषतया तत्र
भेदगन्धोऽपि दुर्लभः ॥ १६ ॥ अप्रमेयेऽ-
नुमानस्य प्रवृत्तिर्न कथञ्चन ॥ प्रमेयस्य

त्वनात्मत्वात्तत्र भेदानुमेष्यते ॥१७॥ शु-
द्धे शब्दैकगम्ये नानुमानप्रसरोऽनुसा ॥
तात्विकत्वभ्रमध्वस्त्यै भेदे तस्य फलि-
त्वतः ॥१८॥ अप्रसिद्धविशेषत्वादन्यथै-
वोपपत्तितः ॥ सर्वशक्त्यल्पशक्त्यादेर्न
भेदे तन्त्रता ततः ॥१९॥ जीवेश्वरभिदा
सत्या खण्डिताऽस्माभिरादरात् ॥ गीता-
भावप्रकाशेऽतो यत्यते नेह विस्तरे ॥२०॥
न जीवानां मिथो भेदेऽनुमानं सिद्धसाध-
नात् ॥ अर्थान्तरादसिद्धेश्चांशस्योपाधि-
त्वसम्भवात् ॥२१॥ दुःखाद्यननुसन्धान-
मुपाधेर्न स्वरूपतः ॥ सुप्तौ लयेऽप्युपाधे-
र्नो भेदः संस्कारतः स्थितेः ॥२२॥ सुप्तप्र-
लीनमुक्तानामध्यासविरहाद्भवेत् ॥ संसा-
र्यननुसन्धानं स्वसुखानुभवः स्वतः ॥२३॥
अविद्याध्वस्तिमोक्षस्य गतत्वेऽपि चि-

दृङ्ग्ये॥ तत्रैवोपहिते बन्धो न तेनास्ति भिदा तयोः॥२४॥उपाधेः कल्पितत्त्वेन निवृतावपि तात्त्विकम्॥उपाधेयस्वरूपं नो मुक्तौ जातु निवर्त्तते॥२५॥नो वैयधिकरण्यं स्यादात्मनो बन्धमोक्षयोः॥ विशिष्टे भोक्तृता सिद्धा न शुद्धे सा सुखात्मनि॥२६॥अविद्यात्मकबन्धस्य शुद्धवस्तुगतत्वतः॥ सामानाधिकरण्यं स्यादेवं वा बन्धमोक्षयोः॥२७॥अनुसन्धातृतापीष्टा शुद्धेऽवस्थात्रयानुगे॥ सर्वदेहेषु शुद्धस्यानुप्रवेशश्रुतिर्यतः॥ ॥२८॥बद्धमुक्तव्यवस्थाऽपि न स्वाभाविकभेदगा॥उपाधिबाधाबाधाभ्यां साऽपि सम्भवव्यवस्थिता॥२९॥येनैवोपाधिना यस्य परिच्छिन्नत्वमात्मनः॥ तदुपाधेर्लयात्तस्य मुक्तित्वे नास्त्यस-

म्भवः॥३०॥एकजीवमते सर्वोपाधिना-
शाद्विमुक्तिता॥इदानीं मुक्त्यभावस्य ना-
निष्टत्वं मते मम॥३१॥मिथ्याभूतस्य
चोपाधेर्मिथ्याभेदैकहेतुता॥इति तेन
न जीवानां मिथो भेदो मनागपि॥३२॥
एवं जडेशाभेदेऽपि भेदे च जडजीवयोः॥
तात्त्विके न प्रमाणं स्यात्प्रोक्तदोषानति-
क्रमात्॥३३॥परिच्छिन्नत्वजन्यत्वज-
डत्वोपाधिभावतः॥स्यादप्रयोजकत्वा-
च्च हेतोरनुमितिर्वृथा॥३४॥स्वप्रकाश-
तया सर्वप्रत्यये विषयत्वतः॥ब्रह्मसिद्धा-
वपि श्रौती गीरज्ञाननिवर्त्तिका॥३५॥
एवं जडानामन्योन्यभेदेनानुमितिः प्रमा
॥धर्म्यादिकविकल्पैकग्रासत्वासानपा-
यतः॥३६॥मिथ्यात्वसाधकानां हि हे-
तूनां प्रबलत्वतः॥तैर्बाधान्नानुमानं ते

जडानां भेदसाधकम्॥३७॥द्वासुपर्णेति
पूर्वार्धे न प्रमेयो भिदेक्ष्यते॥अपदार्थत-
या तद्वदवाक्यार्थतयाऽस्य च॥३८॥
द्वौ चन्द्राविति वन्मिथ्या भेदेनाप्युपप-
त्तितः॥न वास्तवस्य भेदस्यापेक्षकात्वं
भवेद्गिरः॥३९॥अतो नैवोत्तरार्द्धेपि ता-
त्विकं भेदमाह सा॥बुद्धिजीवपरत्वेन
व्याख्याता श्रुतिरन्यथा॥४०॥चेतनश्चे-
तनानां य आत्मन्नित्यादिवेदगीः॥आधा-
ाधेयभावादेस्तात्त्विकत्वे न तत्परा॥
४१॥किन्तु काल्पनिकं भेदमादायैवो-
पद्यते॥श्रुत्यन्तरविरोधाच्च न सा भे-
रा श्रुतिः॥४२॥त्रिकालाबाध्यताबो-
पदाभावादजाश्रुतिः॥प्रत्यक्षसिद्ध-
ानुवादित्वेन न तत्परा॥४३॥व्याव-
कभेदे वा तत्पराऽस्वर्थवादवत्॥

प्रामाण्यं वैपरीत्यं वा विरोधेनाभिदाश्रुतेः
॥४४॥ तात्पर्यलिङ्गवत्वात्स्यात्प्राबल्यम-
भिदाश्रुतेः॥ यत्र भेदश्रुतिर्मुक्तौ सा मुक्तिः
स्यादवान्तरा ॥४५॥ परमुक्तौ न भेदोऽ-
स्ति सर्वद्वैतनिषेधनात्॥ विस्तरेण प्रकारो-
ऽयं ज्ञेयो भावप्रकाशतः ॥४६॥ न वा शब्दा-
न्तरादीनां भेदकत्वेऽपि तात्त्विके॥ अभेदे
स्याद्विरोधित्वं प्रत्यक्षसमकक्षतः ॥४७॥
मीमांसकोऽप्यपूर्वस्व मन्यभेदकमानतः॥
कल्पयत्यात्मनो भेदं नेक्षसेऽतिप्रसञ्जनम्॥
॥४८॥ भेदे षड्विधतात्पर्यलिङ्गं नास्ति-
श्रुतेर्मतं॥ मुण्डकोपक्रमादीनामद्वैतैकपर-
त्वतः ॥४९॥ पौर्वापर्यापरिज्ञानात्प्राह
भेदपरां श्रुतिम्॥ भ्रान्तस्तेन न वेदान्तप्रमा-
णं भेदगोचरं ॥५०॥ ऐक्यमात्मस्वरूपं
हि ज्ञानानन्दादिरूपवत्॥ निरपेक्षतयैक्य-

स्य निरपेक्षात्मरूपता ॥ ५१ ॥ तत्त्वमस्यादि-
मानं स्यादभेदे ब्रह्मजीवयोः ॥ विरुद्धांशप-
रित्यागात्सोऽयमित्यादिवद्ध्रुवं ॥ ५२ ॥
त्यागो विरुद्धरूपस्याविवक्षामात्रतो मतः
॥ स च ब्रह्मानुभूत्यैकागोचरत्वं न चात्ययः
॥ ५३ ॥ जडानां बाध्यरूपत्वान्निःस्वरूप-
त्वतोऽसतः ॥ न जीवब्रह्मवत्तत्रानुस्यूता-
कारसम्भवः ॥ ५४ ॥ नोपजीव्यविरोधोऽत्रो-
पजीव्यांशो न बाध्यते ॥ यद्बाध्यते न त-
त्रेहोपजीव्यमिति वर्णितं ॥ ५५ ॥ सार्वज्ञ्या-
दि विशिष्टं यत्तत्रैक्यं नेष्यते मया ॥ ऐक्य-
ज्ञानं प्रमाणत्वे न तज्ज्ञानमपेक्षते ॥ ५६ ॥
तस्मादैक्यश्रुतेः सर्वशेषित्वेन बलिष्ठता ॥
ब्रह्मात्मैक्यपरत्वं स्यात्सिद्धं भेदैकबाध-
नात् ॥ ५७ ॥ तात्पर्यनिश्चिते ह्यैक्ये तन्नि-
र्वाहकलक्षणा ॥ निर्दुष्टा न तु तात्पर्यत्या-

म्भवः॥३०॥ एकजीवमते सर्वोपाधिना-
शाद्विमुक्तिता॥ इदानीं मुक्त्यभावस्य ना-
निष्टत्वं मते मम॥३१॥ मिथ्याभूतस्य
चोपाधेर्मिथ्याभेदैकहेतुता॥ अस्ति तेन
न जीवानां मिथो भेदो मनागपि॥३२॥
एवं जडेशभेदेऽपि भेदे च जडजीवयोः॥
तात्विके न प्रमाणं स्यात्प्रोक्तदोषानति-
क्रमात्॥३३॥ परिच्छिन्नत्वजन्यत्वज-
डत्वोपाधिभावतः॥ स्यादप्रयोजकत्वा-
च्च हेतोरनुमितिर्वृथा॥३४॥ स्वप्रकाश-
तया सर्वप्रत्यये विषयत्वतः॥ ब्रह्मसिद्धा-
वपि श्रौती गीरज्ञाननिवर्त्तिका॥३५॥
एवं जडानामन्योन्यभेदेनानुमितिः प्रमा
॥ धर्म्यादिकविकल्पैकग्रासत्वासानपा-
यतः॥३६॥ मिथ्यात्वसाधकानां हि हे-
तूनां प्रबलत्वतः॥ तैर्बाधान्नानुमानं ते

जडानां भेदसाधकम्॥३७॥द्वासुपर्णेति
पूर्वार्धे न प्रमेयो भिदेक्ष्यते॥अपदार्थत-
या तद्वद्वाक्यार्थतयाऽस्य च॥३८॥
द्वौ चन्द्राविति वन्मिथ्या भेदेनाप्युपप-
त्तितः॥न वास्तवस्य भेदस्यापेक्षकत्वं
भवेद्गिरः॥३९॥अतो नैवोत्तरार्द्धेपि ता-
त्विकं भेदमाह सा॥बुद्धिजीवपरत्वेन
व्याख्याता श्रुतिरन्यथा॥४०॥चेतनश्चे-
तनानां य आत्मन्नित्यादिवेदगीः॥आधा-
राधेयभावादेस्तात्विकत्वे न तत्परा॥
॥४१॥किन्तु काल्पनिकं भेदमादायैवो-
पपद्यते॥श्रुत्यन्तरविरोधाच्च न सा भे-
दपरा श्रुतिः॥४२॥त्रिकालाबाध्यताबो-
धिपदाभावादजाश्रुतिः॥प्रत्यक्षसिद्ध-
भेदानुवादित्वेन न तत्परा॥४३॥व्याव-
हारिकभेदे वा तत्पराऽस्त्वर्थवादवत्॥

प्रामाण्यं वैपरीत्यं वा विरोधेनाभिदाश्रुतेः ॥४४॥ तात्पर्यलिङ्गवत्वात्स्यात्प्राबल्यमभिदाश्रुतेः॥ यत्र भेदश्रुतिर्मुक्तौ सा मुक्तिः स्यादवान्तरा ॥४५॥ परमुक्तौ न भेदोऽस्ति सर्वद्वैतनिषेधनात्॥ विस्तरेण प्रकारोऽयं ज्ञेयो भावप्रकाशतः ॥४६॥ न वा शब्दान्तरादीनां भेदकत्वेऽपि तात्विके॥ अभेदे स्याद्विरोधित्वं प्रत्यक्षसमकक्षतः ॥४७॥ मीमांसकोऽप्यपूर्वस्त्वमन्यभेदकमानतः॥ कल्पयस्यात्मनोभेदं नेक्षसेऽतिप्रसञ्जनम्॥ ॥४८॥ भेदे षड्विधतात्पर्यलिङ्गं नास्ति श्रुतेर्मतं॥ मुण्डकोपक्रमादीनामद्वैतैकपरत्वतः ॥४९॥ पौर्वापर्यापरिज्ञानात्प्राह भेदपरां श्रुतिम्॥ भ्रान्तस्तेन न वेदान्तप्रमाणं भेदगोचरं ॥५०॥ ऐक्यमात्मस्वरूपं हि ज्ञानानन्दादिरूपवत्॥ निरपेक्षतयैक्य-

स्य निरपेक्षात्मरूपता॥५१॥ तत्त्वमस्यादि-
मानं स्यादभेदे ब्रह्मजीवयोः॥ विरुद्धांशप-
रित्यागात्सोऽयमित्यादिवद्ध्रुवं॥५२॥
त्यागो विरुद्धरूपस्याविवक्षामात्रतो मतः
॥ स च ब्रह्मानुभूत्यैकागोचरत्वं न चान्यथः
॥५३॥ जडानां बाध्यरूपत्वान्निःस्वरूप-
त्वतोऽसतः॥ न जीवब्रह्मवत्तत्रानुस्यूता-
कारसम्भवः॥५४॥ नोपजीव्यविरोधोऽत्रो-
पजीव्यांशो न बाध्यते॥ यद्बाध्यते न त-
द्धेहोपजीव्यमिति वर्णितं॥५५॥ सार्वज्ञ्या-
दिविशिष्टं यत्तत्रैक्यं नेष्यते मया॥ ऐक्य-
ज्ञानं प्रमाणत्वे न तज्ज्ञानमपेक्षते॥५६॥
तस्मादैक्यश्रुतेः सर्वशेषित्वेन बलिष्ठता॥
ब्रह्मात्मैक्यपरत्वं स्यात्सिद्धं भेदैकबाध-
नात्॥५७॥ तात्पर्ये निश्चिते ह्यैक्ये तन्नि-
र्वाहकलक्षणा॥ निर्दुष्टा न तु तात्पर्यत्या-

गस्तदनुरोधतः ॥ ५८ ॥ न हि मुख्यपरत्वे
स्युरर्थान्तरविकल्पनाः ॥ न तथा श्रुतिसूत्रा-
णां व्यवस्था त्वन्मतेऽञ्जसा ॥ ५९ ॥ विशेषणां-
शत्यागेऽपि न त्यागः स्याद्विशेष्यगः ॥ भा-
गत्लक्षणया त्वैक्यं निर्दुष्टं श्रुतिसम्मतं ॥
॥ ६० ॥ स आत्मा तत्त्वमित्यत्रैतदात्म्यमिति
शङ्कतः ॥ एतत्सद्यस्य सर्वस्यात्यात्माभा-
वे ष्यत्रो विधेः ॥ ६१ ॥ सामानाधिकरण्यं त-
द्यो वै भूमेतिवत्सुखं ॥ एकविज्ञानतः सर्ववि-
ज्ञानस्य प्रतिज्ञया ॥ ६२ ॥ न चैक्यं देहदेहि-
त्वहेतुकं तत्त्वमोर्मतं ॥ तात्त्विके बाधकाभा-
वादभेदे ब्रह्मजीवयोः ॥ ६३ ॥ वेदे शकुनिदृष्टा-
न्ते भेदः सन्नन्यथेष्यते ॥ स्वमपीत इति श्रु-
त्या स्वरूपे स्वाप्यै ईरितः ॥ ६४ ॥ प्राज्ञेन स-
म्परिष्वक्त इति विक्षेपहानितः ॥ सुप्तौ स्व-
रूपलाभोक्तिर्नत्वात्यन्तिकतत्परा ॥ ६५ ॥

एवमन्यत्र वेदान्ते भेदगन्धोऽपि नेष्यते॥
ऐक्ये षड्विधतात्पर्यलिङ्गसद्भावतः श्रुतेः॥
॥६६॥ब्रह्म वा इदमित्याद्यारण्यकस्थगिरा-
मपि॥ऐक्ये प्रमापकत्वं ता न भेदं लवतोऽ-
ब्रुवन्॥६७॥ स यश्चायं नरे यश्चासावादि-
त्ये स एककः॥इति गीरैक्यमेवाहोपाधि-
भेदनिवारणात्॥६८॥स योह परमं ब्रह्म वे-
देत्यादि तु मुण्डके॥ब्रह्मैक्यपरमेवेति वाक्यं
भेदभ्रमापहं॥६९॥ परात्परमुपैतीति ब्रह्म-
प्राप्तिपरं वचः॥अविद्याभ्रान्तिबाधात्स्या-
दैक्यज्ञाने न सा गतिः॥७०॥ सर्व एकी-
भवन्तीत्येतदप्यैक्यप्रमापकम्॥अज्ञान-
हेतुकानेकभावं ध्वस्तैकतां गतः॥७१॥
अतोऽन्यदार्तं नेतीति जडवर्गनिषेधतः॥
ब्रह्मात्मैक्यं प्रमेयोऽत्र सर्ववेदान्तसंग्रहे॥
॥७२॥अन्तर्याम्यमृतो ह्येष त आत्मेत्यैक्य-

तत्परम्॥एतोऽन्यदार्तमित्यत्र दृश्यमि-
थ्यात्वबोधनात्॥७३॥ द्वितीयाद्भयमित्य-
त्र भेदस्याभयहेतुताम्॥वहन्ती निन्दया
त्वैक्यं प्रमेयं वदति श्रुतिः॥७४॥ यत्मद-
न्यन्न चास्तीह तत्कस्मान्नु बिभेम्यहम्
॥द्वैतस्य भयहेतुत्वं स्पष्टमाह श्रुतिः स्व-
यम्॥७५॥उदरमन्तरं कुर्वन्भयं याती-
ति वेदगीः॥भेदस्य निन्दनादैक्ये प्रामा-
ण्यं भजते स्फुटं॥७६॥सर्वभूतेषु गूढोऽ-
यं देव एक इति श्रुतिः॥केवले निर्गुणे शु-
द्धे मानमद्वैतवस्तुनि॥७७॥एक एव हि
भूतात्मा भूते भूते व्यवस्थितः॥एकधा
बहुधा चैव दृश्यते जलचन्द्रवत्॥७८॥
यावन्मोहं तु भेदः स्याज्जीवस्य च परस्य
च॥ततः परं न भेदोऽस्ति भेदहेतोरभा-
वतः॥७९॥विभेदजनकेऽज्ञाने नाशमा-

त्यन्तिकं गते ॥ आत्मनो ब्रह्मणो भेदमस-
न्तं कः करिष्यति ॥ ८० ॥ क्षेत्रज्ञं चापि मां
विद्धि सर्वक्षेत्रेषु भारत ॥ एवं श्रुतिस्मृती-
नां स्युर्गिरो मानं सहस्रशः ॥ ८१ ॥ तत्त्व-
तो नैव भिद्यन्ते जीवास्ते परमात्मनः ॥
परमात्मवदेवैते आत्मत्वादिति माऽनु-
मा ॥ ८२ ॥ यद्वा स्वव्यवहारे स्वभिन्नज्ञाना-
नपेक्षता ॥ हेतुरस्त्वथवा तत्राबाध्यत्त्वं
ज्ञातृताऽथवा ॥ ८३ ॥ पारमार्थिकभेदस्य
सर्वत्रासम्भवादपि ॥ जडे न व्यभिचारोऽस्ति
तात्त्विकाभेदसाधने ॥ ८४ ॥ भेदो मिथ्या-
ऽस्ति भेदत्वादेकस्यां दृशि कल्पितः ॥
दृश्यत्वादिति हेतोर्वा चन्द्रभेदवदेव
सः ॥ ८५ ॥ मिथ्याऽस्ति भेदधीर्भेदधी-
त्वाच्चन्द्रभिदेव धीः ॥ इत्यादीन्यनुमा-
नानि भेदमिथ्यात्वसाधने ॥ ८६ ॥ पादो-

ऽस्येति श्रुतौ तद्वन्ममैवान्शा इति स्मृतौ
॥अंशत्वोक्त्याऽनयोरैक्यं घटाकाशादि-
साम्यतः ॥८७॥ निरंशेऽप्यंशतारोपो
भवेदौपाधिकस्ततः ॥ महत्वं कुम्भखं
यद्वदन्यथा नांशतेष्यते ॥८८॥ तथा ब्रह्मा-
त्मनोरैक्यं स्याद्बिम्बप्रतिबिम्बवत् ॥ प्रा-
पाताद्भेदभानेऽपि सद्युक्त्यद्वयश्रुतोऽभि-
दा ॥८९॥ यत्स्वलक्षणकं वक्त्रं दृष्टं ग्री-
वास्थमुज्ज्वलं ॥ दर्पणस्थं तथेदं तदे-
वेति मुखमस्ति मे ॥९०॥ तद्दृष्टान्तेन
तत्वैक्यं लक्षणैक्यात्प्रतीयते ॥ प्रतिबि-
म्बत्वसद्भावे निर्णीता युक्तयो बुधैः ॥९१॥
अज्ञाद्युपाधिनाऽनादिजीवस्यानादिसं-
सृतिः ॥ तत्वज्ञानेन तद्बाधाज्जीवो ब्रह्मै-
व सिद्ध्यति ॥९२॥ तदेवं प्रतिबिम्बस्य
बिम्बेनैक्ये व्यवस्थिते ॥ ब्रह्मैक्यं जीव-

जातस्य सिद्धं तत्प्रतिबिम्बनात् ॥ ८३॥
नित्यः सर्वगतो ह्येष महानज इति श्रुतेः
॥व्यापकत्वमसिद्धश्च नाणुर्जीव इति
स्थितं ॥ ८४ ॥ एषोऽणुरिति वेदान्तो
दुर्विज्ञे[redacted]यात्मतत्परः ॥ उत्क्रान्त्यादि-
र्धियो धर्मस्तत्सत्त्वे तस्य सम्भवः ॥ ८५॥
आत्मन्यारोपिता बुद्धिस्तद्धर्मा न तु शु-
द्धगाः ॥ उत्क्रान्त्याद्याः सुखाद्याश्च या-
वन्मोहं भवन्ति ते ॥ ८६ ॥ तत्त्वसाक्षा-
त्कृतौ बुद्ध्याद्युपाधिविलये सति ॥
उत्क्रान्त्याद्याः सुखाद्याश्च शुद्धे सन्ति
न कर्हिचित् ॥ ८७ ॥ येनाऽऽत्मनापि
यद्बुद्ध्यवच्छिन्नेन न [redacted] कर्म यत्॥
कृतं तेनैव तद्बुद्ध्यवच्छिन्नेनैव भोजनं
॥ ८८ ॥ एवं न कृतहान्याद्यापत्तिरस्ति
मनागपि ॥ जीवोऽस्तु प्रतिबिम्बो वाऽ-

च्छिन्नो वा तदेव वा ॥९९॥ बुद्ध्याद्युपाधिसम्बन्धादेव संसृतिभागयं ॥ तत्वज्ञानेन तद्बाधे विशुद्धो नित्यमोक्षभाक् ॥१००॥ नाणुर्न मध्यमो जीवो न विभुस्तार्किकेष्टतः ॥ जीवो ब्रह्मैव वेदान्तसिद्धान्त इति निर्णयात् ॥१॥ अद्वैतसिद्धिपरिशीलनतो मयाऽऽत्मतत्वे धियः परिचयाय परिश्रमो यः ॥ सम्यक् कृतो यदि भवेदथ वाऽन्यथाऽसौ श्रीकृष्णपादकमलेऽर्पित एव भूयात्॥२॥ इति अद्वैतसिद्धिसिद्धान्तसारसंग्रहे द्वितीयः परिच्छेदः ॥२॥ ॥



॥ श्री ॥

॥ अद्वैतसिद्धिसिद्धान्तसारसङ्ग्रहे ॥

॥ तृतीयः परिच्छेदः प्रारभ्यते ॥

श्रवणादिपरा नित्यं यं चिदानन्दमद्वयम्
॥ साक्षात्कृत्य कृतार्थाः स्युस्तं सदा नौमि
केशवम् ॥ १ ॥ एवं व्यवस्थिते ब्रह्मतत्त्वैका-
त्म्ये प्रमाणतः ॥ तत्साक्षात्कारसिद्ध्यर्थं
श्रवणादि विविच्यते ॥ २ ॥ श्रवणं मननं
ध्यानमनुष्ठेयतया श्रुतम् ॥ त्रितयं श्र-
वणं तत्र प्राधान्यादङ्गितां भजेत् ॥ ३ ॥
तदङ्गित्वं प्रमाणस्य प्रमेयावगमं प्रति ॥ सि-
द्ध्यत्यव्यवधानेन तदङ्गत्वं तयोर्द्वयोः ॥ ४ ॥
चित्तस्यैकाग्रताद्वारा संशयादिनिरासतः
॥ प्रत्यक्प्रावण्यहेतुत्वं भजेतां ध्यानचि-
न्तने ॥ ५ ॥ विचारः शब्दशक्त्यैकतात्पर्य-
स्यावधारणम् ॥ निर्णीतशक्तितात्पर्यवा-

त्वशब्दः करणं मतः ॥६॥ विचारस्याऽपि
करणे प्रवेशेनाङ्गिता मता ॥ नाकाङ्क्षा-
दिप्रविष्टं स्यादन्यथा करणे ध्रुवम् ॥७॥
तस्माद्द्रष्टव्य इत्यत्र दर्शने सन्निधानतः ॥
श्रोतव्य इति साक्षात्स्यादङ्गित्वं श्रवणेऽ-
न्वयात् ॥८॥ शब्दातिशयहेतुत्वा[redacted]-
च्छ्रवणस्याङ्गितेष्यते ॥ चिन्तातिशयहेतु-
त्वात्तयोरङ्गत्वमीरितम् ॥९॥ फलाद्यु-
क्त्यनुसन्धानं चित्तस्यैकाग्र्यकारणम् ॥
विपरीतनिवृत्त्या स्याद्ध्यानमैकाग्र्यका-
रणम् ॥१०॥ नियमः श्रवणे ज्ञानसाधने
विधिरिष्यते ॥ नापूर्वादिविधिस्तत्र सि-
द्धोपायोऽन्वयादिना ॥११॥ गान्धर्वशास्त्रे-
षड्जादिसाक्षात्कारैकहेतुना ॥ विचारस्य
यतो दृष्टा ततो नापूर्व इष्यते ॥१२॥ प्र-
परोक्षेऽपि षड्जादौ विचार्यत्वं यथेक्ष्यते ॥

तथैवाऽऽत्माऽपरोक्षोऽपि विचार्यत्वं व्र-
जेच्छ्रुतौ॥१३॥ सर्वत्रापि विचार्यत्व-
सन्दिग्धत्वफलित्वयोः॥ प्रयोजकत्वं
तत्सत्वं ब्रह्मात्मैक्यविचारणे॥१४॥ नि-
र्विशेषेऽन्यतोऽप्राप्तावपि मानान्तराद्विभो॥
सामान्यतस्तथाप्यस्ति प्राप्तिरात्मनि
चिद्घने॥१५॥ व्रीहीनित्यत्र शास्त्रैकग-
म्यापूर्वीययोगिषु॥ अन्यतो दलनादेश्चा-
प्राप्तावप्युच्यते तथा॥१६॥ व्रीहिमात्रस-
माकारस्तत्र यद्वत्तथाऽस्त्विह॥ विष-
यज्ञानमात्रैकसमानाकारसम्भवः॥१७॥
यद्वा स्मृतिपुराणादिप्राप्त्या पक्षेऽस्त्य-
सम्भवः॥ वेदान्तश्रवणादीनां पूर्त्यै नियम
इष्यते॥१८॥ अस्ति वेदान्ततात्पर्यनिर्ण-
याय स्मृतेरपि॥ अपेक्षा तद्विचारस्य पुं-
दोषक्षयकारिता॥१९॥ तथापि ब्रह्मतत्वे-

क्यज्ञानवेदान्तमानते ॥ नापेक्षाऽस्ति पुराणा-
देः श्रुतेः स्वातन्त्र्यमत्र हि ॥ २० ॥ नियमादृ-
ष्टसाध्यस्य व्यावर्त्यस्यापि सम्भवात् ॥
श्रवणादेर्नियमनं सर्वथैवोपपद्यते ॥ २१ ॥
श्रवणं शक्तितात्पर्यावधारणमिहेष्यते ॥
शुद्धे यद्यपि तत्त्वैक्ये शक्त्यसम्भव आत्म-
नि ॥ २२ ॥ विशिष्टशक्तेस्तद्बोधोपयोगिन्या-
स्तु सम्भवात् ॥ अवधारणयोग्यायाः नैवा-
तः शक्त्यसम्भवः ॥ २३ ॥ तात्पर्यस्यापि
सन्देहधर्मिणो निश्चितत्वतः ॥ तत्रासम्भ-
वसत्त्वेऽपि विचारो न निरर्थकः ॥ २४ ॥ नि-
र्विशेषेपि सन्देहसम्भवेन विचारणा ॥
साफल्यं प्राप्नुयात्तत्त्वज्ञानसिद्ध्युपका-
रिका ॥ २५ ॥ नचावधारणस्यापि ज्ञानत्वं
तर्करूपतः ॥ यतो ज्ञानविजातीयचेतोवृ-
त्यन्तरं हि तत् ॥ २६ ॥ श्रवणादिक्रिया-

तावत्कर्तव्येह प्रयत्नतः॥ श्रवणादौ क्रिया-
शब्दो वार्त्तिके दृश्यते ततः॥ २७॥ तथैव
मननध्याने विधेयत्वेन दृश्यतां॥ मनो-
व्यापाररूपाणां त्रयाणां स्याद्विधेयता॥
॥२८॥ जिज्ञासासूत्रमूलं स्याद्वेदान्तश्र-
वणे विधिः॥ गृहीतवेदपुंसोऽस्ति ज्ञान-
मापाततो यतः॥ २९॥ नात्रान्योन्याश्रया-
पातोप्यधिकारिविशेषणे॥ समानविषय-
त्वेऽपि तयोः स्यान्मूलमूलिता॥ ३०॥
श्रवणाक्षिप्ततात्पर्यग्राहकं लिङ्गमागमे॥
तदादाय तयोस्तुल्यविषयत्वस्य सम्भ-
वः॥ ३१॥ मननं तु श्रुतार्थस्य युक्तिभिश्चि-
न्तनं मतं॥ प्रङ्गित्वं श्रवणस्यैव तात्पर्य-
स्यावधारणात्॥ ३२॥ समन्वयाविरो-
धोक्तयुक्तिचिन्तनमेव वा॥ श्रवणं मन-
नं चैव क्रमेणास्तु श्रुतीप्सितं॥ ३३॥

समन्वयविचारस्याभ्यर्हितत्वान्नदिष्य-
ते॥ विचारविधिमूलत्वं मननस्य तु नै-
व तत्॥३४॥ तदेवं श्रवणं लिङ्गं विचा-
राधीनमागमे॥ जिज्ञासासूत्रमूलत्वात्स्या-
त्तात्पर्यावधारणं॥३५॥ भामत्यां तु वि-
चारैकाक्षेपकत्वं विधेरपि॥ अर्थावगम-
पर्यन्ततया स्वाध्याय इष्यते॥३६॥
काण्डद्वये ततः कोपि न विधिः श्रवणा-
दिषु॥ अन्वयव्यतिरेकाभ्यां तेषां ज्ञानेऽ-
स्ति हेतुता॥३७॥ अर्थज्ञानार्थकत्वेप्य-
ध्ययने फलतो जगुः॥ नित्यत्वं केचि-
दन्ये तु दृष्टादृष्टफलं जगुः॥३८॥ आ-
पातदर्शनं तत्र श्रवणेन विनेष्यते॥ विशे-
षात्तदनादृत्याप्राप्तसाधनसिद्धये॥३९॥
विधिः स्यान्निर्गुणैकात्म्यज्ञाने नास्ति कथं
चन॥ सूक्ष्मार्थगोचरं ध्यानं तत्साक्षात्का-

रकारणं ॥४०॥ दृष्टं तत्राप्यपूर्वत्वाभावा-
न्न विधिरिष्यते ॥ तत्र स श्रूयमाणोऽपि
कुण्ठी भावं भजेद्विधिः ॥४१॥ कृतिसाध्य-
त्वरूपस्य स्वर्गादाविव तद्विधेः ॥ प्रयो-
जकस्य तज्ज्ञानेऽभावादेव न तद्विधिः
॥४२॥ न बुभुत्साप्रयत्नाभ्यां ज्ञानं सा-
ध्यतया मतं ॥ ताभ्यां विषयवैमुख्यमे-
व साध्यतया मतं ॥४३॥ ज्ञानसाधनमात्रे
तदन्वयादेरुपक्षयात् ॥ न ज्ञाने कृतिसा-
ध्यत्वं वक्तुं शक्यं कथं चन ॥४४॥
ज्ञानं वस्तुप्रमायत्तं पुन्तन्त्रं ज्ञानसाधन-
म् ॥ ज्ञाने दृष्टो विधिर्ज्ञानसाधने स नि-
यम्यते ॥४५॥ तदेवं श्रवणस्याऽपि ज्ञा-
नत्वेन विधेयता ॥ तस्माज्ज्ञानविजाती-
यं श्रवणं ज्ञानसाधनम् ॥४६॥ परो-
क्षधियो हेताविति कर्तव्यतात्मकम् ॥

विचाररूपं तत्रैव विधिर्निर्दोष इष्यते
॥४७॥ तदङ्गत्वेन मनन ध्याने तत्त्वा-
वबोधने ॥ विधीयेते ततस्तत्त्वसाक्षात्का-
रफलावधी ॥४८॥ प्रमाणमिह तद्भास्य-
विजज्ञौ तमसः परम् ॥ पारं दर्शयतीत्या-
दिः शब्दात्साक्षात्कृतौ श्रुतिः ॥४९॥
सफलं तत्त्वविज्ञानमुपदेशेन सि[redacted]ध्य-
ति ॥ इत्युक्तं श्रुतिवाक्येऽस्मिंस्तथाऽन्य-
त्रापि तच्छ्रुतम् ॥५०॥ [redacted]-
[redacted] वाक्यं वेदान्तविज्ञाननिश्चितार्था
इति श्रुतौ ॥ सुशब्देनापरोक्षोक्तिः विशा-
ब्दाद्दार्ढ्यमीरितम् ॥५१॥ शब्दादेवाप-
रोक्षत्वे सिद्धे तत्र न बाधकम् ॥ उपदेशा-
तिरिक्तस्य न हेतुत्वं श्रुतौ श्रुतम् ॥५२॥
मानसैवानुद्रष्टव्यमित्यैकाग्र्यपरं धि-
यः ॥ साक्षात्कारैकहेतुत्वं सिद्धं शब्दस्य

वेदत: ॥५३॥ तत्त्वमस्यादिगीर्जन्य-
ज्ञानवृत्त्यपरोक्षता ॥ अपरोक्षगतात्यन्ता-
मावस्याप्रतियोगिनी ॥५४॥ ज्ञानत्व-
वदिति प्रोक्तं मानमत्रानुमानकं ॥ तत्त्व-
मस्यादिवाक्यस्यापरोक्षज्ञानहेतुता ॥
॥५५॥ न स्याच्चेदपरोक्षस्य निवृत्तिर्नि
भ्रमस्य च ॥ न प्रमाकरणत्वेन मन:
क्लृप्तं हि कुत्रचित् ॥५६॥ दशमस्त्व-
मसीत्यादौ शब्दाद्दृष्टाऽपरोक्षधी: ॥
दशमोऽस्मीति विज्ञानं स्यादन्धस्य
तमस्यपि ॥५७॥ यं शाब्दं बोधमादा-
य यस्य बोद्धृत्वमीक्ष्यते ॥ तत्साक्षा-
त्त्वमभिन्नार्थावगाहित्वनिमित्तकं ॥
॥५८॥ बोद्ध्रभिन्नार्थकाच्छब्दाद्भिन्नत्वे
सति तन्नता ॥ प्रत्यक्षैकान्तभावस्या-
ध्यक्षधीकरणत्वगा ॥५९॥ तत्त्वोप-

निषदश्रुत्या प्रमाणं तद्धितश्रुतिः ॥ भवे-
तदन्यासाध्यत्वे सति तत्साध्यभावतः
॥६०॥ यन्मनसा न मनुते इति श्रुत्या
निषिध्यते ॥ मनसः करणत्वं तच्चश्रुति-
रन्यपरा ततः ॥६१॥ यतो वाचो निवर्त्त-
न्ते इति शक्त्या न बोध्यते ॥ शब्देन
ब्रह्म तन्त्वौपनिषदश्रुतिमानतः ॥६२॥
तस्मात्तत्त्वमसीत्यस्यापरोक्षज्ञानहेतु-
ता ॥ सिद्धा युक्त्यन्वितश्रुत्या शब्दस्य-
करणत्वतः ॥६३॥ अविद्यादिनिवृत्त्या-
त्समोक्षहेतुरखण्डधीः ॥ तत्सिद्धौ मनना-
द्यङ्गसंयुतं श्रवणं श्रुतेः ॥६४॥ अङ्गि स्या-
तत्र निर्णीतो नियमो विधिरादरात् ॥ त-
त्त्वमस्यादिजज्ञानमविद्याध्वस्तिकार-
णम् ॥ जायते यत्कृपालेशात्तं नमामि
रमापतिम् ॥६५॥ इति सिद्धान्तसारे श्री-

सदानन्दविदा कृते ॥ श्रवणादिविचारोऽयं तृतीयः पूर्णतां गतः ॥ ९९ ॥ इति श्रीअद्वैतसिद्धिसिद्धान्तसारसङ्ग्रहे तृतीयः परिच्छेदः

॥ श्रीः ॥

॥ श्रीअद्वैतसिद्धिसिद्धान्तसारसङ्ग्रहे ॥

॥ चतुर्थः परिच्छेदः प्रारभ्यते ॥

यमाराध्यपरं तत्त्वमविद्याबन्धतो जनः ॥ अनायासेन मुक्तः स्यात्तं नमामि रमापतिं ॥ १ ॥ वाक्यजा चरमा वृत्तिस्तया वृत्त्योपलक्षितः ॥ आत्मैवाज्ञानहानिः स्याद्विकल्पस्तत्र नेष्यते ॥ २ ॥ तत्रोपलक्षणस्यैव साध्यत्वेनास्ति साध्यता ॥ नचोपलक्षणध्वस्त्या ध्वस्तिर्मुक्तेरपीष्यते ॥ ३ ॥ पाके निवृत्ते नो दृष्टा निवृत्तिः पाचकस्य वा ॥ तदुक्तं शास्त्रसिद्धान्तरहस्यतत्त्ववेदिभिः ॥

॥ ४ ॥ निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोप-
लक्षितः ॥ उपलक्षणनाशेऽपि स्यान्मुक्तिः
पाचकादिवत् ॥ ५ ॥ ज्ञानात्पूर्वमसिद्धस्या-
प्युपलक्षणता न हि ॥ पाकसम्बन्धतः पूर्वं
पाचकोऽस्तीति नोच्यते ॥ ६ ॥ उपलक्ष्य-
स्वरूपस्यासाध्यत्वेऽप्युपलक्षणे ॥ साध्य-
त्वेनैव साध्यत्वमुपलक्षितवस्तुनः ॥ ७ ॥
यद्वाऽविद्यानिवृत्तिः स्याद् वृत्तिरेतद्विरो-
धिनी ॥ यावत्कार्यजनेर्वैरिकार्यं ध्वंस
इतीष्यते ॥ ८ ॥ पाश्चात्यवृत्तिपर्यन्तविरो-
ध्यात्मकमेव यत् ॥ कार्यं तद्रूपभावेऽपि
ध्वंसस्याधाररूपता ॥ ९ ॥ नेति नेतीति
वेदान्तस्वारस्यादात्मनः पृथक् ॥ निवृत्ति-
स्तात्त्विकी का चिन्नास्तीत्येव विदां म-
तं ॥ १० ॥ मोक्षानुस्यूतरूपस्य सुखज्ञप्त्ये-
करूपिणः ॥ आत्मनः पुरुषार्थत्वेऽप्यसाध्य-

त्वमपीति चेत्॥ ११॥ प्राप्तप्राप्त्यैकरूपत्वा-
त्फलस्यानन्दमानतः॥ असाध्यत्वेपि सा-
ध्यत्वं कण्ठस्थस्येव सन्मणेः॥१२॥
तस्मादज्ञानहानिः स्यादात्मरूपं तदाकृतिः॥
वृत्तिर्वा नात्र दोषोपि शङ्क्यः सिद्धमिति
स्फुटं॥१३॥ व्युत्पत्त्यै मन्दबुद्धीनां पक्षाः
संदर्शिता बुधैः॥ ये पञ्चमप्रकाराद्या न
यते तत्समर्थने॥१४॥ स्वज्योतिषाऽप्य-
बाध्यत्वेऽविद्याया बाधकं मतं॥ वेदा-
न्तजन्यपाश्चात्यवृत्त्यारूढं चिदद्वयं॥
॥१५॥ वृत्त्युपारूढचैतन्यं वृत्तिर्वा चि-
त्फलान्विता॥ निवर्तिकास्त्वविद्याया
दोषोनास्ति मतद्वये॥१६॥ असत्या अपि
धीवृत्तेः सत्योत्पादकतेष्यते॥ अभावस्य
यथा भावोत्पादकत्वं भवन्मते॥१७॥
प्रातिभासिकवस्त्वेव व्यावहारिकसौख्य-

कृत॥दृष्टं तद्वदिहाप्यस्तु न हि दृष्टेऽ-
स्त्यसम्भवः॥१८॥मायोपादानकस्यापि
तत्त्वज्ञानस्य वस्तुतः॥तन्निवर्तकता
श्रोती महत्प्रामाण्यमश्नुते॥१९॥धीवृ-
त्तिस्थचित्तो मायाविनिवर्तकतया यदि॥
तदा शङ्का न काऽप्यस्ति तदुक्तं ब्रह्मविद्व-
रैः॥२०॥तृणादेर्भासिकाप्येषा सूर्यदी-
प्तिस्तृणं दहेत॥सूर्यकान्तमुपारुह्य तं
न्यायं चिति योजयेत॥२१॥जडत्वाच्चषु-
द्धधीवृत्तेर्भासकत्वाच्चितस्तथा॥माया-
ऽनिवर्तकत्वेपि विशिष्टेऽतोस्य सम्भ-
वः॥२२॥शुद्धस्याऽविषयत्वेऽप्युपहितो
विषयो भवेत॥उपाधेर्विषयत्वस्याभा-
वान्न भ्रमता धियः॥२३॥भ्रन्त्यज्ञानस्य
नाशोऽपि स्वोपादानान्ध्यनाशतः॥
पटनाशो यथा तन्तुनाशान्नान्यदपेक्षते

॥२४॥ वृत्तित्वान्मोहविध्वस्तेर्न निवर्तक-
खण्डनम् ॥ तन्निवृत्तेश्चिदात्मत्वान्न तज्ज-
नकखण्डनम् ॥२५॥ पुमर्थत्वं सुखे साक्षा-
त्क्रियमाणतया मतम् ॥ गौरवान्न स्वकी-
यत्वप्रयुक्तं मोक्षशब्दितम् ॥२६॥ अवि-
द्यास्तमयो मोक्षो नित्यानन्दप्रतीतितः॥
निःशेषदुःखोच्छेदाच्च पुरुषार्थः परो म-
तः ॥२७॥ अहमर्थगतस्यैव चिदंशस्या-
त्मनो विभोः॥ मोक्षकालान्वयित्वेन पु-
मर्थो मोक्ष इष्यते ॥२८॥ दुःखाभावाति-
रेकेपि सुखस्यात्मैकरूपता ॥ सुखप्रका-
शयोरेकाद्वयब्रह्मस्वरूपता ॥२९॥ जा-
ड्यदुःखात्मतारूपव्यावर्त्यभिदयाऽन-
योः ॥ सुखप्रकाशयोः सिद्धेस्तप्रयोगो यु-
गपत्सह ॥३०॥ दुःखस्य कल्पितत्वेन
तच्छेदः किं न कल्पितः ॥ तत्तुल्ययोगक्षे-

मत्वादवस्तुत्वान्न मे क्षतिः॥३०॥ दुःखा-
भावस्य चिद्रूपानतिरेकेण वस्तुतः॥ आ-
त्माभिन्नसुखस्फूर्त्यै वाऽस्यापि स्फुरणं
भवेत्॥३१॥ तस्माच्चित्स्वप्रकाशात्माभि-
न्नं सुखमखण्डितम्॥ पुमर्थोऽस्त्यहमर्था-
त्मचिदंशस्यैव सम्मतः॥३२॥ तच्चापि
जीवन्मुक्तानां सिद्धं स्वानुभवेन हि॥ त-
त्वज्ञानेन विध्वस्ताविद्यो जीवद्विमुक्ति-
भाक्॥३३॥ अविद्यायां विनष्टायामपि
प्रारब्धकर्मणा॥ देहादिप्रतिभासोऽनु-
वृत्त्या स्याद्बाधितस्य च॥३४॥ निवृ-
त्तसर्पविभ्रान्तेर्भयकम्पानुवृत्तिवत्॥
दण्डसंयोगनाशेऽपि चक्रस्य भ्रमणं य-
था॥३५॥ विनिःसारितपुष्पेऽपि सम्पु-
टे पुष्पवासना॥ दृश्यते नियमो नातः
क्रियाज्ञानैकसंस्कृतेः॥३६॥ नाशः

संस्कारसंव्याप्तो नाशात्वाज्ज्ञाननाश-
वत्॥ संस्कारनाशान्यत्वे सत्येवं स्या-
दनुमा प्रमा॥३७॥ संस्कारः कार्यरू-
पोऽपि निरुपादानको मतः॥ ध्वंसवत्सो-
ऽप्यविद्येव शुद्धात्माश्रित एव हि॥३८॥
प्रविनश्यदवस्थस्य समवायिनमन्त-
रा॥ दृष्ट्वा स्थितिं न तत्सिद्धौ स्याद-
ज्ञानानुवर्त्तनम्॥३९॥ बहुकालाल्पका-
लादिगणनाया न हेतुता॥ यत्र यद्य-
था दृष्टं तत्तथेत्यवगम्यताम्॥४०॥
जीवन्मुक्तिदशायां स्वानन्दस्फूर्तिरभी-
ष्टभाक्॥ तत्त्वे ज्ञातेऽनुवृत्तेस्तु बाधि-
तस्यापि सम्भवात्॥४१॥ द्विचन्द्रा-
दिभ्रमे यद्वद्दोषादेवानुवर्तनम्॥ प्रति-
बन्धकसत्वेन तथाऽत्राप्यनुवर्तनम्
॥४२॥ ज्ञानानिवर्त्यदोषस्य प्रारब्धा-

स्यस्य कर्मणः॥अत्रापि सम्भवाज्जी-
वन्मुक्तिः सिद्ध्यति तद्विदः॥४३॥ य-
द्वाऽस्त्वविद्यालेशानुवृत्त्या देहादिक-
स्थितिः॥आकारस्यैव वेदान्ते लेशशा-
ब्दार्थता मता॥४४॥ इन्द्रो मायाभि-
रीयेत पुरुरूप इति श्रुतेः॥अनेकाका-
रता बुद्धाऽविद्यायास्तत्र येष्यते॥४५॥
स्यादाकारिनिवृत्तावप्याकारस्यानु-
वर्तनम्॥ यथा व्यक्तिनिवृत्तौ स्या-
ज्जातेरप्यनुवर्त्तनम्॥४६॥ अनेकश-
क्तिकाविद्या तत्त्विकत्वभ्रमावहा॥
प्रपञ्चे तत्त्वबोधेन सा निवृत्ता यदा
भवेत्॥४७॥ अर्थक्रियासमर्थत्व-
सम्पादनकरीह या॥ प्रारब्धसमका-
लेन तत्त्वज्ञानेन नाशिता॥४८॥
अपरोक्षभ्रमाभासयोग्यार्थाभासदा-

यिनी॥ साऽनुवृत्ताऽस्ति तच्छक्त्या-
नोक्तदोषोऽवकाशभाक्॥४९॥ त-
च्छक्तिनाशमात्रेण मुक्तोऽयं व्यप-
दिश्यते॥ अतोऽन्ते सर्वशक्त्याढ्या
सर्वाविद्या निवर्तते॥५०॥ भूयश्चान्ते
विश्वमायानिवृत्तिरिति च श्रुतेः॥
अतो लेशानुवृत्तेः स्याज्जीवन्मुक्ति-
प्रसाधनं॥५१॥ यद्वाऽज्ञानस्य या सू-
क्ष्मावस्था सा लेशशब्दिता॥ तन्नाशेपि
न सा नष्टा ततो देहादिकस्थितिः॥५२॥
यागे गतेपि यागस्य सूक्ष्मापूर्वं यथे-
ष्यते॥ तथाऽज्ञाने गते सूक्ष्मा देहाद्या-
भाससाधिका॥५३॥ तस्मात्फले
प्रवृत्तस्य यागादेः शक्तिमात्रकं॥उ-
त्पत्तौ वापि पश्वादेरपूर्वं न ततः पृथक्
॥५४॥ आहवार्त्तिकरीत्येत्थं निर्वाह-

समतोभयोः॥ स्वर्गश्रुतेरिवात्रापि जी-
वन्मुक्तिश्रुतेर्गतिः॥५५॥ तावदेव चिरं
ह्यस्येत्येवं श्रुत्याऽऽत्मवेदिनः॥ प्रारब्ध-
क्षयतो नान्यत्किञ्चिन्मुक्त्याऽपेक्ष्य-
ते॥५६॥ भक्तिजेशप्रसादस्य तत्त्वज्ञा-
नोपयोगिता॥ यमेवैष इति श्रौतवा-
क्यानुसरणं स्मृतेः॥५७॥ न मुक्तेस्ता-
रतम्यं वा सर्वत्रैक्यस्वरूपतः॥ उपैति-
परमं साम्य मित्यैक्ये परसाम्यभाक्
॥५८॥ तारतम्यविनिर्मुक्तं पदं कैव-
ल्यमिष्यते॥ यत्र स्यात्तारतम्यं सा-
ऽवान्तरा मुक्तिरीरिता॥५९॥ मुक्त-
स्य ब्रह्मरूपत्वान्न जीवत्वमुपाधिना॥
तत्त्वज्ञानेन चाज्ञाने नष्टे नासावुपाधि-
भाक्॥६०॥ मानुषानन्दमारभ्य ब्रह्मा-
नन्दान्तवर्णने॥ तारतम्यस्य विश्रा-


न्तः स्वरूपानन्द एव हि ॥६१॥ अवि-
द्याध्वस्तिरप्येका तारतम्यविवर्जिता॥
आनन्दस्य स्वरूपत्वान्न गुणत्वादिक-
ल्पना ॥६२॥ सुखे वैषयिके यद्वि साध-
नैस्तारतम्यतः॥ तारतम्यं न तद्ब्रह्मस्व-
रूपानन्द इष्यते ॥६३॥ ब्रह्मवित्परमा-
प्नोतीत्यवाप्तेर्ब्रह्मरूपता॥ यथा तथैव
ताद्रूप्यं सायुज्यस्यापि सम्मतं॥६४॥
सायुज्यस्य विभक्तत्वाभाव एव नि-
रोदितः॥ नवा सम्बन्धमात्रार्थः सा-
युज्यमिति शब्दतः॥६५॥ श्रोत्रियस्ये-
ति वाक्येषु सर्वेष्वानन्दवर्णने॥ अका-
महतमुक्तस्यैकत्वेपि सुखमद्वयं॥
॥६६॥ अन्तर्भावात्तदानन्दे सर्वानन्द-
स्य तद्धिया॥ अतो मुक्तिसुखं सर्वता-
रतम्यविवर्जितं॥६७॥ न मुक्तिः क-

र्मणा साध्या न ज्ञानादिसमुच्चयात्॥
मुक्तेरनित्यतापत्तेस्तत्त्वज्ञानेन सा स्व-
यं ॥६८॥ ज्ञानादेव भवेन्मुक्तिर्नान्यः
पन्था इति श्रुतेः॥ अज्ञानकृतसंसारब-
न्धो ज्ञानेन बाध्यते ॥६९॥ मुक्तेर्भ-
क्तिर्गरीयस्त्वं साधनातिशयस्तुतेः
॥ किं पुनर्ब्राह्मणा इत्थं कैमुत्येन तथेष्य-
ते॥७०॥ ददामि बुद्धियोगं तमित्यत्रा-
ऽपि स्वयं हरिः॥ फलं भक्तेः परं ज्ञा-
नं प्राहाज्ञाननिवृत्तये॥७१॥ तस्मात्स्व-
रूपानन्दस्य स्वप्रकाशात्मरूपिणः॥
प्राप्तिर्मुक्तिर्न तत्राऽस्ति तारतम्यं क-
थंचन ॥७२॥ अद्वैतसिद्धिसिद्धान्तसा-
रोऽयं हरिपादयोः॥ सेवायै कृतस्नान-
न्दप्रदोऽस्तु सुविचारिणाम्॥७३॥
सदानन्दविदा कृष्णपादपद्मरसाशि-

न्या॥ कृतोऽयं सुहृदां भूयात्सदानन्द-
पदप्रदः॥ ७४॥ इति श्रीअद्वैतसिद्धिसि-
द्धान्तसारसङ्ग्रहे चतुर्थपरिच्छेदः स-
माप्तः॥

॥इति समाप्तश्चायं ग्रंथः॥

॥ ॐ तत्सत्॥



श्रीमन्निखिलाऽद्वैतसिद्धान्तपदाधि रू-
ढानां निजप्रतापमहिम्ना प्रसह्य प्रज्ञानि-
हृदयेषु ज्ञानदीपं प्रज्वालयतां अनुद्धता
कारतयान्तःकरणवृत्या जगति प्रकाशं
तन्वतां तृणीकृतवैभवखण्डलानां दर्शना-
देव प्रत्यूहपुञ्जं दहतां श्रीमदपरोशंकरा-

समतोभयोः॥ स्वर्गश्रुतेरिवात्रापि जी-
वन्मुक्तिश्रुतेर्गतिः॥५५॥ तावदेव चिरं
ह्यस्येत्येवं श्रुत्याऽऽत्मवेदिनः॥ प्रारब्ध-
क्षयतो नान्यत्किञ्चिन्मुक्त्या ह्यपेक्ष्य-
ते॥५६॥ भक्तिजेशप्रसादस्य तत्त्वज्ञा-
नोपयोगिता॥ यमेवैष इति श्रौतवा-
क्यानुसरणं स्मृतेः॥५७॥ न मुक्तेस्ता-
रतम्यं वा सर्वत्रैक्यस्वरूपतः॥ उपैति
परमं साम्य मित्यैक्ये परसाम्यभाक्
॥५८॥ तारतम्यविनिर्मुक्तं पदं कैव-
ल्यमिष्यते॥ यत्र स्यात्तारतम्यं सा-
ऽवान्तरा मुक्तिरीरिता॥५९॥ मुक्त-
स्य ब्रह्मरूपत्वान्न जीवत्वमुपाधिना॥
तत्त्वज्ञानेन चाज्ञाने नष्टे नासावुपाधि-
भाक्॥६०॥ मानुषानन्दमारभ्य ब्रह्मा-
नन्दान्तवर्णने॥ तारतम्यस्य विश्रा-


न्तः स्वरूपानन्द एव हि ॥६१॥ अवि-
द्याध्वस्तेरप्येका तारतम्यविवर्जिता॥
आनन्दस्य स्वरूपत्वान्न गुणत्वादिक-
ल्पना ॥६२॥ सुखे वैषयिके यद्धि साध-
नैस्तारतम्यतः॥ तारतम्यं न तद्ब्रह्मस्व-
रूपानन्द इष्यते ॥६३॥ ब्रह्मवित्परमा-
प्नोतीत्यवाप्तेर्ब्रह्मरूपता ॥ यथा तथैव
ताद्रूप्यं सायुज्यस्यापि सम्मतं॥६४॥
सायुज्यस्य विभक्तत्वाभाव एव गि-
रोदितः॥ नवा सम्बन्धमात्रार्थः सा-
युज्यमिति शब्दतः॥६५॥ श्रोत्रियस्ये-
ति वाक्येषु सर्वेष्वानन्दवर्णने॥ अका-
महतमुक्तस्यैकत्वेपि सुखमद्वयं॥
॥६६॥ अन्तर्भावात्तदानन्दे सर्वानन्द-
स्य तद्धिया॥ अतो मुक्तिसुखं सर्वता-
रतम्यविवर्जितं॥६७॥ न मुक्तिः क-

र्मणा साध्या न ज्ञानादिसमुच्चयात्॥
मुक्तेरनित्यतापत्तेस्तत्त्वज्ञानेन सा स्व-
यं ॥६८॥ ज्ञानादेव भवेन्मुक्तिर्नान्यः
पन्था इति श्रुतेः॥अज्ञानकृतसंसारब-
न्धो ज्ञानेन बाध्यते ॥६९॥ मुक्तेर्भ-
क्तिगरीयस्त्वं साधनातिशयस्तुतेः
॥किं पुनर्ब्राह्मणा इत्थं कैमुत्येन तथेष्य-
ते॥७०॥ददामि बुद्धियोगं तमित्यत्रा-
ऽपि स्वयं हरिः॥ फलं भक्तेः परं ज्ञा-
नं प्राहाज्ञाननिवृत्तये ॥७१॥ तस्मात्स्व-
रूपानन्दस्य स्वप्रकाशात्मरूपिणः॥
प्राप्तिर्मुक्तिर्न तत्राऽस्ति तारतम्यं क-
थंचन ॥७२॥अद्वैतसिद्धिसिद्धान्तसा-
रोऽयं हरिपादयोः॥सेवायै कृतसान-
न्दप्रदोऽस्तु सुविचारिणाम्॥७३॥
सदानन्दविदा कृष्णपादपद्मरसाश्रि-

ष्या॥ कृतोऽयं सुहृदां भूयात्सदानन्द-
पदप्रदः॥ ७४॥ इति अद्वैतसिद्धिसि-
द्धान्तसारसङ्ग्रहे चतुर्थपरिच्छेदः स-
माप्तः॥

॥इति समाप्तश्चायं ग्रंथः॥

॥ॐ तत्सत्॥



श्रीमन्निखिलाऽद्वैतसिद्धान्तपदाधिरू-
ढानां निजप्रतापमहिम्ना प्रसह्य अज्ञानि-
हृदयेषु ज्ञानदीपं प्रज्वालयतां अनुद्धता
कारतयान्तःकरणवृत्त्या जगति प्रकाशं
तन्वतां तृणीकृतवैभवखण्डलानां दर्शना-
देवप्रत्यूहपुञ्जं दहतां श्रीमदपरोशंकरा-

चार्य श्री.श्री.श्री.श्री.श्री.श्री. स्वामीईश्वरा—
नन्द परिव्राजकानां श्रीगुरूणामाज्ञानुस -
रता उन्नाव मण्डलान्तर्गत सगवर ग्राम -
निवासिना क्षत्रियवंशोद्भवेन महेशबक्सा-
त्मज शीतलाबक्स सिँह तस्यात्मज हरदे-
वसिँह (उपनाम) लल्ला वर्मणा, प्रथम
अद्वैत सिद्धि सिद्धान्तसार ग्रन्थः समुल्ले -
ख्यतेषामेव चरण सरोरुहेषु समर्पितं

